© 2003 Cosmic Software and Vedic Engineering. This text is made available exclusively for on-line use, and for printing individual copies for personal use. Distribution of hard copies, or distribution of electronic files via the internet is expressly prohibited. For licensing, and for an editable text version on CD-ROM, please contact cssetzer@yahoo.com.

महाभारत
कर्णपर्व

श्रीगणेशाय नमः
ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमम्
देवीं सरस्वतीं चैव ततो जयमुदीरयेत्

अथ प्रथमोऽध्यायः

वैशम्पायन उवाच
ततो द्रोणे हते राजन्दुर्योधनमुखा नृपाः
भृशमुद्विग्नमनसो द्रोणपुत्रमुपागमन् १
ते द्रोणमुपशोचन्तः कश्मलाभिहतौजसः
पर्युपासन्त शोकार्तास्ततः शारद्वतीसुतम् २
मुहूर्तं ते समाश्वास्य हेतुभिः शास्त्रसंमितैः
रात्र्यागमे महीपालाः स्वानि वेश्मानि भेजिरे ३
विशेषतः सूतपुत्रो राजा चैव सुयोधनः
दुःशासनोऽथ शकुनिर्न निद्रामुपलेभिरे ४
ते वेश्मस्वपि कौरव्य पृथ्वीशा नाप्नुवन्सुखम्
चिन्तयन्तः क्षयं तीव्रं निद्रां नैवोपलेभिरे ५
सहितास्ते निशायां तु दुर्योधननिवेशने
अतिप्रचण्डाद्विद्वेषात्पाण्डवानां महात्मनाम् ६
यत्तद्द्यूतपरिक्लिष्टां कृष्णामानिन्यिरे सभाम्
तत्स्मरन्तोऽन्वतप्यन्त भृशमुद्विग्नचेतसः ७
चिन्तयन्तश्च पार्थानां तान्क्लेशान्द्यूतकारितान्
कृच्छ्रेण क्षणदां राजन्निन्युरब्दशतोपमाम् ८
ततः प्रभाते विमले स्थिता दिष्टस्य शासने
चक्रुरावश्यकं सर्वे विधिदृष्टेन कर्मणा ९
ते कृत्वावश्यकार्याणि समाश्वस्य च भारत
योगमाज्ञापयामासुर्युद्धाय च विनिर्ययुः १०

कर्णं सेनापतिं कृत्वा कृतकौतुकमङ्गलाः
वाचयित्वा द्विजश्रेष्ठान्दधिपात्रघृताक्षतैः ११
निष्कैर्गोभिर्हिरण्येन वासोभिश्च महाधनैः
वर्ध्यमाना जयाशीर्भिः सूतमागधबन्दिभिः १२
तथैव पाण्डवा राजन्कृतसर्वाह्णिकक्रियाः
शिबिरान्निर्ययू राजन्युद्धाय कृतनिश्चयाः १३
ततः प्रववृते युद्धं तुमुलं रोमहर्षणम्
कुरूणां पाण्डवानां च परस्परवधैषिणाम् १४
तयोर्द्वे दिवसे युद्धं कुरुपाण्डवसेनयोः
कर्णे सेनापतौ राजन्नभूदद्भुतदर्शनम् १५
ततः शत्रुक्षयं कृत्वा सुमहान्तं रणे वृषः
पश्यतां धार्तराष्ट्राणां फल्गुनेन निपातितः १६
ततस्तत्सञ्जयः सर्वं गत्वा नागाह्वयं पुरम्
आचख्यौ धृतराष्ट्राय यद्वृत्तं कुरुजाङ्गले १७
जनमेजय उवाच
आपगेयं हतं श्रुत्वा द्रोणंच समरे परैः
यो जगाम परामार्तिं वृद्धो राजाम्बिकासुतः १८
स श्रुत्वा निहतं कर्णं दुर्योधनहितैषिणम्
कथं द्विजवर प्राणानधारयत दुःखितः १९
यस्मिञ्जयाशां पुत्राणाममन्यत स पार्थिवः
तस्मिन्हते स कौरव्यः कथं प्राणानधारयत् २०
दुर्मरं बत मन्येऽह नृणां कृच्छ्रेऽपि वर्तताम्
यत्र कर्णं हतं श्रुत्वा नात्यजज्जीवितं नृपः २१
तथा शान्तनवं वृद्धं ब्रह्मन्बाह्लीकमेव च
द्रोणं च सोमदत्तं च भूरिश्रवसमेव च २२
तथैव चान्यान्सुहृदः पुत्रपौत्रांश्च पातितान्
श्रुत्वा यन्नाजहात्प्राणांस्तन्मन्ये दुष्करं द्विज २३
एतन्मे सर्वमाचक्ष्व विस्तरेण तपोधन
न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत् २४
वैशम्पायन उवाच

हते कर्णे महाराज निशि गावल्गणिस्तदा
दीनो ययौ नागपुरमश्वैर्वातसमैर्जवे २५
स हास्तिनपुरं गत्वा भृशमुद्विग्नमानसः
जगाम धृतराष्ट्रस्य क्षयं प्रक्षीणबान्धवम् २६
स समुद्वीक्ष्य राजानं कश्मलाभिहतौजसम्
ववन्दे प्राञ्जलिर्भूत्वा मूर्ध्ना पादौ नृपस्य ह २७
संपूज्य च यथान्यायं धृतराष्ट्रं महीपतिम्
हा कष्टमिति चोक्त्वा स ततो वचनमाददे २८
सञ्जयोऽह क्षितिपते कच्चिदास्ते सुखं भवान्
स्वदोषेणापदं प्राप्य कच्चिन्नाद्य विमुह्यसि २९
हितान्युक्तानि विदुरद्रोणगाङ्गेयकेशवैः
अगृहीतान्यनुस्मृत्य कच्चिन्न कुरुषे व्यथाम् ३०
रामनारदकण्वैश्च हितमुक्तं सभातले
नगृहीतमनुस्मृत्य कच्चिन्न कुरुषे व्यथाम् ३१
सुहृदस्त्वद्धिते युक्तान्भीष्मद्रोणमुखान्परैः
निहतान्युधि संस्मृत्य कच्चिन्न कुरुषे व्यथाम् ३२
तमेवंवादिनं राजा सूतपुत्रं कृताञ्जलिम्
सुदीर्घमभिनिःश्वस्य दुःखार्त इदमब्रवीत् ३३
गाङ्गेये निहते शूरे दिव्यास्त्रवति सञ्जय
द्रोणे च परमेष्वासे भृशं मे व्यथितं मनः ३४
यो रथानां सहस्राणि दंशितानां दशैव हि
अहन्यहनि तेजस्वी निजघ्ने वसुसंभवः ३५
स हतो यज्ञसेनस्य पुत्रेणेह शिखण्डिना
पाण्डवेयाभिगुप्तेन भृशं मे व्यथितं मनः ३६
भार्गवः प्रददौ यस्मै परमास्त्रं महात्मने
साक्षाद्रामेण यो बाल्ये धनुर्वेद उपाकृतः ३७
यस्य प्रसादात्कौन्तेया राजपुत्रा महाबलाः
महारथत्वं संप्राप्तास्तथान्ये वसुधाधिपाः ३८
तं द्रोणं निहतं श्रुत्वा धृष्टद्युम्नेन संयुगे
सत्यसंधं महेष्वासं भृशं मे व्यथितं मनः ३९

त्रैलोक्ये यस्य शास्त्रेषु न पुमान्विद्यते समः
तं द्रोणं निहतं श्रुत्वा किमकुर्वत मामकाः ४०
संशप्तकानां च बले पाण्डवेन महात्मना
धनञ्जयेन विक्रम्य गमिते यमसादनम् ४१
नारायणास्त्रे निहते द्रोणपुत्रस्य धीमतः
हतशेषेष्वनीकेषु किमकुर्वत मामकाः ४२
विप्रद्रुतानहं मन्ये निमग्नः शोकसागरे
प्लवमानान्हते द्रोणे सन्ननौकानिवार्णवे ४३
दुर्योधनस्य कर्णस्य भोजस्य कृतवर्मणः
मद्रराजस्य शल्यस्य द्रौणेश्चैव कृपस्य च ४४
मत्पुत्रशेषस्य तथा तथान्येषां च सञ्जय
विप्रकीर्णेष्वनीकेषु मुखवर्णोऽभवत्कथम् ४५
एतत्सर्वं यथा वृत्तं तत्त्वं गावल्गणे रणे
आचक्ष्व पाण्डवेयानां मामकानां च सर्वशः ४६
सञ्जय उवाच
पाण्डवेयैर्हि यद्वृत्तं कौरवेयेषु मारिष
तच्छ्रुत्वा मा व्यथां कार्षीर्दिष्टे न व्यथते मनः ४७
यस्मादभावी भावी वा भवेदर्थो नरं प्रति
अप्राप्तौ तस्य वा प्राप्तौ न कश्चिद्व्यथते बुधः ४८
धृतराष्ट्र उवाच
न व्यथा शृण्वतः काचिद्विद्यते मम सञ्जय
दिष्टमेतत्पुरा मन्ये कथयस्व यथेच्छकम् ४९
इति श्रीमहाभारते कर्णपर्वणि प्रथमोऽध्यायः १

द्वितीयोऽध्यायः

सञ्जय उवाच
हते द्रोणे महेष्वासे तव पुत्रा महारथाः
बभूवुरश्वस्तमुखा विषण्णा गतचेतसः १
अवाङ्मुखाः शस्त्रभृतः सर्व एव विशां पते
अप्रेक्षमाणाः शोकार्ता नाभ्यभाषन्परस्परम् २

तान्दृष्ट्वा व्यथिताकारान्सैन्यानि तव भारत
ऊर्ध्वमेवाभ्यवेक्षन्त दुःखत्रस्तान्यनेकशः ३
शस्त्राण्येषां च राजेन्द्र शोणिताक्तान्यशेषतः
प्राभ्रश्यन्त कराग्रेभ्यो दृष्ट्वा द्रोणं निपातितम् ४
तानि बद्धान्यनिष्टानि लम्बमानानि भारत
अदृश्यन्त महाराज नक्षत्राणि यथा दिवि ५
तथार्तं स्तिमितं दृष्ट्वा गतसत्वमिव स्थितम्
स्वं बलं तन्महाराज राजा दुर्योधनोऽब्रवीत् ६
भवतां बाहुवीर्यं हि समाश्रित्य मया युधि
पाण्डवेयाः समाहूता युद्धं चेदं प्रवर्तितम् ७
तदिदं निहते द्रोणे विषण्णमिव लक्ष्यते
युध्यमानाश्च समरे योधा वध्यन्ति सर्वतः ८
जयो वापि वधो वापि युध्यमानस्य संयुगे
भवेत्किमत्र चित्रं वै युध्यध्वं सर्वतोमुखाः ९
पश्यध्वं च महात्मानं कर्णं वैकर्तनं युधि
प्रचरन्तं महेष्वासं दिव्यैरस्त्रैर्महाबलम् १०
यस्य वै युधि सन्त्रासात्कुन्तीपुत्रो धनञ्जयः
निवर्तते सदामर्षात्सिंहात्क्षुद्रमृगो यथा ११
येन नागायुतप्राणो भीमसेनो महाबलः
मानुषेणैव युद्धेन तामवस्थां प्रवेशितः १२
येन दिव्यास्त्रविच्छूरो मायावी स घटोत्कचः
अमोघया रणे शक्त्या निहतो भैरवं नदन् १३
तस्य दुष्पारवीर्यस्य सत्यसन्धस्य धीमतः
बाह्वोर्द्रविणमक्षय्यमद्य द्रक्ष्यथ संयुगे १४
द्रोणपुत्रस्य विक्रान्तं राधेयस्यैव चोभयोः
पाण्डुपाञ्चालसैन्येषु द्रक्ष्यथापि महात्मनोः १५
सर्व एव भवन्तश्च शूराः प्राज्ञाः कुलोद्गताः
शीलवन्तः कृतास्त्राश्च द्रक्ष्यथाद्य परस्परम् १६
एवमुक्ते महराज कर्णो वैकर्तनो नृपः
सिंहनादं विनद्योच्चैः प्रायुध्यत महाबलः १७

स सृञ्जयानां सर्वेषां पाञ्चालानां च पश्यताम्
केकयानां विदेहानामकरोत्कदनं महत् १८
तस्येषुधाराः शतशः प्रादुरासञ्शरासनात्
अग्रे पुङ्खे च संसक्ता यथा भ्रमरपङ्क्तयः १९
स पीडयित्वा पाञ्चालान्पाण्डवांश्च तरस्विनः
हत्वा सहस्रशो योधानर्जुनेन निपातितः २०
इति श्रीमहाभारते कर्णपर्वणि द्वितीयोऽध्यायः २

तृतीयोऽध्यायः

वैशम्पायन उवाच
एतच्छ्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः
शोकस्यान्तमपश्यन्वै हतं मत्वा सुयोधनम्
विह्वलः पतितो भूमौ नष्टचेता इव द्विपः १
तस्मिन्निपतिते भूमौ विह्वले राजसत्तमे
आर्तनादो महानासीत्स्त्रीणां भरतसत्तम २
स शब्दः पृथिवीं सर्वां पूरयामास सर्वशः
शोकार्णवे महाघोरे निमग्ना भरतस्त्रियः ३
राजानं च समासाद्य गान्धारी भरतर्षभ
निःसंज्ञा पतिता भूमौ सर्वाण्यन्तःपुराणि च ४
ततस्ताः सञ्जयो राजन्समाश्वासयदातुराः
मुह्यमानाः सुबहुशो मुञ्चन्त्यो वारि नेत्रजम् ५
समाश्वस्ताः स्त्रियस्तास्तु वेपमाना मुहुर्मुहुः
कदल्य इव वातेन धूयमानाः समन्ततः ६
राजानं विदुरश्चापि प्रज्ञाचक्षुषमीश्वरम्
आश्वासयामास तदा सिञ्चंस्तोयेन कौरवम् ७
स लब्ध्वा शनकैः संज्ञां ताश्च दृष्ट्वा स्त्रियो नृप
उन्मत्त इव राजा स स्थितस्तूष्णीं विशां पते ८
ततो ध्यात्वा चिरं कालं निःश्वसंश्च पुनः पुनः
स्वान्पुत्रान्गर्हयामास बहु मेने च पाण्डवान् ९
गर्हयित्वात्मनो बुद्धिं शकुनेः सौबलस्य च

ध्यात्वा च सुचिरं कालं वेपमानो मुहुर्मुहुः १०
संस्तभ्य च मनो भूयो राजा धैर्यसमन्वितः
पुनर्गावल्गणिं सूतं पर्यपृच्छत सञ्जयम् ११
यत्त्वया कथितं वाक्यं श्रुतं सञ्जय तन्मया
कच्चिद्दुर्योधनः सूत न गतो वै यमक्षयम्
ब्रूहि सञ्जय तत्त्वेन पुनरुक्तां कथामिमाम् १२
एवमुक्तोऽब्रवीत्सूतो राजानं जनमेजय
हतो वैकर्तनो राजन्सह पुत्रैर्महारथैः
भ्रातृभिश्च महेष्वासैः सूतपुत्रैस्तनुत्यजैः १३
दुःशासनश्च निहतः पाण्डवेन यशस्विना
पीतं च रुधिरं कोपाद्भीमसेनेन संयुगे १४
इति श्रीमहाभारते कर्णपर्वणि तृतीयोऽध्यायः ३

चतुर्थोऽध्यायः

वैशम्पायन उवाच
एतच्छ्रुत्वा महाराज धृतराष्ट्रोऽम्बिकासुतः
अब्रवीत्सञ्जयं सूतं शोकव्याकुलचेतनः १
दुष्प्रणीतेन मे तात मनसाभिप्लुतात्मनः
हतं वैकर्तनं श्रुत्वा शोको मर्माणि कृन्तति २
कृतास्त्रपरमाः शल्ये दुःखपारं तितीर्षवः
कुरूणां सृञ्जयानां च के नु जीवन्ति के मृताः ३
सञ्जय उवाच
हतः शांतनवो राजन्दुराधर्षः प्रतापवान्
हत्वा पाण्डवयोधानामर्बुदं दशभिर्दिनैः ४
ततो द्रोणो महेष्वासः पाञ्चालानां रथव्रजान्
निहत्य युधि दुर्धर्षः पश्चाद्रुक्मरथो हतः ५
हतशिष्टस्य भीष्मेण द्रोणेन च महात्मना
अर्धं निहत्य सैन्यस्य कर्णो वैकर्तनो हतः ६
विविंशतिर्महाराज राजपुत्रो महाबलः
आनर्तयोधाञ्शतशो निहत्य निहतो रणे ७

अथ पुत्रो विकर्णस्ते क्षत्रव्रतमनुस्मरन्
क्षीणवाहायुधः शूरः स्थितोऽभिमुखतः परान् ८
घोररूपान्परिक्लेशान्दुर्योधनकृतान्बहून्
प्रतिज्ञां स्मरता चैव भीमसेनेन पातितः ९
विन्दानुविन्दावावन्त्यौ राजपुत्रौ महाबलौ
कृत्वा नसुकरं कर्म गतौ वैवस्वतक्षयम् १०
सिन्धुराष्ट्रमुखानीह दश राष्ट्राणि यस्य वै
वशे तिष्ठन्ति वीरस्य यः स्थितस्तव शासने ११
अक्षौहिणीर्दशैकां च निर्जित्य निशितैः शरैः
अर्जुनेन हतो राजन्महावीर्यो जयद्रथः १२
तथा दुर्योधनसुतस्तरस्वी युद्धदुर्मदः
वर्तमानः पितुः शास्त्रे सौभद्रेण निपातितः १३
तथा दौःशासनिर्वीरो बाहुशाली रणोत्कटः
द्रौपदेयेन विक्रम्य गमितो यमसादनम् १४
किरातानामधिपतिः सागरानूपवासिनाम्
देवराजस्य धर्मात्मा प्रियो बहुमतः सखा १५
भगदत्तो महीपालः क्षत्रधर्मरतः सदा
धनंजयेन विक्रम्य गमितो यमसादनम् १६
तथा कौरवदायादः सौमदत्तिर्महायशाः
हतो भूरिश्रवा राजञ्शूरः सात्यकिना युधि १७
श्रुतायुरपि चाम्बष्ठः क्षत्रियाणां धनुर्धरः
चरन्नभीतवत्संख्ये निहतः सव्यसाचिना १८
तव पुत्रः सदा संख्ये कृतास्त्रो युद्धदुर्मदः
दुःशासनो महाराज भीमसेनेन पातितः १९
यस्य राजन्गजानीकं बहुसाहस्रमद्भुतम्
सुदक्षिणः स संग्रामे निहतः सव्यसाचिना २०
कोसलानामधिपतिर्हत्वा बहुशतान्परान्
सौभद्रेण हि विक्रम्य गमितो यमसादनम् २१
बहुशो योधयित्वा च भीमसेनं महारथः
चित्रसेनस्तव सुतो भीमसेनेन पातितः २२

मद्रराजात्मजः शूरः परेषां भयवर्धनः
असिचर्मधरः श्रीमान्सौभद्रेण निपातितः २३
समः कर्णस्य समरे यः स कर्णस्य पश्यतः
वृषसेनो महातेजाः शीघ्रास्त्रः कृतनिश्चयः २४
अभिमन्योर्वधं स्मृत्वा प्रतिज्ञामपि चात्मनः
धनंजयेन विक्रम्य गमितो यमसादनम् २५
नित्यप्रसक्तवैरो यः पाण्डवैः पृथिवीपतिः
विश्राव्य वैरं पार्थेन श्रुतायुः स निपातितः २६
शल्यपुत्रस्तु विक्रान्तः सहदेवेन मारिष
हतो रुक्मरथो राजन्भ्राता मातुलजो युधि २७
राजा भगीरथो वृद्धो बृहत्क्षत्रश्च केकयः
पराक्रमन्तौ विक्रान्तौ निहतौ वीर्यवत्तरौ २८
भगदत्तसुतो राजन्कृतप्रज्ञो महाबलः
श्येनवच्चरता संख्ये नकुलेन निपातितः २९
पितामहस्तव तथा बाह्लिकः सह बाह्लिकैः
भीमसेनेन विक्रम्य गमितो यमसादनम् ३०
जयत्सेनस्तथा राजञ्जारासंधिर्महाबलः
मागधो निहतः संख्ये सौभद्रेण महात्मना ३१
पुत्रस्ते दुर्मुखो राजन्दुःसहश्च महारथः
गदया भीमसेनेन निहतौ शूरमानिनौ ३२
दुर्मर्षणो दुर्विषहो दुर्जयश्च महारथः
कृत्वा नसुकरं कर्म गता वैवस्वतक्षयम् ३३
सचिवो वृषवर्मा ते सूतः परमवीर्यवान्
भीमसेनेन विक्रम्य गमितो यमसादनम् ३४
नागायुतबलो राजा नागायुतबलो महान्
सगणः पाण्डुपुत्रेण निहतः सव्यसाचिना ३५
वसातयो महाराज द्विसाहस्राः प्रहारिणः
शूरसेनाश्च विक्रान्ताः सर्वे युधि निपातिताः ३६
अभीषाहाः कवचिनः प्रहरन्तो मदोत्कटाः
शिबयश्च रथोदाराः कलिङ्गसहिता हताः ३७

गोकुले नित्यसंवृद्धा युद्धे परमकोविदाः
श्रेणयो बहुसाहस्राः संशप्तकगणाश्च ये
ते सर्वे पार्थमासाद्य गता वैवस्वतक्षयम् ३८
श्यालौ तव महाराज राजानौ वृषकाचलौ
त्वदर्थे संपराक्रान्तौ निहतौ सव्यसाचिना ३९
उग्रकर्मा महेष्वासो नामतः कर्मतस्तथा
शाल्वराजो महाराज भीमसेनेन पातितः ४०
ओघवांश्च महाराज बृहन्तः सहितो रणे
पराक्रमन्तौ मित्रार्थे गतौ वैवस्वतक्षयम् ४१
तथैव रथिनां श्रेष्ठः क्षेमधूर्तिर्विशां पते
निहतो गदया राजन्भीमसेनेन संयुगे ४२
तथा राजा महेष्वासो जलसंधो महाबलः
सुमहत्कदनं कृत्वा हतः सात्यकिना रणे ४३
अलायुधो राक्षसेन्द्रः खरबन्धुरयानगः
घटोत्कचेन विक्रम्य गमितो यमसादनम् ४४
राधेयाः सूतपुत्राश्च भ्रातरश्च महारथाः
केकयाः सर्वशश्चापि निहताः सव्यसाचिना ४५
मालवा मद्रकाश्चैव द्रविडाश्चोग्रविक्रमाः
यौधेयाश्च ललित्थाश्च क्षुद्रकाश्चाप्युशीनराः ४६
मावेल्लकास्तुण्डिकेराः सावित्रीपुत्रकाञ्चलाः
प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च मारिष ४७
पत्तीनां निहताः संघा हयानामयुतानि च
रथव्रजाश्च निहता हताश्च वरवारणाः ४८
सध्वजाः सायुधाः शूराः सवर्माम्बरभूषणाः
कालेन महता यत्ताः कुले ये च विवर्धिताः ४९
ते हताः समरे राजन्पार्थेनाक्लिष्टकर्मणा
अन्ये तथामितबलाः परस्परवधैषिणः ५०
एते चान्ये च बहवो राजानः सगणा रणे
हताः सहस्रशो राजन्यन्मां त्वं परिपृच्छसि
एवमेष क्षयो वृत्तः कर्णार्जुनसमागमे ५१

महेन्द्रेण यथा वृत्रो यथा रामेण रावणः
यथा कृष्णेन निहतो मुरो रणनिपातितः
कार्तवीर्यश्च रामेण भार्गवेण हतो यथा ५२
सज्ञातिबान्धवः शूरः समरे युद्धदुर्मदः
रणे कृत्वा महायुद्धं घोरं त्रैलोक्यविश्रुतम् ५३
तथार्जुनेन निहतो द्वैरथे युद्धदुर्मदः
सामात्यबान्धवो राजन्कर्णः प्रहरतां वरः ५४
जयाशा धार्तराष्ट्राणां वैरस्य च मुखं यतः
तीर्णं तत्पाण्डवै राजन्यत्पुरा नावबुध्यसे ५५
उच्यमानो महाराज बन्धुभिर्हितकाङ्क्षिभिः
तदिदं समनुप्राप्तं व्यसनं त्वां महात्ययम् ५६
पुत्राणां राज्यकामानां त्वया राजन्हितैषिणा
अहितानीव चीर्णानि तेषां ते फलमागतम् ५७
धृतराष्ट्र उवाच
आख्याता मामकास्तात निहता युधि पाण्डवैः
निहतान्पाण्डवेयानां मामकैर्ब्रूहि सञ्जय ५८
सञ्जय उवाच
कुन्तयो युधि विक्रान्ता महासत्त्वा महाबलाः
सानुबन्धाः सहामात्या भीष्मेण युधि पातिताः ५९
समः किरीटिना संख्ये वीर्येण च बलेन च
सत्यजित्सत्यसन्धेन द्रोणेन निहतो रणे ६०
तथा विराटद्रुपदौ वृद्धौ सहसुतौ नृपौ
पराक्रमन्तौ मित्रार्थे द्रोणेन निहतौ रणे ६१
यो बाल एव समरे संमितः सव्यसाचिना
केशवेन च दुर्धर्षो बलदेवेन चाभिभूः ६२
स एष कदनं कृत्वा महद्रणविशारदः
परिवार्य महामात्रैः षड्भिः परमकै रथैः
अशक्नुवद्भिर्बीभत्सुमभिमन्युर्निपातितः ६३
तं कृतं विरथं वीरं क्षत्रधर्मे व्यवस्थितम्
दौःशासनिर्महाराज सौभद्रं हतावान्रणे ६४

बृहन्तस्तु महेष्वासः कृतास्त्रो युद्धदुर्मदः
दुःशासनेन विक्रम्य गमितो यमसादनम् ६५
मणिमान्दण्डधारश्च राजानौ युद्धदुर्मदौ
पराक्रमन्तौ मित्रार्थे द्रोणेन विनिपातितौ ६६
अंशुमान्भोजराजस्तु सहसैन्यो महारथः
भारद्वाजेन विक्रम्य गमितो यमसादनम् ६७
चित्रायुधश्चित्रयोधी कृत्वा तौ कदनं महत्
चित्रमार्गेण विक्रम्य कर्णेन निहतौ युधि ६८
वृकोदरसमो युद्धे दृढः केकयजो युधि
केकयेनैव विक्रम्य भ्रात्रा भ्राता निपातितः ६९
जनमेजयो गदायोधी पार्वतीयः प्रतापवान्
दुर्मुखेन महाराज तव पुत्रेण पातितः ७०
रोचमानौ नरव्याघ्रौ रोचमानौ ग्रहाविव
द्रोणेन युगपद्राजन्दिवं संप्रेषितौ शरैः ७१
नृपाश्च प्रतियुध्यन्तः पराक्रान्ता विशां पते
कृत्वा नसुकरं कर्म गता वैवस्वतक्षयम् ७२
पुरुजित्कुन्तिभोजश्च मातुलः सव्यसाचिनः
संग्रामनिर्जिताँल्लोकान्गमितो द्रोणसायकैः ७३
अभिभूः काशिराजश्च काशिकैर्बहुभिर्वृतः
वसुदानस्य पुत्रेण न्यासितो देहमाहवे ७४
अमितौजा युधामन्युरुत्तमौजाश्च वीर्यवान्
निहत्य शतशः शूरान्परैर्विनिहतौ रणे ७५
क्षत्रधर्मा च पाञ्चाल्यः क्षत्रवर्मा च मारिष
द्रोणेन परमेष्वासौ गमितौ यमसादनम् ७६
शिखण्डितनयो युद्धे क्षत्रदेवो युधां पतिः
लक्ष्मणेन हतो राजंस्तव पौत्रेण भारत ७७
सुचित्रश्चित्रधर्मा च पितापुत्रौ महारथौ
प्रचरन्तौ महावीर्यौ द्रोणेन निहतौ रणे ७८
वार्धक्षेमिर्महाराज कृत्वा कदनमाहवे
बाह्लिकेन महाराज कौरवेण निपातितः ७९

धृष्टकेतुर्महाराज चेदीनां प्रवरो रथः
कृत्वा नसुकरं कर्म गतो वैवस्वतक्षयम् ८०
तथा सत्यधृतिस्तात कृत्वा कदनमाहवे
पाण्डवार्थे पराक्रान्तो गमितो यमसादनम् ८१
पुत्रस्तु शिशुपालस्य सुकेतुः पृथिवीपते
निहत्य शात्रवान्संख्ये द्रोणेन निहतो युधि ८२
तथा सत्यधृतिर्वीरो मदिराश्वश्च वीर्यवान्
सूर्यदत्तश्च विक्रान्तो निहतो द्रोणसायकैः ८३
श्रेणिमांश्च महाराज युध्यमानः पराक्रमी
कृत्वा नसुकरं कर्म गतो वैवस्वतक्षयम् ८४
तथैव युधि विक्रान्तो मागधः परवीरहा
भीष्मेण निहतो राजन्युध्यमानः पराक्रमी ८५
वसुदानश्च कदनं कुर्वाणोऽतीव संयुगे
भारद्वाजेन विक्रम्य गमितो यमसादनम् ८६
एते चान्ये च बहवः पाण्डवानां महारथाः
हता द्रोणेन विक्रम्य यन्मां त्वं परिपृच्छसि ८७
धृतराष्ट्र उवाच
हतप्रवीरे सैन्येऽस्मिन्मामके वदतां वर
अहताञ्शंस मे सूत येऽत्र जीवन्ति केचन ८८
एतेषु निहतेष्वद्य ये त्वया परिकीर्तिताः
अहतान्मन्यसे यांस्त्वं तेऽपि स्वर्गजितो मताः ८९
सञ्जय उवाच
यस्मिन्महास्त्राणि समर्पितानि चित्राणि शुभ्राणि चतुर्विधानि
दिव्यानि राजन्निहितानि चैव द्रोणेन वीरद्विजसत्तमेन ९०
महारथः कृतिमान्क्षिप्रहस्तो दृढायुधोदृढमुष्टिर्दृढेषुः
स वीर्यवान्द्रोणपुत्रस्तरस्वी व्यवस्थितो योद्धुकामस्त्वदर्थे ९१
आनर्तवासी हृदिकात्मजोऽसौ महारथः सात्वतानां वरिष्ठः
स्वयं भोजः कृतवर्मा कृतास्त्रो व्यवस्थितो योद्धुकामस्त्वदर्थे ९२
शारद्वतो गौतमश्चापि राजन्महाबलो बहुचित्रास्त्रयोधी
धनुश्चित्रं सुमहद्भारसाहं व्यवस्थितो योत्स्यमानः प्रगृह्य ९३

आर्तायनिः समरे दुष्प्रकम्प्यः सेनाग्रणीः प्रथमस्तावकानाम्
स्वस्त्रेयांस्तान्पाण्डवेयान्विसृज्य सत्यां वाचं तां चिकीर्षुस्तरस्वी ९४
तेजोवधं सूतपुत्रस्य संख्ये प्रतिश्रुत्वाजातशत्रोः पुरस्तात्
दुराधर्षः शक्रसमानवीर्यः शल्यः स्थितो योद्धुकामस्त्वदर्थे ९५
आजानेयैः सैन्धवैः पार्वतीयैर्नदीजकाम्बोजवनायुबाह्लिकैः
गान्धारराजः स्वबलेन युक्तो व्यवस्थितो योद्धुकामस्त्वदर्थे ९६
तथा सुतस्ते ज्वलनार्कवर्णं रथं समास्थाय कुरुप्रवीर
व्यवस्थितः कुरुमित्रो नरेन्द्र व्यभ्रे सूर्यो भ्राजमानो यथा वै ९७
दुर्योधनो नागकुलस्य मध्ये महावीर्यः सह सैन्यप्रवीरैः
रथेन जाम्बूनदभूषणेन व्यवस्थितः समरे योद्धुकामः ९८
स राजमध्ये पुरुषप्रवीरो रराज जाम्बूनदचित्रवर्मा
पद्मप्रभो वह्निरिवाल्पधूमो मेघान्तरे सूर्य इव प्रकाशः ९९
तथा सुषेणोऽप्यसिचर्मपाणिस्तवात्मजः सत्यसेनश्च वीरः
व्यवस्थितौ चित्रसेनेन सार्धं हृष्टात्मानौ समरे योद्धुकामौ १००
ह्रीनिषेधा भरता राजपुत्राश्चित्रायुधः श्रुतवर्मा जयश्च
शलश्च सत्यव्रतदुःशलौ च व्यवस्थिता बलिनो योद्धुकामाः १०१
कैतव्यानामधिपः शूरमानी रणे रणे शत्रुहा राजपुत्रः
पत्री हयी नागरथप्रयायी व्यवस्थितो योद्धुकामस्त्वदर्थे १०२
वीरः श्रुतायुश्च श्रुतायुधश्च चित्राङ्गदश्चित्रवर्मा स वीरः
व्यवस्थिता ये तु सैन्ये नराग्र्याः प्रहारिणो मानिनः सत्यसंधाः १०३
कर्णात्मजः सत्यसेनो महात्मा व्यवस्थितः समरे योद्धुकामः
अथापरौ कर्णसुतौ वरार्हौ व्यवस्थितौ लघुहस्तौ नरेन्द्र
बलं महद्दुर्भिदमल्पधैर्यैः समाश्रितौ योत्स्यमानौ त्वदर्थे १०४
एतैश्च मुख्यैरपरैश्च राजन्योधप्रवीरैरमितप्रभावैः
व्यवस्थितो नागकुलस्य मध्ये यथा महेन्द्रः कुरुराजो जयाय १०५
धृतराष्ट्र उवाच
आख्याता जीवमाना ये परेभ्योऽन्ये यथातथम्
इतीदमभिगच्छाभि व्यक्तमर्थाभिपत्तितः १०६
वैशम्पायन उवाच
एवं ब्रुवन्नेव तदा धृतराष्ट्रोऽम्बिकासुतः

हतप्रवीरं विध्वस्तं किंचिच्छेषं स्वकं बलम्
श्रुत्वा व्यामोहमगमच्छोकव्याकुलितेन्द्रियः १०७
मुह्यमानोऽब्रवीच्चापि मुहूर्तं तिष्ठ सञ्जय
व्याकुलं मे मनस्तात श्रुत्वा सुमहदप्रियम्
नष्टचित्तस्ततः सोऽथ बभूव जगतीपतिः १०८
इति श्रीमहाभारते कर्णपर्वणि चतुर्थोऽध्यायः ४

पञ्चमोऽध्यायः

जनमेजय उवाच
श्रुत्वा कर्णं हतं युद्धे पुत्रांश्चैवापलायिनः
नरेन्द्रः किंचिदाश्वस्तो द्विजश्रेष्ठ किमब्रवीत् १
प्राप्तवान्परमं दुःखं पुत्रव्यसनजं महत्
तस्मिन्यदुक्तवान्काले तन्ममाचक्ष्व पृच्छतः २
वैशम्पायन उवाच
श्रुत्वा कर्णस्य निधनमश्रद्धेयमिवाद्भुतम्
भूतसंमोहनं भीमं मेरोः पर्यसनं यथा ३
चित्तमोहमिवायुक्तं भार्गवस्य महामतेः
पराजयमिवेन्द्रस्य द्विषद्भ्यो भीमकर्मणः ४
दिवः प्रपतनं भानोरुर्व्यामिव महाद्युतेः
संशोषणमिवाचिन्त्यं समुद्रस्याक्षयाम्भसः ५
महीवियद्दिगीशानां सर्वनाशमिवाद्भुतम्
कर्मणोरिव वैफल्यमुभयोः पुण्यपापयोः ६
संचिन्त्य निपुणं बुद्ध्या धृतराष्ट्रो जनेश्वरः
नेदमस्तीति संचिन्त्य कर्णस्य निधनं प्रति ७
प्राणिनामेतदात्मत्वात्स्यादपीति विनाशनम्
शोकाग्निना दह्यमानो धम्यमान इवाशयः ८
विध्वस्तात्मा श्वसन्दीनो हा हेत्युक्त्वा सुदुःखितः
विललाप महाराज धृतराष्ट्रोऽम्बिकासुतः ९
धृतराष्ट्र उवाच
सञ्जयाधिरथो वीरः सिंहद्विरदविक्रमः

वृषभप्रतिमस्कन्धो वृषभाक्षगतिस्वनः १०
वृषभो वृषभस्येव यो युद्धे न निवर्तते
शत्रोरपि महेन्द्रस्य वज्रसंहननो युवा ११
यस्य ज्यातलशब्देन शरवृष्टिरवेण च
रथाश्वनरमातङ्गा नावतिष्ठन्ति संयुगे १२
यमाश्रित्य महाबाहुं द्विषत्संघघ्नमच्युतम्
दुर्योधनोऽकरोद्वैरं पाण्डुपुत्रैर्महाबलैः १३
स कथं रथिनां श्रेष्ठः कर्णः पार्थेन संयुगे
निहतः पुरुषव्याघ्रः प्रसह्यासह्यविक्रमः १४
यो नामन्यत वै नित्यमच्युतं न धनंजयम्
न वृष्णीनपि तानन्यान्स्वबाहुबलमाश्रितः १५
शार्ङ्गगाण्डीवधन्वानौ सहितावपराजितौ
अहं दिव्याद्रथादेकः पातयिष्यामि संयुगे १६
इति यः सततं मन्दमवोचल्लोभमोहितम्
दुर्योधनमपादीनं राज्यकामुकमातुरम् १७
यश्चाजैषीदतिबलानमित्रानपि दुर्जयान्
गान्धारान्मद्रकान्मत्स्यांस्त्रिगर्तांस्तङ्गणाञ्शकान् १८
पाञ्चालांश्च विदेहांश्च कुणिन्दान्काशिकोसलान्
सुह्मानङ्गांश्च पुण्ड्रांश्च निषादान्वङ्गकीचकान् १९
वत्सान्कलिङ्गांस्तरलानश्मकानृषिकांस्तथा
यो जित्वा समरे वीरश्चक्रे बलिभृतः पुरा २०
उच्चैःश्रवा वरोऽश्वानां राज्ञां वैश्रवणो वरः
वरो महेन्द्रो देवानां कर्णः प्रहरतां वरः २१
यं लब्ध्वा मागधो राजा सान्त्वमानार्थगौरवैः
अरौत्सीत्पार्थिवं क्षत्रमृते कौरवयादवान् २२
तं श्रुत्वा निहतं कर्णं द्वैरथे सव्यसाचिना
शोकार्णवे निमग्नोऽहमप्लवः सागरे यथा २३
ईदृशैर्यद्यहं दुःखैर्न विनश्यामि सञ्जय
वज्राद्दृढतरं मन्ये हृदयं मम दुर्भिदम् २४
ज्ञातिसंबन्धिमित्राणामिमं श्रुत्वा पराजयम्

को मदन्यः पुमाँल्लोके न जह्यात्सूत जीवितम् २५
विषमग्निं प्रपातं वा पर्वताग्रादहं वृणे
न हि शक्ष्यामि दुःखानि सोढुं कष्टानि सञ्जय २६
सञ्जय उवाच
श्रिया कुलेन यशसा तपसा च श्रुतेन च
त्वामद्य सन्तो मन्यन्ते ययातिमिव नाहुषम् २७
श्रुते महर्षिप्रतिमः कृतकृत्योऽसि पार्थिव
पर्यवस्थापयात्मानं मा विषादे मनः कृथाः २८
धृतराष्ट्र उवाच
दैवमेव परं मन्ये धिक्पौरुषमनर्थकम्
यत्र रामप्रतीकाशः कर्णोऽहन्यत संयुगे २९
हत्वा युधिष्ठिरानीकं पाञ्चालानां रथव्रजान्
प्रताप्य शरवर्षेण दिशः सर्वा महारथः ३०
मोहयित्वा रणे पार्थान्वज्रहस्त इवासुरान्
स कथं निहतः शेते वायुरुग्ण इव द्रुमः ३१
शोकस्यान्तं न पश्यामि समुद्रस्येव विप्लुकाः
चिन्ता मे वर्धते तीव्रा मुमूर्षा चापि जायते ३२
कर्णस्य निधनं श्रुत्वा विजयं फल्गुनस्य च
अश्रद्धेयमहं मन्ये वधं कर्णस्य सञ्जय ३३
वज्रसारमयं नूनं हृदयं सुदृढं मम
यच्छ्रुत्वा पुरुषव्याघ्रं हतं कर्णं न दीर्यते ३४
आयुर्नूनं सुदीर्घं मे विहितं दैवतैः पुरा
यत्र कर्णं हतं श्रुत्वा जीवामीह सुदुःखितः ३५
धिग्जीवितमिदं मेऽद्य सुहृद्धीनस्य सञ्जय
अद्य चाहं दशामेतां गतः सञ्जय गर्हिताम्
कृपणं वर्तयिष्यामि शोच्यः सर्वस्य मन्दधीः ३६
अहमेव पुरा भूत्वा सर्वलोकस्य सत्कृतः
परिभूतः कथं सूत पुनः शक्ष्यामि जीवितुम्
दुःखात्सुदुःखं व्यसनं प्राप्तवानस्मि सञ्जय ३७
तस्माद्भीष्मवधे चैव द्रोणस्य च महात्मनः

नात्र शेषं प्रपश्यामि सूतपुत्रे हते युधि ३८
स हि पारं महानासीत्पुत्राणां मम सञ्जय
युद्धे विनिहतः शूरो विसृजन्सायकान्बहून् ३९
को हि मे जीवितेनार्थस्तमृते पुरुषर्षभम्
रथादतिरथो नूनमपतत्सायकार्दितः ४०
पर्वतस्येव शिखरं वज्रपातविदारितम्
शयीत पृथिवीं नूनं शोभयन्रुधिरोक्षितः
मातङ्ग इव मत्तेन मातङ्गेन निपातितः ४१
यद्बलं धार्तराष्ट्राणां पाण्डवानां यतो भयम्
सोऽर्जुनेन हतः कर्णः प्रतिमानं धनुष्मताम् ४२
स हि वीरो महेष्वासः पुत्राणामभयंकरः
शेते विनिहतो वीरः शक्रेणेव यथा बलः ४३
पङ्गोरिवाध्वगमनं दरिद्रस्येव कामितम्
दुर्योधनस्य चाकूतं तृषितस्येव पिप्लुकाः ४४
अन्यथा चिन्तितं कार्यमन्यथा तत्तु जायते
अहो नु बलवद्दैवं कालश्च दुरतिक्रमः ४५
पलायमानः कृपणं दीनात्मा दीनपौरुषः
कच्चिन्न निहतः सूत पुत्रो दुःशासनो मम ४६
कच्चिन्न नीचाचरितं कृतवांस्तात संयुगे
कचिन्न निहतः शूरो यथ्या न क्षत्रिया हताः ४७
युधिष्ठिरस्य वचनं मा युद्धमिति सर्वदा
दुर्योधनो नाभ्यगृह्णान्मूढः पथ्यमिवौषधम् ४८
शरतल्पे शयानेन भीष्मेण सुमहात्मना
पानीयं याचितः पार्थः सोऽविध्यन्मेदिनीतलम् ४९
जलस्य धारां विहितां दृष्ट्वा तां पाण्डवेन ह
अब्रवीत्स महाबाहुस्तात संशाम्य पाण्डवैः ५०
प्रशमाद्धि भवेच्छान्तिर्मदन्तं युद्धमस्तु च
भ्रातृभावेन पृथिवीं भुङ्क्ष्व पाण्डुसुतैः सह ५१
अकुर्वन्वचनं तस्य नूनं शोचति मे सुतः
तदिदं समनुप्राप्तं वचनं दीर्घदर्शिनः ५२

अहं तु निहतामात्यो हतपुत्रश्च सञ्जय
द्यूततः कृच्छ्रमापन्नो लूनपक्ष इव द्विजः ५३
यथा हि शकुनिं गृह्य छित्वा पक्षौ च सञ्जय
विसर्जयन्ति संहृष्टाः क्रीडमानाः कुमारकाः ५४
छिन्नपक्षतया तस्य गमनं नोपपद्यते
तथाहमपि संप्राप्तो लूनपक्ष इव द्विजः ५५
क्षीणः सर्वार्थहीनश्च निर्बन्धुर्ज्ञातिवर्जितः
कां दिशं प्रतिपत्स्यामि दीनः शत्रुवशं गतः ५६
दुर्योधनस्य वृद्ध्यर्थं पृथिवीं योऽजयत्प्रभुः
स जितः पाण्डवैः शूरैः समर्थैर्वीर्यशालिभिः ५७
तस्मिन्हते महेष्वासे कर्णे युधि किरीटिना
के वीराः पर्यवर्तन्ति तन्ममाचक्ष्व सञ्जय ५८
कच्चिन्नैकः परित्यक्तः पाण्डवैर्निहतो रणे
उक्तं त्वया पुरा वीर यथा वीरा निपातिताः ५९
भीष्ममप्रतियुध्यन्तं शिखण्डी सायकोत्तमैः
पातयामास समरे सर्वशस्त्रभृतां वरम् ६०
तथा द्रौपदिना द्रोणो न्यस्तसर्वायुधो युधि
युक्तयोगो महेष्वासः शरैर्बहुभिराचितः
निहतः खड्गमुद्यम्य धृष्टद्युम्नेन सञ्जय ६१
अन्तरेण हतावेतौ छलेन च विशेषतः
अश्रौषमहमेतद्वै भीष्मद्रोणौ निपातितौ ६२
भीष्मद्रोणौ हि समरे न हन्याद्वज्रभृत्स्वयम्
न्यायेन युध्यमानौ हि तद्वै सत्यं ब्रवीमि ते ६३
कर्णं त्वस्यन्तमस्त्राणि दिव्यानि च बहूनि च
कथमिन्द्रोपमं वीरं मृत्युर्युद्धे समस्पृशत् ६४
यस्य विद्युत्प्रभां शक्तिं दिव्यां कनकभूषणाम्
प्रायच्छद्द्विषतां हन्त्रीं कुण्डलाभ्यां पुरन्दरः ६५
यस्य सर्पमुखो दिव्यः शरः कनकभूषणः
अशेत निहतः पत्री चन्दनेष्वरिसूदनः ६६
भीष्मद्रोणमुखान्वीरान्योऽवमन्य महारथान्

जामदग्न्यान्महाघोरं ब्रह्मस्त्रमशिक्षत ६७
यश्च द्रोणमुखान्दृष्ट्वा विमुखानर्दिताञ्शरैः
सौभद्रस्य महाबाहुर्व्यधमत्कार्मुकं शरैः ६८
यश्च नागायुतप्राणं वातरंहसमच्युतम्
विरथं भ्रातरं कृत्वा भीमसेनमुपाहसत् ६९
सहदेवं च निर्जित्य शरैः संनतपर्वभिः
कृपया विरथं कृत्वा नाहनद्धर्मवित्तया ७०
यश्च मायासहस्राणि ध्वंसयित्वा रणोत्कटम्
घटोत्कचं राक्षसेन्द्रं शक्रशक्त्याभिजघ्निवान् ७१
एतानि दिवसान्यस्य युद्धे भीतो धनंजयः
नागमद्द्वैरथं वीरः स कथं निहतो रणे ७२
रथसङ्गो न चेत्तस्य धनुर्वा न व्यशीर्यत
न चेदस्त्राणि निर्णेशुः स कथं निहतः परैः ७३
को हि शक्तो रणे कर्णं विधुन्वानं महद्धनुः
विमुञ्चन्तं शरान्घोरान्दिव्यान्यस्त्राणि चाहवे
जेतुं पुरुषशार्दूलं शार्दूलमिव वेगितम् ७४
ध्रुवं तस्य धनुश्छिन्नं रथो वापि गतो महीम्
अस्त्राणि वा प्रनष्टानि यथा शंससि मे हतम्
न ह्यन्यदनुपश्यामि कारणं तस्य नाशने ७५
न हन्यामर्जुनं यावत्तावत्पादौ न धावये
इति यस्य महाघोरं व्रतमासीन्महात्मनः ७६
यस्य भीतो रणे नित्यं धर्मराजो युधिष्ठिरः
त्रयोदश समा निद्रां न लेभे पुरुषर्षभः ७७
यस्य वीर्यवतो वीर्यं समाश्रित्य महात्मनः
मम पुत्रः सभां भार्यां पाण्डूनां नीतवान्बलात् ७८
तत्र चापि सभामध्ये पाण्डवानां च पश्यताम्
दासभार्येति पाञ्चालीमब्रवीत्कुरुसंसदि ७९
यश्चगाण्डीवमुक्तानां स्पर्शमुग्रमचिन्तयन्
अपतिर्ह्यसि कृष्णेति ब्रुवन्पार्थानवैक्षत ८०
यस्य नासीद्भयं पार्थैः सपुत्रैः सजनार्दनैः

स्वबाहुबलमाश्रित्य मुहूर्तमपि सञ्जय ८१
तस्य नाहं वधं मन्ये देवैरपि सवासवैः
प्रतीपमुपधावद्भिः किं पुनस्तात पाण्डवैः ८२
न हि ज्यां स्पृशमानस्य तलत्रे चापि गृह्णतः
पुमानाधिरथेः कश्चित्प्रमुखे स्थातुमर्हति ८३
अपि स्यान्मेदिनी हीना सोमसूर्यप्रभांशुभिः
न वधः पुरुषेन्द्रस्य समरेष्वपलायिनः ८४
यदि मन्दः सहायेन भ्रात्रा दुःशासनेन च
वासुदेवस्य दुर्बुद्धिः प्रत्याख्यानमरोचयत् ८५
स नूनमृषभस्कन्धं दृष्ट्वा कर्णं निपातितम्
दुःशासनं च निहतं मन्ये शोचति पुत्रकः ८६
हतं वैकर्तनं श्रुत्वा द्वैरथे सव्यसाचिना
जयतः पाण्डवान्दृष्ट्वा किंस्विद्दुर्योधनोऽब्रवीत् ८७
दुर्मर्षणं हतं श्रुत्वा वृषसेनं च संयुगे
प्रभग्नं च बलं दृष्ट्वा वध्यमानं महारथैः ८८
पराङ्मुखांस्तथा राज्ञः पलायनपरायणान्
विद्रुतान्रथिनो दृष्ट्वा मन्ये शोचति पुत्रकः ८९
अनेयश्चाभिमानेन बालबुद्धिरमर्षणः
हतोत्साहं बलं दृष्ट्वा किंस्विद्दुर्योधनोऽब्रवीत् ९०
भ्रातरं निहतं दृष्ट्वा भीमसेनेन संयुगे
रुधिरे पीयमानेन किंस्विद्दुर्योधनोऽब्रवीत् ९१
सह गान्धारराजेन सभायां यदभाषत
कर्णोऽर्जुनं रणे हन्ता हते तस्मिन्किमब्रवीत् ९२
द्यूतं कृत्वा पुरा हृष्टो वञ्चयित्वा च पाण्डवान्
शकुनिः सौबलस्तात हते कर्णे किमब्रवीत् ९३
कृतवर्मा महेष्वासः सात्वतानां महारथः
कर्णं विनिहतं दृष्ट्वा हार्दिक्यः किमभाषत ९४
ब्राह्मणाः क्षत्रिया वैश्या यस्य शिक्षामुपासते
धनुर्वेदं चिकीर्षन्तो द्रोण पुत्रस्य धीमतः ९५
युवा रूपेण संपन्नो दर्शनीयो महायशाः

अश्वत्थामा हते कर्णे किमभाषत सञ्जय ९६
आचार्यत्वं धनुर्वेदे गतः परमतत्त्ववित्
कृपः शारद्वतस्तात हते कर्णे किमब्रवीत् ९७
मद्रराजो महेष्वासः शल्यः समितिशोभनः
दिष्टं तेन हि तत्सर्वं यथा कर्णो निपातितः ९८
ये च केचन राजानः पृथिव्यां योद्धुमागताः
वैकर्तनं हतं दृष्ट्वा किमभाषन्त सञ्जय ९९
कर्णे तु निहते वीरे रथव्याघ्रे नरर्षभे
किं वो मुखमनीकानामासीत्सञ्जय भागशः १००
मद्रराजः कथं शल्यो नियुक्तो रथिनां वरः
वैकर्तनस्य सारथ्ये तन्ममाचक्ष्व सञ्जय १०१
केऽरक्षन्दक्षिणं चक्रं सूतपुत्रस्य संयुगे
वामं चक्रं ररक्षुर्वा के वा वीरस्य पृष्ठतः १०२
के कर्णं वाजहुः शूराः के क्षुद्राः प्राद्रवन्भयात्
कथं च वः समेतानां हतः कर्णो महारथः १०३
पाण्डवाश्च कथं शूराः प्रत्युदीयुर्महारथम्
सृजन्तं शरवर्षाणि वारिधारा इवाम्बुदम् १०४
स च सर्पमुखो दिव्यो महेषुप्रवरस्तदा
व्यर्थः कथं समभवत्तन्ममाचक्ष्व सञ्जय १०५
मामकस्यास्य सैन्यस्य हृतोत्सेधस्य सञ्जय
अवशेषं न पश्यामि ककुदे मृदिते सति १०६
तौ हि वीरौ महेष्वासौ मदर्थे कुरुसत्तमौ
भीष्मद्रोणौ हतौ श्रुत्वा को न्वर्थो जीवितेन मे १०७
न मृष्यामि च राधेयं हतमाहवशोभिनम्
यस्य बाह्वोर्बलं तुल्यं कुञ्जराणां शतं शतम् १०८
द्रोणे हते च यद्वृत्तं कौरवाणां परैः सह
संग्रामे नरवीराणां तन्ममाचक्ष्व सञ्जय १०९
यथा च कर्णः कौन्तेयैः सह युद्धमयोजयत्
यथा च द्विषतां हन्ता रणे शान्तस्तदुच्यताम् ११०

इति श्रीमहाभारते कर्णपर्वणि पञ्चमोऽध्यायः ५

षष्ठोऽध्यायः

सञ्जय उवाच
हते द्रोणे महेष्वासे तस्मिन्नहनि भारत
कृते च मोघसंकल्पे द्रोणपुत्रे महारथे १
द्रवमाणे महाराज कौरवाणां बले तथा
व्यूह्य पार्थः स्वकं सैन्यमतिष्ठद्भ्रातृभिः सह २
तमवस्थितमाज्ञाय पुत्रस्ते भरतर्षभ
द्रवच्च स्वबलं दृष्ट्वा पौरुषेण न्यवारयत् ३
स्वमनीकमवस्थाप्य बाहुवीर्ये व्यवस्थितः
युद्ध्वा च सुचिरं कालं पाण्डवैः सह भारत ४
लब्धलक्षैः परैर्हृष्टैर्व्यायच्छद्भिश्चिरं तदा
संध्याकालं समासाद्य प्रत्याहारमकारयत् ५
कृत्वावहारं सैन्यानां प्रविश्य शिबिरं स्वकम्
कुरवोऽत्महितं मन्त्रं मन्त्रयांचक्रिरे तदा ६
पर्यङ्केषु परार्ध्येषु स्पर्ध्यास्तरणवत्सु च
वरासनेषूपविष्टाः सुखशय्यास्विवामराः ७
ततो दुर्योधनो राजा साम्ना परमवल्गुना
तानाभाष्य महेष्वासान्प्राप्तकालमभाषत ८
मतिं मतिमतां श्रेष्ठाः सर्वे प्रब्रूत माचिरम्
एवं गते तु यत्कार्यं भवेत्कार्यकरं नृपाः ९
एवमुक्ते नरेन्द्रेण नरसिंहा युयुत्सवः
चक्रुर्नानाविधाश्चेष्टाः सिंहासनगतास्तदा १०
तेषां निशम्येङ्गितानि युद्धे प्राणाञ्जुहूषताम्
समुद्वीक्ष्य मुखं राज्ञो बालार्कसमवर्चसः
आचार्यपुत्रो मेधावी वाक्यज्ञो वाक्यमाददे ११
रागो योगस्तथा दाक्ष्यं नयश्चेत्यर्थसाधकाः
उपायाः पण्डितैः प्रोक्ताः सर्वे दैवसमाश्रिताः १२
लोकप्रवीरा येऽस्माकं देवकल्पा महारथाः
नीतिमन्तास्तथा युक्ता दक्षा रक्ताश्च ते हताः १३
न त्वेव कार्यं नैराश्यमस्माभिर्विजयं प्रति

सुनीतैरिह सर्वार्थैर्दैवमप्यनुलोम्यते १४
ते वयं प्रवरं नृणां सर्वैर्गुणगणैर्युतम्
कर्णं सेनापतिं कृत्वा प्रमथिष्यामहे रिपून् १५
ततो दुर्योधनः प्रीतः प्रियं श्रुत्वा वचस्तदा
प्रीतिसत्कारसंयुक्तं तथ्यमात्महितं शुभम् १६
स्वं मनः समवस्थाप्य बाहुवीर्यमुपाश्रितः
दुर्योधनो महाराज राधेयमिदमब्रवीत् १७
कर्ण जानामि ते वीर्यं सौहृदं च परं मयि
तथापि त्वां महाबाहो प्रवक्ष्यामि हितं वचः १८
श्रुत्वा यथेष्टं च कुरु वीर यत्तव रोचते
भवान्प्राज्ञतमो नित्यं मम चैव परा गतिः १९
भीष्मद्रोणावतिरथौ हतौ सेनापती मम
सेनापतिर्भवानस्तु ताभ्यां द्रविणवत्तरः २०
वृद्धौ च तौ महेष्वासौ सापेक्षौ च धनंजये
मानितौ च मया वीरौ राधेय वचनात्तव २१
पितामहत्वं संप्रेक्ष्य पाण्डुपुत्रा महारणे
रक्षितास्तात भीष्मेण दिवसानि दशैव ह २२
न्यस्तशस्त्रे न भवति हतो भीष्मः पितामहः
शिखण्डिनं पुरस्कृत्य फल्गुनेन महाहवे २३
हते तस्मिन्महाभागे शरतल्पगते तदा
त्वयोक्ते पुरुषव्याघ्र द्रोणो ह्यासीत्पुरःसरः २४
तेनापि रक्षिताः पार्थाः शिष्यत्वादिह संयुगे
स चापि निहतो वृद्धो धृष्टद्युम्नेन सत्वरम् २५
निहताभ्यां प्रधानाभ्यां ताभ्याममितविक्रम
त्वत्समं समरे योधं नान्यं पश्यामि चिन्तयन् २६
भवानेव तु नः शक्तो विजयाय न संशयः
पूर्वं मध्ये च पश्चाच्च तवैव विदितं हि तत् २७
स भवान्धुर्यवत्संख्ये धुरमुद्वोढुमर्हसि
अभिषेचय सेनान्ये स्वयमात्मानमात्मना २८
देवतानां यथा स्कन्दः सेनानीः प्रभुरव्ययः

तथा भवानिमां सेनां धार्तराष्ट्रीं बिभर्तु मे
जहि शत्रुगणान्सर्वान्महेन्द्र इव दानवान् २९
अवस्थितं रणे ज्ञात्वा पाण्डवास्त्वां महारथम्
द्रविष्यन्ति सपाञ्चाला विष्णुं दृष्ट्वेव दानवाः
तस्मात्त्वं पुरुषव्याघ्र प्रकर्षेथा महाचमूम् ३०
भवत्यवस्थिते यत्ते पाण्डवा गतचेतसः
भविष्यन्ति सहामात्याः पाञ्चालैः सृञ्जयैः सह ३१
यथा ह्यभ्युदितः सूर्यः प्रतपन्स्वेन तेजसा
व्यपोहति तमस्तीव्रं तथा शत्रून्व्यपोह नः ३२
कर्ण उवाच
उक्तमेतन्मया पूर्वं गान्धारे तव संनिधौ
जेष्यामि पाण्डवान्राजन्सपुत्रान्सजनार्दनान् ३३
सेनापतिर्भविष्यामि तवाहं नात्र संशयः
स्थिरो भव महाराज जितान्विद्धि च पाण्डवान् ३४
सञ्जय उवाच
एवमुक्तो महातेजास्ततो दुर्योधनो नृपः
उत्तस्थौ राजभिः सार्धं देवैरिव शतक्रतुः
सेनापत्येन सत्कर्तुं कर्णं स्कन्दमिवामराः ३५
ततोऽभिषिषिचुस्तूर्णं विधिदृष्टेन कर्मणा
दुर्योधनमुखा राजन्राजानो विजयैषिणः
शातकौम्भमयैः कुम्भैर्माहेयैश्चाभिमन्त्रितैः ३६
तोयपूर्णैर्विषाणैश्च द्वीपिखड्गमहर्षभैः
मणिमुक्तामयैश्चान्यैः पुण्यगन्धैस्तथौषधैः ३७
औदुम्बरे समासीनमासने क्षौमसंवृतम्
शास्त्रदृष्टेन विधिना संभारैश्च सुसंभृतैः ३८
जय पार्थान्सगोविन्दान्सानुगांस्त्वं महाहवे
इति तं बन्दिनः प्राहुर्द्विजाश्च भरतर्षभ ३९
जहि पार्थान्सपाञ्चालान्राधेय विजयाय नः
उद्यन्निव सदा भानुस्तमांस्युग्रैर्गभस्तिभिः ४०
न ह्यलं त्वद्विसृष्टानां शराणां ते सकेशवाः

कृतघ्नाः सूर्यरश्मीनां ज्वलतामिव दर्शने ४१
न हि पार्थाः सपाञ्चालाः स्थातुं शक्तास्तवाग्रतः
आत्तशस्त्रस्य समरे महेन्द्रस्येव दानवाः ४२
अभिषिक्तस्तु राधेयः प्रभया सोऽमितप्रभः
व्यत्यरिच्यत रूपेण दिवाकर इवापरः ४३
सेनापत्येन राधेयमभिषिच्य सुतस्तव
अमन्यत तदात्मानं कृतार्थं कालचोदितः ४४
कर्णोऽपि राजन्संप्राप्य सेनापत्यमरिंदमः
योगमाज्ञापयामास सूर्यस्योदयनं प्रति ४५
तव पुत्रैर्वृतः कर्णः शुशुभे तत्र भारत
देवैरिव यथा स्कन्दः संग्रामे तारकामये ४६
इति श्रीमहाभारते कर्णपर्वणि षष्ठोऽध्यायः ६

सप्तमोऽध्यायः

धृतराष्ट्र उवाच
सेनापत्यं तु संप्राप्य कर्णो वैकर्तनस्तदा
तथोक्तश्च स्वयं राज्ञा स्निग्धं भ्रातृसमं वचः १
योगमाज्ञाप्य सेनाया आदित्येऽभ्युदिते तदा
अकरोत्किं महाप्राज्ञस्तन्ममाचक्ष्व सञ्जय २
सञ्जय उवाच
कर्णस्य मतमाज्ञाय पुत्रस्ते भरतर्षभ
योगमाज्ञापयामास नान्दीतूर्यपुरः सरम् ३
महत्यपररात्रे तु तव पुत्रस्य मारिष
योगो योगेति सहसा प्रादुरासीन्महास्वनः ४
नागानां कल्पमानानां रथानां च वरूथिनाम्
संनह्यतां पदातीनां वाजिनां च विशां पते ५
क्रोशतां चापि योधानां त्वरितानां परस्परम्
बभूव तुमुलः शब्दो दिवस्पृक्सुमहांस्तदा ६
ततः श्वेतपताकेन बालार्काकारवाजिना
हेमपृष्ठेन धनुषा हस्तिकक्ष्येण केतुना ७

तूणेन शरपूर्णेन साङ्गदेन वरूथिना
शतघ्नीकिङ्किणीशक्तिशूलतोमरधारिणा ८
कार्मुकेणोपपन्नेन विमलादित्यवर्चसा
रथेनातिपताकेन सूतपुत्रो व्यदृश्यत ९
धमन्तं वारिजं तात हेमजालविभूषितम्
विधुन्वानं महच्चापं कार्तस्वरविभूषितम् १०
दृष्ट्वा कर्णं महेष्वासं रथस्थं रथिनां वरम्
भानुमन्तमिवोद्यन्तं तमो घ्नन्तं सहस्रशः ११
न भीष्मव्यसनं केचिन्नापि द्रोणस्य मारिष
नान्येषां पुरुषव्याघ्र मेनिरे तत्र कौरवाः १२
ततस्तु त्वरयन्योधाञ्शङ्खशब्देन मारिष
कर्णो निष्कासयामास कौरवाणां वरूथिनीम् १३
व्यूहं व्यूह्य महेष्वासो माकरं शत्रुतापनः
प्रत्युद्ययौ तथा कर्णः पाण्डवान्विजिगीषया १४
मकरस्य तु तुण्डे वै कर्णो राजन्व्यवस्थितः
नेत्राभ्यां शकुनिः शूर उलूकश्च महारथः १५
द्रोणपुत्रस्तु शिरसि ग्रीवायां सर्वसोदराः
मध्ये दुर्योधनो राजा बलेन महता वृतः १६
वामे पादे तु राजेन्द्र कृतवर्मा व्यवस्थितः
नारायणबलैर्युक्तो गोपालैर्युद्धदुर्मदः १७
पादे तु दक्षिणे राजन्गौतमः सत्यविक्रमः
त्रिगर्तैश्च महेष्वासैर्दाक्षिणात्यैश्च संवृतः १८
अनुपादस्तु यो वामस्तत्र शल्यो व्यवस्थितः
महत्या सेनया सार्धं मद्रदेशसमुत्थया १९
दक्षिणे तु महाराज सुषेणः सत्यसंगरः
वृतो रथसहस्रैश्च दन्तिनां च शतैस्तथा २०
पुच्छे आस्तां महावीरौ भ्रातरौ पार्थिवौ तदा
चित्रसेनश्च चित्रश्च महत्या सेनया वृतौ २१
ततः प्रयाते राजेन्द्र कर्णे नरवरोत्तमे
धनंजयमभिप्रेक्ष्य धर्मराजोऽब्रवीदिदम् २२

पश्य पार्थ महासेनां धार्तराष्ट्रस्य संयुगे
कर्णेन निर्मितां वीर गुप्तां वीरैर्महारथैः २३
हतवीरतमा ह्येषा धार्तराष्ट्री महाचमूः
फल्गुशेषा महाबाहो तृणैस्तुल्या मता मम २४
एको ह्यत्र महेष्वासः सूतपुत्रो व्यवस्थितः
सदेवासुरगन्धर्वैः सकिन्नरमहोरगैः
चराचरैस्त्रिभिर्लोकैर्योऽजय्यो रथिनां वरः २५
तं हत्वाद्य महाबाहो विजयस्तव फल्गुन
उद्धृतश्च भवेच्छल्यो मम द्वादशवार्षिकः
एवं ज्ञात्वा महाबाहो व्यूहं व्यूह यथेच्छसि २६
भ्रातुस्तद्वचनं श्रुत्वा पाण्डवः श्वेतवाहनः
अर्धचन्द्रेण व्यूहेन प्रत्यव्यूहत तां चमूम् २७
वामपार्श्वेऽभवद्राजन्भीमसेनो व्यवस्थितः
दक्षिणे च महेष्वासो धृष्टद्युम्नो महाबलः २८
मध्ये व्यूहस्य साक्षात्तु पाण्डवः कृष्णसारथिः
नकुलः सहदेवश्च धर्मराजश्च पृष्ठतः २९
चक्ररक्षौ तु पाञ्चाल्यौ युधामन्यूत्तमौजसौ
नार्जुनं जहतुर्युद्धे पाल्यमानौ किरीटिना ३०
शेषा नृपतयो वीराः स्थिता व्यूहस्य दंशिताः
यथाभावं यथोत्साहं यथासत्त्वं च भारत ३१
एवमेतन्महाव्यूहं व्यूह्य भारत पाण्डवाः
तावकाश्च महेष्वासा युद्धायैव मनो दधुः ३२
दृष्ट्वा व्यूढां तव चमूं सूतपुत्रेण संयुगे
निहतान्पाण्डवान्मेने तव पुत्रः सहान्वयः ३३
तथैव पाण्डवीं सेनां व्यूढां दृष्ट्वा युधिष्ठिरः
धार्तराष्ट्रान्हतान्मेने सकर्णान्वै जनाधिप ३४
ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः
सहसैवाभ्यहन्यन्त सशब्दाश्च समन्ततः ३५
सेनयोरुभयो राजन्प्रावाद्यन्त महास्वनाः
सिंहनादश्च संजज्ञे शूराणां जयगृद्धिनाम् ३६

हयहेषितशब्दाश्च वारणानां च बृंहितम्
रथनेमिस्वनाश्चोग्राः संबभूवुर्जनाधिप ३७
न द्रोणव्यसनं कश्चिज्जानीते भरतर्षभ
दृष्ट्वा कर्णं महेष्वासं मुखे व्यूहस्य दंशितम् ३८
उभे सेने महासत्त्वे प्रहृष्टनरकुञ्जरे
योद्धुकामे स्थिते राजन्हन्तुमन्योन्यमञ्जसा ३९
तत्र यत्तौ सुसंरब्धौ दृष्ट्वान्योन्यं व्यवस्थितौ
अनीकमध्ये राजेन्द्र रेजतुः कर्णपाण्डवौ ४०
नृत्यमाने तु ते सेने समेयातां परस्परम्
तयोः पक्षैः प्रपक्षैश्च निर्जग्मुर्वै युयुत्सवः ४१
ततः प्रववृते युद्धं नरवारणवाजिनाम्
रथिनां च महाराज अन्योन्यं निघ्नतां दृढम् ४२
इति श्रीमहाभारते कर्णपर्वणि सप्तमोऽध्यायः

अष्टमोऽध्यायः

सञ्जय उवाच
ते सेनेऽन्योन्यमासाद्य प्रहृष्टाश्वनरद्विपे
बृहत्यौ संप्रजह्लाते देवासुरचमूपमे १
ततो गजा रथाश्चाश्वाः पत्तयश्च महाहवे
संप्रहारं परं चक्रुर्देहपाप्मप्रणाशनम् २
पूर्णचन्द्रार्कपद्मानां कान्तित्विड्गन्धतः समैः
उत्तमाङ्गैर्नृसिंहानां नृसिंहास्तस्तरुर्महीम् ३
अर्धचन्द्रैस्तथा भल्लैः क्षुरप्रैरसिपट्टिशैः
परश्वधैश्चाप्य कृन्तन्नुत्तमाङ्गानि युध्यताम् ४
व्यायतायतबाहूनां व्यायतायतबाहुभिः
व्यायता बाहवः पेतुश्छिन्नमुष्ट्यायुधाङ्गदाः ५
तैः स्फुरद्भिर्मही भाति रक्ताङ्गुलितलैस्तदा
गरुडप्रहतैरुग्रैः पञ्चास्यैरिव पन्नगैः ६
हयस्यन्दननागेभ्यः पेतुर्वीरा द्विषद्धताः
विमानेभ्यो यथा क्षीणे पुण्ये स्वर्गसदस्तथा ७

गदाभिरन्यैर्गुर्वीभिः परिघैर्मुसलैरपि
पोथिताः शतशः पेतुर्वीरा वीरतरै रणे ८
रथा रथैर्विनिहता मत्ता मत्तैर्द्विपैर्द्विपाः
सादिनः सादिभिश्चैव तस्मिन्परमसंकुले ९
रथा वररथैर्नागैरश्वारोहाश्च पत्तिभिः
अश्वारोहैः पदाताश्च निहता युधि शेरते १०
रथाश्वपत्तयो नागै रथैर्नागाश्च पत्तयः
रथपत्तिद्विपाश्चाश्वैर्नृभिश्चाश्वरथद्विपाः ११
रथाश्वेभनराणां च नराश्वेभरथैः कृतम्
पाणिपादैश्च शस्त्रैश्च रथैश्च कदनं महत् १२
तथा तस्मिन्बले शूरैर्वध्यमाने हतेऽपि च
अस्मानभ्यागमन्पार्था वृकोदरपुरोगमाः १३
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाः प्रभद्रकाः
सात्यकिश्चेकितानश्च द्रविडैः सैनिकैः सह १४
भृता वित्तेन महता पाण्ड्याश्चौड्राः सकेरलाः
व्यूढोरस्का दीर्घभुजाः प्रांशवः प्रियदर्शनाः १५
आपीडिनो रक्तदन्ता मत्तमातङ्गविक्रमाः
नानाविरागवसना गन्धचूर्णावचूर्णिताः १६
बद्धासयः पाशहस्ता वारणप्रतिवारणाः
समानमृत्यवो राजन्ननीकस्थाः परस्परम् १७
कलापिनश्चापहस्ता दीर्घकेशाः प्रियाहवाः
पत्तयः सात्यकेरन्ध्रा घोररूपपराक्रमाः १८
अथापरे पुनः शूराश्चेदिपाञ्चालकेकयाः
करूषाः कोसलाः काश्या मागधाश्चापि दुद्रुवुः १९
तेषां रथाश्च नागाश्च प्रवराश्चापि पत्तयः
नानाविधरवैर्हृष्टा नृत्यन्ति च हसन्ति च २०
तस्य सैन्यस्य महतो महामात्रवरैर्वृतः
मध्यं वृकोदरोऽभ्यागात्त्वदीयं नागधूर्गतः २१
स नागप्रवरोऽत्युग्रो विधिवत्कल्पितो बभौ
उदयाद्र्यग्र्यभवनं यथाभ्युदितभास्करम् २२

तस्यायसं वर्मवरं वररत्नविभूषितम्
तारोद्भासस्य नभसः शारदस्य समत्विषम् २३
स तोमरप्रासकरश्चारुमौलि स्वलंकृतः
चरन्मध्यंदिनार्काभस्तेजसा व्यदहद्रिपून् २४
तं दृष्ट्वा द्विरदं दूरात्क्षेमधूर्तिर्द्विपस्थितः
आह्वयानोऽभिदुद्राव प्रमनाः प्रमनस्तरम् २५
तयोः समभवद्युद्धं द्विपयोरुग्ररूपयोः
यदृच्छया द्रुमवतोर्महापर्वतयोरिव २६
संसक्तनागौ तौ वीरौ तोमरैरितरेतरम्
बलवत्सूर्यरश्म्याभैर्भित्त्वा भित्त्वा विनेदतुः २७
व्यपसृत्य तु नागाभ्यां मण्डलानि विचेरतुः
प्रगृह्य चैव धनुषी जघ्नतुर्वै परस्परम् २८
क्ष्वेडितास्फोटितरवैर्बाणशब्दैश्च सर्वशः
तौ जनान्हर्षयित्वा च सिंहनादान्प्रचक्रतुः २९
समुद्यतकराभ्यां तौ द्विपाभ्यां कृतिनावुभौ
वातोद्धूतपताकाभ्यां युयुधाते महाबलौ ३०
तावन्योन्यस्य धनुषी छित्त्वान्योन्यं विनेदतुः
शक्तितोमरवर्षेण प्रावृण्मेघाविवाम्बुभिः ३१
क्षेमधूर्तिस्तदा भीमं तोमरेण स्तनान्तरे
निर्बिभेद तु वेगेन षड्भिश्चाप्यपरैर्नदन् ३२
स भीमसेनः शुशुभे तोमरैरङ्गमाश्रितैः
क्रोधदीप्तवपुर्मेघैः सप्तसप्तिरिवांशुमान् ३३
ततो भास्करवर्णाभमञ्जोगतिमयस्मयम्
ससर्ज तोमरं भीमः प्रत्यमित्राय यत्नवान् ३४
ततः कुलूताधिपतिश्चापमायम्य सायकैः
दशभिस्तोमरं छित्त्वा शक्त्या विव्याध पाण्डवम् ३५
अथ कार्मुकमादाय महाजलदनिस्वनम्
रिपोरभ्यर्दयन्नागमुन्मदः पाण्डवः शरैः ३६
स शरौघार्दितो नागो भीमसेनेन संयुगे
निगृह्यमाणो नातिष्ठद्वातध्वस्त इवाम्बुदः ३७

तमभ्यधावद्द्विरदं भीमसेनस्य नागराट्
महावातेरितं मेघं वातोद्धूत इवाम्बुदः ३८
संनिवर्त्यात्मनो नागं क्षेमधूर्तिः प्रयत्नतः
विव्याधाभिद्रुतं बाणैर्भीमसेनं सकुञ्जरम् ३९
ततः साधुविसृष्टेन क्षुरेण पुरुषर्षभः
छित्त्वा शरासनं शत्रोर्नागमामित्रमार्दयत् ४०
ततः खजाकया भीमं क्षेमधूर्तिः पराभिनत्
जघान चास्य द्विरदं नाराचैः सर्वमर्मसु ४१
पुरा नागस्य पतनादवप्लुत्य स्थितो महीम्
भीमसेनो रिपोर्नागं गदया समपोथयत् ४२
तस्मात्प्रमथितान्नागात्क्षेमधूर्तिमवद्रुतम्
उद्यतासिमुपायान्तं गदयाहन्वृकोदरः ४३
स पपात हतः सासिर्व्यसुः स्वमभितो द्विपम्
वज्रप्रुरुग्णमचलं सिंहो वज्रहतो यथा ४४
निहतं नृपतिं दृष्ट्वा कुलूतानां यशस्करम्
प्राद्रवद्व्यथिता सेना त्वदीया भरतर्षभ ४५
इति श्रीमहाभारते कर्णपर्वणि अष्टमोऽध्यायः ८

नवमोऽध्यायः

सञ्जय उवाच
ततः कर्णो महेष्वासः पाण्डवानामनीकिनीम्
जघान समरे शूरः शरैः संनतपर्वभिः १
तथैव पाण्डवा राजंस्तव पुत्रस्य वाहिनीम्
कर्णस्य प्रमुखे क्रुद्धा विनिजघ्नुर्महारथाः २
कर्णो राजन्महाबाहुर्न्यवधीत्पाण्डवीं चमूम्
नाराचैरर्करश्म्याभैः कर्मारपरिमार्जितैः ३
तत्र भारत कर्णेन नाराचैस्ताडिता गजाः
नेदुः सेदुश्च मम्लुश्च बभ्रमुश्च दिशो दश ४
वध्यमाने बले तस्मिन्सूतपुत्रेण मारिष
नकुलोऽभ्यद्रवत्तूर्णं सूतपुत्रं महारणे ५

भीमसेनस्तथा द्रौणिं कुर्वाणं कर्म दुष्करम्
विन्दानुविन्दौ कैकेयौ सात्यकिः समवारयत् ६
श्रुतकर्माणमायान्तं चित्रसेनो महीपतिः
प्रतिविन्ध्यं तथा चित्रश्चित्रकेतनकार्मुकः ७
दुर्योधनस्तु राजानं धर्मपुत्रं युधिष्ठिरम्
संशप्तकगणान्क्रुद्धो अभ्यधावद्धनंजयः ८
धृष्टद्युम्नः कृपं चाथ तस्मिन्वीरवरक्षये
शिखण्डी कृतवर्माणं समासादयदच्युतम् ९
श्रुतकीर्तिस्तथा शल्यं माद्रीपुत्रः सुतं तव
दुःशासनं महाराज सहदेवः प्रतापवान् १०
केकयौ सात्यकिं युद्धे शरवर्षेण भास्वता
सात्यकिः केकयौ चैव छादयामास भारत ११
तावेनं भ्रातरौ वीरं जघ्नतुर्हृदये भृशम्
विषाणाभ्यां यथा नागौ प्रतिनागं महाहवे १२
शरसंभिन्नवर्माणौ तावुभौ भ्रातरौ रणे
सात्यकिं सत्यकर्माणं राजन्विव्यधतुः शरैः १३
तौ सात्यकिर्महाराज प्रहसन्सर्वतोदिशम्
छादयञ्शरवर्षेण वारयामास भारत १४
वार्यमाणौ ततस्तौ तु शैनेयशरवृष्टिभिः
शैनेयस्य रथं तूर्णं छादयामासतुः शरैः १५
तयोस्तु धनुषी चित्रे छित्त्वा शौरिर्महाहवे
अथ तौ सायकैस्तीक्ष्णैश्छादयामास दुःसहैः १६
अथान्ये धनुषी मृष्टे प्रगृह्य च महाशरान्
सात्यकिं पूरयन्तौ तौ चेरतुर्लघु सुष्ठु च १७
ताभ्यां मुक्ता महाबाणाः कङ्कबर्हिणवाससः
द्योतयन्तो दिशः सर्वाः संपेतुः स्वर्णभूषणाः १८
बाणान्धकारमभवत्तयो राजन्महाहवे
अन्योन्यस्य धनुश्चैव चिच्छिदुस्ते महारथाः १९
ततः क्रुद्धो महाराज सात्वतो युद्धदुर्मदः
धनुरन्यत्समादाय सज्यं कृत्वा च संयुगे

क्षुरप्रेण सुतीक्ष्णेन अनुविन्दशिरोऽहरत् २०
तच्छिरो न्यपतद्भूमौ कुण्डलोत्पीडितं महत्
शम्बरस्य शिरो यद्वन्निहतस्य महारणे
शोषयन्केकयान्सर्वाञ्जगामाशु वसुंधराम् २१
तं दृष्ट्वा निहतं शूरं भ्राता तस्य महारथः
सज्यमन्यद्धनुः कृत्वा शैनेयं प्रत्यवारयत् २२
स शक्त्या सात्यकिं विद्ध्वा स्वर्णपुङ्खैः शिलाशितैः
ननाद बलवन्नादं तिष्ठ तिष्ठेति चाब्रवीत् २३
स सात्यकिं पुनः क्रुद्धः केकयानां महारथः
शरैरग्निशिखाकारैर्बाह्वोरुरसि चार्दयत् २४
स शरैः क्षतसर्वाङ्गः सात्वतः सत्त्वकोविदः
रराज समरे राजन्सपत्र इव किंशुकः २५
सात्यकिः समरे विद्धः केकयेन महात्मना
केकयं पञ्चविंशत्या विव्याध प्रहसन्निव २६
शतचन्द्रचिते गृह्य चर्मणी सुभुजौ तु तौ
व्यरोचेतां महारङ्गे निस्त्रिंशवरधारिणौ
यथा देवासुरे युद्धे जम्भशक्रौ महाबलौ २७
मण्डलानि ततस्तौ च विचरन्तौ महारणे
अन्योन्यमसिभिस्तूर्णं समाजघ्नतुराहवे २८
केकयस्य ततश्चर्म द्विधा चिच्छेद सात्वतः
सात्यकेश्च तथैवासौ चर्म चिच्छेद पार्थिवः २९
चर्म च्छित्त्वा तु कैकेयस्तारागणशतैर्वृतम्
चचार मण्डलान्येव गतप्रत्यागतानि च ३०
तं चरन्तं महारङ्गे निस्त्रिंशवरधारिणम्
अपहस्तेन चिच्छेद शैनेयस्त्वरयान्वितः ३१
सवर्मा केकयो राजन्द्विधा छिन्नो महाहवे
निपपात महेष्वासो वज्रनुन्न इवाचलः ३२
तं निहत्य रणे शूरः शैनेयो रथसत्तमः
युधामन्यो रथं तूर्णमारुरोह परंतपः ३३
ततोऽन्य रथमास्थाय विधिवत्कल्पितं पुनः

केकयानां महत्सैन्यं व्यधमत्सात्यकिः शरैः ३४
सा वध्यमाना समरे केकयस्य महाचमूः
तमुत्सृज्य रथं शत्रुं प्रदुद्राव दिशो दश ३५
इति श्रीमहाभारते कर्णपर्वणि नवमोऽध्यायः ९

दशमोऽध्यायः

सञ्जय उवाच
श्रुतकर्मा महाराज चित्रसेनं महीपतिम्
आजघ्ने समरे क्रुद्धः पञ्चाशद्भिः शिलीमुखैः १
अभिसारस्तु तं राजा नवभिर्निशितैः शरैः
श्रुतकर्माणमाहत्य सूतं विव्याध पञ्चभिः २
श्रुतकर्मा ततः क्रुद्धश्चित्रसेनं चमूमुखे
नाराचेन सुतीक्ष्णेन मर्मदेशे समर्दयत् ३
एतस्मिन्नन्तरे चैनं श्रुतकीर्तिर्महायशाः
नवत्या जगतीपालं छादयामास पत्रिभिः ४
प्रतिलभ्य ततः संज्ञां चित्रसेनो महारथः
धनुश्चिच्छेद भल्लेन तं च विव्याध सप्तभिः ५
सोऽन्यत्कार्मुकमादाय वेगघ्नं रुक्मभूषणम्
चित्ररूपतरं चक्रे चित्रसेनं शरोर्मिभिः ६
स शरैश्चित्रितो राजंश्चित्रमाल्यधरो युवा
युवेव समशोभत्स गोष्ठीमध्ये स्वलंकृतः ७
श्रुतकर्माणमथ वै नाराचेन स्तनान्तरे
बिभेद समरे क्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ८
श्रुतकर्मापि समरे नराचेन समर्दितः
सुस्राव रुधिरं भूरि गैरिकाम्भ इवाचलः ९
ततः स रुधिराक्ताङ्गो रुधिरेण कृतच्छविः
रराज समरे राजन्सपुष्प इव किंशुकः १०
श्रुतकर्मा ततो राजञ्शत्रूणां समभिद्रुतः
शत्रुसंवरणं कृत्वा द्विधा चिच्छेद कार्मुकम् ११
अथैनं छिन्नधन्वानं नाराचानां त्रिभिः शतैः

विव्याध भरतश्रेष्ठ श्रुतकर्मा महायशाः १२
ततोऽपरेण भल्लेन भृशं तीक्ष्णेन सत्वरः
जहार सशिरस्त्राणं शिरस्तस्य महात्मनः १३
तच्छिरो न्यपतद्भूमौ सुमहच्चित्रवर्मणः
यदृच्छया यथा चन्द्रश्च्युतः स्वर्गान्महीतले १४
राजानं निहतं दृष्ट्वा अभिसारं च मारिष
अभ्यद्रवन्त वेगेन चित्रसेनस्य सैनिकाः १५
ततः क्रुद्धो महेष्वासस्तत्सैन्यं प्राद्रवच्छरैः
अन्तकाले यथा क्रुद्धः सर्वभूतानि प्रेतराट्
द्रावयन्निषुभिस्तूर्णं श्रुतकर्मा व्यरोचत १६
प्रतिविन्ध्यस्ततश्चित्रं भित्त्वा पञ्चभिराशुगैः
सारथिं त्रिभिरानर्च्छद्ध्वजमेकेषुणा ततः १७
तं चित्रो नवभिर्भल्लैर्बाह्वोरुरसि चार्दयत्
स्वर्णपुङ्खैः शीलाधौतैः कङ्कबर्हिणवाजितैः १८
प्रतिविन्ध्यो धनुस्तस्य छित्त्वा भारत सायकैः
पञ्चभिर्निशितैर्बाणैरथैनं स्त्रंपजघ्निवान् १९
ततः शक्तिं महाराज हेमदण्डां दुरासदाम्
प्राहिणोत्तव पुत्राय घोरामग्निशिखामिव २०
तामापतन्तीं सहसा शक्तिमुल्कामिवाम्बरात्
द्विधा चिच्छेद समरे प्रतिविन्ध्यो हसन्निव २१
सा पपात तदा छिन्ना प्रतिविन्ध्यशरैः शितैः
युगान्ते सर्वभूतानि त्रासयन्ती यथाशनिः २२
शक्तिं तां प्रहतां दृष्ट्वा चित्रो गृह्य महागदाम्
प्रतिविन्ध्याय चिक्षेप रुक्मजालविभूषिताम् २३
सा जघान हयांस्तस्य सारथिं च महारणे
रथं प्रमृद्य वेगेन धरणीमन्वपद्यत २४
एतस्मिन्नेव काले तु रथादाप्लुत्य भारत
शक्तिं चिक्षेप चित्राय स्वर्णघण्टामलंकृताम् २५
तामापतन्तीं जग्राह चित्रो राजन्महामनाः
ततस्तामेव चिक्षेप प्रतिविन्ध्याय भारत २६

समासाद्य रणे शूरं प्रतिविन्ध्यं महाप्रभा
निर्भिद्य दक्षिणं बाहुं निपपात महीतले
पतिताभासयच्चैव तं देशमशनिर्यथा २७
प्रतिविन्ध्यस्ततो राजंस्तोमरं हेमभूषितम्
प्रेषयामास संक्रुद्धश्चित्रस्य वधकाम्यया २८
स तस्य देहावरणं भित्त्वा हृदयमेव च
जगाम धरणीं तूर्णं महोरग इवाशयम् २९
स पपात तदा राजंस्तोमरेण समाहतः
प्रसार्य विपुलौ बाहू पीनौ परिघसंनिभौ ३०
चित्रं संप्रेक्ष्य निहतं तावका रणशोभिनः
अभ्यद्रवन्त वेगेन प्रतिविन्ध्यं समन्ततः ३१
सृजन्तो विविधान्बाणाञ्शतघ्नीश्च सकिङ्किणीः
त एनं छादयामासुः सूर्यमभ्रगणा इव ३२
तानपास्य महाबाहुः शरजालेन संयुगे
व्यद्रावयत्तव चमूं वज्रहस्त इवासुरीम् ३३
ते वध्यमानाः समरे तावकाः पाण्डवैर्नृप
विप्रकीर्यन्त सहसा वातनुन्ना घना इव ३४
विप्रद्रुते बले तस्मिन्वध्यमाने समन्ततः
द्रौणिरेकोऽभ्ययात्तूर्णं भीमसेनं महाबलम् ३५
ततः समागमो घोरो बभूव सहसा तयोः
यथा देवासुरे युद्धे वृत्रवासवयोरभूत् ३६
इति श्रीमहाभारते कर्णपर्वणि दशमोऽध्यायः १०

एकादशोऽध्यायः

सञ्जय उवाच
भीमसेनं ततो द्रौणी राजन्विव्याध पत्रिणा
त्वरया परया युक्तो दर्शयन्नस्त्रलाघवम् १
अथैनं पुनराजघ्ने नवत्या निशितैः शरैः
सर्वमर्माणि संप्रेक्ष्य मर्मज्ञो लघुहस्तवत् २
भीमसेनः समाकीर्णो द्रौणिना निशितैः शरैः

रराज समरे राजन्रश्मिवानिव भास्करः ३
ततः शरसहस्रेण सुप्रयुक्तेन पाण्डवः
द्रोणपुत्रमवच्छाद्य सिंहनादममुञ्चत ४
शरैः शरांस्ततो द्रौणिः संवार्य युधि पाण्डवम्
ललाटेऽभ्यहनद्राजन्नाराचेन स्मयन्निव ५
ललाटस्थं ततो बाणं धारयामास पाण्डवः
यथा शृङ्गं वने दृप्तः खड्गो धारयते नृप ६
ततो द्रौणिं रणे भीमो यतमानं पराक्रमी
त्रिभिर्विव्याध नाराचैर्ललाटे विस्मयन्निव ७
ललाटस्थैस्ततो बाणैर्ब्राह्मणः स व्यरोचत
प्रावृषीव यथा सिक्तस्त्रिशृङ्गः पर्वतोत्तमः ८
ततः शरशतैर्द्रौणिमर्दयामास पाण्डवः
न चैनं कम्पयामास मातरिश्वेव पर्वतम् ९
तथैव पाण्डवं युद्धे द्रौणिः शरशतैः शितैः
नाकम्पयत संहृष्टो वार्योघ इव पर्वतम् १०
तावन्योन्यं शरैर्घोरैश्छादयानौ महारथौ
रथचर्यागतौ शूरौ शुशुभाते रणोत्कटौ ११
आदित्याविव संदीप्तौ लोकक्षयकरावुभौ
स्वरश्मिभिरिवान्योन्यं तापयन्तौ शरोत्तमैः १२
कृतप्रतिकृते यत्नं कुर्वाणौ च महारणे
कृतप्रतिकृते यत्नं चक्राते तावभीतवत् १३
व्याघ्राविव च संग्रामे चेरतुस्तौ महारथौ
शरदंष्ट्रौ दुराधर्षौ चापव्यात्तौ भयानकौ १४
अभूतां तावदृश्यौ च शरजालैः समन्ततः
मेघजालैरिव च्छन्नौ गगने चन्द्रभास्करौ १५
प्रकाशौ च मुहूर्तेन तत्रैवास्तामरिंदमौ
विमुक्तौ मेघजालेन शशिसूर्यौ यथा दिवि १६
अपसव्यं ततश्चक्रे द्रौणिस्तत्र वृकोदरम्
किरञ्शरशतैरुग्रैर्धाराभिरिव पर्वतम् १७
न तु तन्ममृषे भीमः शत्रोर्विजयलक्षणम्

प्रतिचक्रे च तं राजन्पाण्डवोऽप्यपसव्यतः १८
मण्डलानां विभागेषु गतप्रत्यागतेषु च
बभूव तुमुलं युद्धं तयोस्तत्र महामृधे १९
चरित्वा विविधान्मार्गान्मण्डलं स्थानमेव च
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः २०
अन्योन्यस्य वधे यत्नं चक्रतुस्तौ महारथौ
ईषतुर्विरथं चैव कर्तुमन्योन्यमाहवे २१
ततो द्रौणिर्महास्त्राणि प्रादुश्चक्रे महारथः
तान्यस्त्रैरेव समरे प्रतिजघ्नेऽस्य पाण्डवः २२
ततो घोरं महाराज अस्त्रयुद्धमवर्तत
ग्रहयुद्धं यथा घोरं प्रजासंहरणे अभूत् २३
ते बाणाः समसज्जन्त क्षिप्तास्ताभ्यां तु भारत
द्योतयन्तो दिशः सर्वास्तच्च सैन्यं समन्ततः २४
बाणसंघावृतं घोरमाकाशं समपद्यत
उल्कापातकृतं यद्वत्प्रजानां संक्षये नृप २५
बाणाभिघातात्संजज्ञे तत्र भारत पावकः
सविस्फुलिङ्गो दीप्तार्चिः सोऽदहद्वाहिनीद्वयम् २६
तत्र सिद्धा महाराज संपतन्तोऽब्रुवन्वचः
अति युद्धानि सर्वाणि युद्धमेतत्ततोऽधिकम् २७
सर्वयुद्धानि चैतस्य कलां नार्हन्ति षोडशीम्
नैतादृशं पुनर्युद्धं न भूतं न भविष्यति २८
अहो ज्ञानेन संयुक्तावुभौ चोग्रपराक्रमौ
अहो भीमे बलं भीममेतयोश्च कृतास्त्रता २९
अहो वीर्यस्य सारत्वमहो सौष्ठवमेतयोः
स्थितावेतौ हि समरे कालान्तकयमोपमौ ३०
रुद्रौ द्वाविव संभूतौ यथा द्वाविव भास्करौ
यमौ वा पुरुषव्याघ्रौ घोररूपाविमौ रणे ३१
श्रूयन्ते स्म तदा वाचः सिद्धानां वै मुहुर्मुहुः
सिंहनादश्च संजज्ञे समेतानां दिवौकसाम्
अद्भुतं चाप्यचिन्त्यं च दृष्ट्वा कर्म तयोर्मृधे ३२

तौ शूरौ समरे राजन्परस्परकृतागसौ
परस्परमुदैक्षेतां क्रोधादुद्वृत्य चक्षुषी ३३
क्रोधरक्तेक्षणौ तौ तु क्रोधात्प्रस्फुरिताधरौ
क्रोधात्संदष्टदशनौ संदष्टदशनच्छदौ ३४
अन्योन्यं छादयन्तौ स्म शरवृष्ट्या महारथौ
शराम्बुधारौ समरे शस्त्रविद्युत्प्रकाशिनौ ३५
तावन्योन्यं ध्वजं विद्ध्वा सारथी च महारथौ
अन्योन्यस्य हयान्विद्ध्वा बिभिदाते परस्परम् ३६
ततः क्रुद्धौ महाराज बाणौ गृह्य महाहवे
उभौ चिक्षिपतुस्तूर्णमन्योन्यस्य वधैषिणौ ३७
तौ सायकौ महाराज द्योतमानौ चमूमुखे
आजघ्नाते समासाद्य वज्रवेगौ दुरासदौ ३८
तौ परस्परवेगाच्च शराभ्यां च भृशाहतौ
निपेततुर्महावीरौ स्वरथोपस्थयोस्तदा ३९
ततस्तु सारथिर्ज्ञात्वा द्रोणपुत्रमचेतनम्
अपोवाह रणाद्राजन्सर्वक्षत्रस्य पश्यतः ४०
तथैव पाण्डवं राजन्विह्वलन्तं मुहुर्मुहुः
अपोवाह रथेनाजौ सारथिः शत्रुतापनम् ४१

इति श्रीमहाभारते कर्णपर्वणि एकादशोऽध्यायः ११

द्वादशोऽध्यायः

धृतराष्ट्र उवाच
यथा संशप्तकैः सार्धमर्जुनस्याभवद्रणः
अन्येषां च मदीयानां पाण्डवैस्तद्ब्रवीहि मे १
सञ्जय उवाच
शृणु राजन्यथावृत्तं संग्रामं ब्रुवतो मम
वीराणां शत्रुभिः सार्धं देहपाप्मप्रणाशनम् २
पार्थः संशप्तकगणं प्रविश्यार्णवसंनिभम्
व्यक्षोभयदमित्रघ्नो महावात इवार्णवम् ३
शिरांस्युन्मथ्य वीराणां शितैर्भल्लैर्धनंजयः

पूर्णचन्द्राभवक्त्राणि स्वक्षिभ्रूदशनानि च
संतस्तार क्षितिं क्षिप्रं विनालैर्नलिनैरिव ४
सुवृत्तानायतान्पुष्टांश्चन्दनागुरुभूषितान्
सायुधान्सतनुत्राणान्पञ्चास्योरगसंनिभान्
बाहून्क्षुरैरमित्राणां विचकर्तार्जुनो रणे ५
धुर्यान्धुर्यतरान्सूतान्ध्वजांश्चापानि सायकान्
पाणीनरत्नीनसकृद्भल्लैश्चिच्छेद पाण्डवः ६
द्विपान्हयान्रथांश्चैव सारोहानर्जुनो रणे
शरैरनेकसाहस्रै राजन्निन्ये यमक्षयम् ७
तं प्रवीरं प्रतीयाता नर्दमाना इवर्षभाः
वाशितार्थमभिक्रुद्धा हुंकृत्वा चाभिदुद्रुवुः
निघ्नन्तमभिजघ्नुस्ते शरैः शृङ्गैरिवर्षभाः ८
तस्य तेषां च तद्युद्धमभवल्लोमहर्षणम्
त्रैलोक्यविजये यादृग्दैत्यानां सह वज्रिणा ९
अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतोऽजुनः
इषुभिर्बहुभिस्तूर्णं विद्ध्वा प्राणान्नरास सः १०
छिन्नत्रिवेणुचक्राक्षान्हतयोधाश्वसारथीन्
विध्वस्तायुधतूणीरान्समुन्मथितकेतनान् ११
संछिन्नयोक्त्ररश्मीकान्वित्रिवेणून्विकूबरान्
विध्वस्तबन्धुरयुगान्विशस्तायुधमण्डलान्
रथान्विशकलीकुर्वन्महाभ्राणीव मारुतः १२
विस्मापयन्प्रेक्षणीयं द्विषतां भयवर्धनम्
महारथसहस्रस्य समं कर्मार्जुनोऽकरोत् १३
सिद्धदेवर्षिसंघाश्च चारणाश्चैव तुष्टुवुः
देवदुन्दुभयो नेदुः पुष्पवर्षाणि चापतन्
केशवार्जुनयोर्मूर्ध्नि प्राह वाक्चाशरीरिणी १४
चन्द्रार्कानिलवह्नीनां कान्तिदीप्तिबलद्युतीः
यौ यदा बिभ्रतुर्वीरौ ताविमौ केशवार्जुनौ १५
ब्रह्मेशानाविवाजय्यौ वीरावेकरथे स्थितौ
सर्वभूतवरौ वीरौ नरनारायणावुभौ १६

इत्येतन्महदाश्चर्यं दृष्ट्वा श्रुत्वा च भारत
अश्वत्थामा सुसंयत्तः कृष्णावभ्यद्रवद्रणे १७
अथ पाण्डवमस्यन्तं यमकालान्तकाञ्शरान्
सेषुणा पाणिनाहूय हसन्द्रौणिरथाब्रवीत् १८
यदि मां मन्यसे वीर प्राप्तमर्हमिवातिथिम्
ततः सर्वात्मनाद्य त्वं युद्धातिथ्यं प्रयच्छ मे १९
एवमाचार्यपुत्रेण समाहूतो युयुत्सया
बहुमेनेऽजुनोऽत्मानमिदं चाह जनार्दनम् २०
संशप्तकाश्च मे वध्या द्रौणिराह्वयते च माम्
यदत्रानन्तरं प्राप्तं प्रशाधि त्वं महाभुज २१
एवमुक्तोऽवहत्पार्थं कृष्णो द्रोणात्मजान्तिकम्
जैत्रेण विधिनाहूतं वायुरिन्द्रमिवाध्वरे २२
तमामन्त्र्यैकमनसा केशवो द्रौणिमब्रवीत्
अश्वत्थामन्स्थिरो भूत्वा प्रहराशु सहस्व च २३
निर्वेष्टुं भर्तृपिण्डं हि कालोऽयमुपजीविनाम्
सूक्ष्मो विवादो विप्राणां स्थूलौ क्षात्रौ जयाजयौ २४
यां न संक्षमसे मोहाद्दिव्यां पार्थस्य सत्क्रियाम्
तामाप्तुमिच्छन्युध्यस्व स्थिरो भूत्वाद्य पाण्डवम् २५
इत्युक्तो वासुदेवेन तथेत्युक्त्वा द्विजोत्तमः
विव्याध केशवं षष्ठ्या नाराचैरर्जुनं त्रिभिः २६
तस्यार्जुनः सुसंक्रुद्धस्त्रिभिर्भल्लैः शरासनम्
चिच्छेदाथान्यदादत्त द्रौणिर्घोरतरं धनुः २७
सज्यं कृत्वा निमेषात्तद्विव्याधार्जुनकेशवौ
त्रिभिः शरैर्वासुदेवं सहस्रेण च पाण्डवम् २८
ततः शरसहस्राणि प्रयुतान्यर्बुदानि च
ससृजे द्रौणिरायस्तः संस्तभ्य च रणेऽजुनम् २९
इषुधेर्धनुषो ज्याया अङ्गुलीभ्यश्च मारिष
बाह्वोः कराभ्यामुरसो वदनघ्राणनेत्रतः ३०
कर्णाभ्यां शिरसोऽङ्गेभ्यो लोमवर्त्मभ्य एव च
रथध्वजेभ्यश्च शरा निष्पेतुर्ब्रह्मवादिनः ३१

शरजालेन महता विद्ध्वा केशवपाण्डवौ
ननाद मुदितो द्रौणिर्महामेघौघनिस्वनः ३२
तस्य नानदतः श्रुत्वा पाण्डवोऽच्युतमब्रवीत्
पश्य माधव दौरात्म्यं द्रोणपुत्रस्य मां प्रति ३३
वधप्राप्तौ मन्यते नौ प्रवेश्य शरवेश्मनि
एषोऽस्य हन्मि संकल्पं शिक्षया च बलेन च ३४
अश्वत्थाम्नः शरानस्तांश्छित्त्वैकैकं त्रिधा त्रिधा
व्यधमद्भरतश्रेष्ठो नीहारमिव मारुतः ३५
ततः संशप्तकान्भूयः साश्वसूतरथद्विपान्
ध्वजपत्तिगणानुग्रैर्बाणैर्विव्याध पाण्डवः ३६
ये ये ददृशिरे तत्र यद्यद्रूपं यथा यथा
ते ते तत्तच्छरैर्व्याप्तं मेनिरेऽत्मानमेव च ३७
ते गाण्डीवप्रणुदिता नानारूपाः पतत्रिणः
क्रोशे साग्रे स्थितान्घ्नन्ति द्विपांश्च पुरुषान्रणे ३८
भल्लैश्छिन्नाः कराः पेतुः करिणां मदकर्षिणाम्
छिन्ना यथा परशुभिः प्रवृद्धाः शरदि द्रुमाः ३९
पश्चात्तु शैलवत्पेतुस्ते गजाः सह सादिभिः
वज्रिवज्रप्रमथिता यथैवाद्रिचयास्तथा ४०
गन्धर्वनगराकारान्विधिवत्कल्पितान्रथान्
विनीतजवनान्युक्तानास्थितान्युद्धदुर्मदान् ४१
शरैर्विशकलीकुर्वन्नमित्रानभ्यवीवृषत्
अलंकृतानश्वसादीन्पत्तींश्चाहन्धनंजयः ४२
धनंजययुगान्तार्कः संशप्तकमहार्णवम्
व्यशोषयत दुःशोषं तीव्रैः शरगभस्तिभिः ४३
पुनर्द्रौणिमहाशैलं नाराचैः सूर्यसंनिभैः
निर्बिभेद महावेगैस्त्वरन्वज्रीव पर्वतम् ४४
तमाचार्यसुतः क्रुद्धः साश्वयन्तारमाशुगैः
ययुत्सुर्नाशकद्योद्धुं पार्थस्तानन्तराच्छिनत् ४५
ततः परमसंक्रुद्धः काण्डकोशानवासृजत्
अश्वत्थामाभिरूपाय गृहानतिथये यथा ४६

अथ संशप्तकांस्त्यक्त्वा पाण्डवो द्रौणिमभ्ययात्
अपाङ्क्तेयमिव त्यक्त्वा दाता पाङ्क्तेयमर्थिनम् ४७
ततः समभवद्युद्धं शुक्राङ्गिरसवर्चसोः
नक्षत्रमभितो व्योम्नि शुक्राङ्गिरसयोरिव ४८
संतापयन्तावन्योन्यं दीप्तैः शरगभस्तिभिः
लोकत्रासकरावास्तां विमार्गस्थौ ग्रहाविव ४९
ततोऽविध्यद्भ्रुवोर्मध्ये नाराचेनार्जुनो भृशम्
स तेन विबभौ द्रौणिरूर्ध्वरश्मिर्यथा रविः ५०
अथ कृष्णौ शरशतैरश्वत्थाम्नार्दितौ भृशम्
सरश्मिजालनिकरौ युगान्तार्काविवासतुः ५१
ततोऽर्जुनः सर्वतोधारमस्त्रमवासृजद्वासुदेवाभिगुप्तः
द्रौणायनिं चाभ्यहनत्पृषत्कैर्वज्राग्निवैवस्वतदण्डकल्पैः ५२
स केशवं चार्जुनं चातितेजा विव्याध मर्मस्वतिरौद्रकर्मा
बाणैः सुमुक्तैरतितीव्रवेगैर्यैराहतो मृत्युरपि व्यथेत ५३
द्रौणेरिषूनर्जुनः संनिवार्य व्यायच्छतस्तद्द्विगुणैः सुपुङ्खैः
तं साश्वसूतध्वजमेकवीरमावृत्य संशप्तकसैन्यमार्छत् ५४
धनूंषि बाणानिषुधीर्धनुर्ज्याः पाणीन्भुजान्पाणिगतं च शस्त्रम्
छत्राणि केतूंस्तुरगानथैषां वस्त्राणि माल्यान्यथ भूषणानि ५५
चर्माणि वर्माणि मनोरथांश्च प्रियाणि सर्वाणि शिरांसि चैव
चिच्छेद पार्थो द्विषतां प्रमुक्तैर्बाणैः स्थितानामपराङ्मुखानाम् ५६
सुकल्पिताः स्यन्दनवाजिनागाः समास्थिताः कृतयत्नैर्नृवीरैः
पार्थेरितैर्बाणगणैर्निरस्तास्तैरेव सार्धं नृवरैर्निपेतुः ५७
पद्मार्कपूर्णेन्दुसमाननानि किरीटमालामुकुटोत्कटानि
भल्लार्धचन्द्रक्षुरहिंसितानि प्रपेतुरुर्व्यां नृशिरांस्यजस्रम् ५८
अथ द्विपैर्देवपतिद्विपाभैर्देवारिदर्पोल्बणमन्युदर्पैः
कलिङ्गवङ्गाङ्गनिषादवीरा जिघांसवः पाण्डवमभ्यधावन् ५९
तेषां द्विपानां विचकर्त पार्थो वर्माणि मर्माणि करान्नियन्तॄन्
ध्वजाः पताकाश्च ततः प्रपेतुर्वज्राहतानीव गिरेः शिरांसि ६०
तेषु प्ररुग्णेषु गुरोस्तनूजं बाणैः किरीटी नवसूर्यवर्णैः
प्रच्छादयामास महाभ्रजालैर्वायुः समुद्युक्तमिवांशुमन्तम् ६१

ततोऽजुनेषूनिषुभिर्निरस्य द्रौणिः शरैरर्जुनवासुदेवौ
प्रच्छादयित्वा दिवि चन्द्रसूर्यौ ननाद सोऽम्भोद इवातपान्ते ६२
तमर्जुनस्तांश्च पुनस्त्वदीयानभ्यर्दितस्तैरविकृत्तशस्त्रैः
बाणान्धकारं सहसैव कृत्वा विव्याध सर्वानिषुभिः सुपुङ्खैः ६३
नाप्याददत्संदधन्नैव मुञ्चन्बाणान्रणेऽदृश्यत सव्यसाची
हतांश्च नागांस्तुरगान्पदातीन्संस्यूतदेहान्ददृशू रथांश्च ६४
संधाय नाराचवरान्दशाशु द्रौणिस्त्वरन्नेकमिवोत्ससर्ज
तेषां च पञ्चार्जुनमभ्यविध्यन्पञ्चाच्युतं निर्बिभिदुः सुमुक्ताः ६५
तैराहतौ सर्वमनुष्यमुख्यावसृक्क्षरन्तौ धनदेन्द्रकल्पौ
समाप्तविद्येन यथाभिभूतौ हतौ स्विदेतौ किमु मेनिरेऽन्ये ६६
अथार्जुनं प्राह दशार्हनाथः प्रमाद्यसे किं जहि योधमेतम्
कुर्याद्धि दोषं समुपेक्षितोऽसौ कष्टो भवेद्व्याधिरिवाक्रियावान् ६७
तथेति चोक्त्वाच्युतमप्रमादी द्रौणिं प्रयत्नादिषुभिस्ततक्ष
छित्त्वाश्वरश्मींस्तुरगानविध्यत्ते तं रणादूहुरतीव दूरम् ६८
आवृत्य नेयेष पुनस्तु युद्धं पार्थेन सार्धं मतिमान्विमृश्य
जानञ्जयं नियतं वृष्णिवीरे धनंजये चाङ्गिरसां वरिष्ठः ६९
प्रतीपकाये तु रणादश्वत्थाम्नि हृते हयैः
मन्त्रौषधिक्रियादानैर्व्याधौ देहादिवाहृते ७०
संशप्तकानभिमुखौ प्रयातौ केशवार्जुनौ
वातोद्धूतपताकेन स्यन्दनेनौघनादिना ७१
इति श्रीमहाभारते कर्णपर्वणि द्वादशोऽध्यायः १२

त्रयोदशोऽध्यायः

सञ्जय उवाच
अथोत्तरेण पाण्डूनां सेनायां ध्वनिरुत्थितः
रथनागाश्वपत्तीनां दण्डधारेण वध्यताम् १
निवर्तयित्वा तु रथं केशवोऽजुनमब्रवीत्
वाहयन्नेव तुरगान्गरुडानिलरंहसः २
मागधोऽथाप्यतिक्रान्तो द्विरदेन प्रमाथिना
भगदत्तादनवरः शिक्षया च बलेन च ३

एनं हत्वा निहन्तासि पुनः संशप्तकानिति
वाक्यान्ते प्रापयत्पार्थं दराडधारान्तिकं प्रति ४
स मागधानां प्रवरोऽङ्कुशग्रहो ग्रहेष्वसह्यो विकचो यथा ग्रहः
सपत्नसेनां प्रममाथ दारुणो महीं समग्रां विकचो यथा ग्रहः ५
सुकल्पितं दानवनागसंनिभं महाभ्रसंह्लादममित्रमर्दनम्
रथाश्वमातङ्गगणान्सहस्रशः समास्थितो हन्ति शरैर्द्विपानपि ६
रथानधिष्ठाय सवाजिसारथीन्रथांश्च पद्भिस्त्वरितो व्यपोथयत्
द्विपांश्च पद्भ्यां चरणैः करेण च द्विपास्थितो हन्ति स कालचक्रवत् ७
नरांश्च कार्ष्णायसवर्मभूषणान्निपात्य साश्वानपि पत्तिभिः सह
व्यपोथयद्दन्तिवरेण शुष्मिणा सशब्दवत्स्थूलनडान्यथा तथा ८
अथार्जुनो ज्यातलनेमिनिस्वने मृदङ्गभेरीबहुशङ्खनादिते
नराश्वमातङ्गसहस्रनादितै रथोत्तमेनाभ्यपतद्द्विपोत्तमम् ९
ततोऽजुनं द्वादशभिः शरोत्तमैर्जनार्दनं षोडशभिः समार्दयत्
स दराडधारस्तुरगांस्त्रिभिस्त्रिभिस्ततो ननाद प्रजहास चासकृत् १०
ततोऽस्य पार्थः सगुणेषुकार्मुकं चकर्त भल्लैर्ध्वजमप्यलंकृतम्
पुनर्नियन्तॄन्सह पादगोप्तृभिस्ततस्तु चुक्रोध गिरिव्रजेश्वरः ११
ततोऽजुनं भिन्नकटेन दन्तिना घनाघनेनानिलतुल्यरंहसा
अतीव चुक्षोभयिषुर्जनार्दनं धनंजयं चाभिजघान तोमरैः १२
अथास्य बाहू द्विपहस्तसंनिभौ शिरश्च पूर्णेन्दुनिभाननं त्रिभिः
क्षुरैः प्रचिच्छेद सहैव पाराडवस्ततो द्विपं बाणशतैः समार्दयत् १३
स पार्थबाणैस्तपनीयभूषणैः समारुचत्काञ्चनवर्मभृद्द्विपः
तथा चकाशे निशि पर्वतो यथा दवाग्निना प्रज्वलितौषधिद्रुमः १४
स वेदनार्तोऽम्बुदनिस्वनो नदंश्चलन्भ्रमन्प्रस्खलितोऽतुरोऽद्रवन्
पपात रुग्णः सनियन्तृकस्तथा यथा गिरिर्वज्रनिपातचूर्णितः १५
हिमावदातेन सुवर्णमालिना हिमाद्रिकूटप्रतिमेन दन्तिना
हते रणे भ्रातरि दराड आव्रजज्जिघांसुरिन्द्रावरजं धनञ्जयम् १६
स तोमरैरर्ककरप्रभैस्त्रिभिर्जनार्दनं पञ्चभिरेव चार्जुनम्
समर्पयित्वा विननाद चार्दयत्ततोऽस्य बाहू विचकर्त पाराडवः १७
क्षुरप्रकृत्तौ सुभृशं सतोमरौच्युताङ्गदौ चन्दनरूषितौ भुजौ
गजात्पतन्तौ युगपद्विरेजतुर्यथाद्रिशृङ्गात्पतितौ महोरगौ १८

अथार्धचन्द्रेण हृतं किरीटिना पपात दण्डस्य शिरः क्षितिं द्विपात्
तच्छोणिताभं निपतद्विरेजे दिवाकरोऽस्तादिव पश्चिमां दिशम् १९
अथ द्विपं श्वेतनगाग्रसंनिभं दिवाकरांशुप्रतिमैः शरोत्तमैः
बिभेद पार्थः स पपात नानदन्हिमाद्रिकूटः कुलिशाहतो यथा २०
ततोऽपरे तत्प्रतिमा गजोत्तमा जिगीषवः संयति सव्यसाचिनम्
तथा कृतास्तेन यथैव तौ द्विपौ ततः प्रभग्नं सुमहद्रिपोर्बलम् २१
गजा रथाश्वाः पुरुषाश्च संघशः परस्परघ्नाः परिपेतुराहवे
परस्परप्रस्खलिताः समाहता भृशं च तत्तत्कुलभाषिणो हताः २२
अथार्जुनं स्वे परिवार्य सैनिकाः पुरंदरं देवगणा इवाब्रुवन्
अभैष्म यस्मान्मरणादिव प्रजाः स वीर दिष्ट्या निहतस्त्वया रिपुः २३
न चेत्परित्रास्य इमाञ्जनान्भयाद्द्विषद्भिरेवं बलिभिः प्रपीडितान्
तथाभविष्यद्द्विषतां प्रमोदनं यथा हतेष्वेष्विह नोऽरिषु त्वया २४
इतीव भूयश्च सुहृद्भिरीरिता निशम्य वाचः सुमनास्ततोऽजुनः
यथानुरूपं प्रतिपूज्य तं जनं जगाम संशप्तकसंघहा पुनः २५
इति श्रीमहाभारते कर्णपर्वणि त्रयोदशोऽध्यायः १३

चतुर्दशोऽध्यायः

सञ्जय उवाच
प्रत्यागत्य पुनर्जिष्णुरहन्संशप्तकान्बहून्
वक्रानुवक्रगमनादङ्गारक इव ग्रहः १
पार्थबाणहता राजन्नराश्वरथकुञ्जराः
विचेलुर्बभ्रमुर्नेदुः पेतुर्मम्लुश्च मारिष २
धुर्यं धुर्यतरान्सूतान्रथांश्च परिसंक्षिपन्
पाणीन्पाणिगतं शस्त्रं बाहूनपि शिरांसि च ३
भल्लैः क्षुरैरर्धचन्द्रैर्वत्सदन्तैश्च पाण्डवः
चिच्छेदामित्रवीराणां समरे प्रतियुध्यताम् ४
वाशितार्थे युयुत्सन्तो वृषभा वृषभं यथा
आपतन्त्यर्जुनं शूराः शतशोऽथ सहस्रशः ५
तेषां तस्य च तद्युद्धमभवल्लोमहर्षणम्
त्रैलोक्यविजये यादृग्दैत्यानां सह वज्रिणा ६

तमविध्यत्त्रिभिर्बाणैर्दन्दशूकैरिवाहिभिः
उग्रायुधस्ततस्तस्य शिरः कायादपाहरत् ७
तेऽजुनं सर्वतः क्रुद्धा नानाशस्त्रैरवीवृषन्
मरुद्भिः प्रेषिता मेघा हिमवन्तमिवोष्णगे ८
अस्त्रैरस्त्राणि संवार्य द्विषतां सर्वतोऽजुनः
सम्यगस्तैः शरैः सर्वान्सहितानहनद्बहून् ९
छिन्नत्रिवेणुजङ्घेषान्निहतपार्ष्णिसारथीन्
संछिन्नरश्मियोक्त्राक्षान्व्यनुकर्षयुगान्रथान्
विध्वस्तसर्वसंनाहान्बाणैश्चक्रेऽजुनस्त्वरन् १०
ते रथास्तत्र विध्वस्ताः परार्ध्या भान्त्यनेकशः
धनिनामिव वेश्मानि हतान्यग्न्यनिलाम्बुभिः ११
द्विपाः संभिन्नमर्माणो वज्राशनिसमैः शरैः
पेतुर्गिर्यग्रवेश्मानि वज्रवाताग्निभिर्यथा १२
सारोहास्तुरगाः पेतुर्बहवोऽजुनताडिताः
निर्जिह्वान्त्राः क्षितौ क्षीणा रुधिरार्द्राः सुदुर्दृशः १३
नराश्वनागा नाराचैः संस्यूताः सव्यसाचिना
बभ्रमुश्चस्खलुः पेतुर्नेदुर्मम्लुश्च मारिष १४
अणकैश्च शिलाधौतैर्वज्राशनिविषोपमैः
शरैर्निजघ्निवान्पार्थो महेन्द्र इव दानवान् १५
महार्हवर्माभरणा नानारूपाम्बरायुधाः
सरथाः सध्वजा वीरा हताः पार्थेन शेरते १६
विजिताः पुण्यकर्माणो विशिष्टाभिजनश्रुताः
गताः शरीरैर्वसुधामूर्जितैः कर्मभिर्दिवम् १७
अथार्जुनरथं वीरास्त्वदीयाः समुपाद्रवन्
नानाजनपदाध्यक्षाः सगणा जातमन्यवः १८
उह्यमाना रथाश्वैस्ते पत्तयश्च जिघांसवः
समभ्यधावन्नस्यन्तो विविधं क्षिप्रमायुधम् १९
तदायुधमहावर्षं क्षिप्तं योधमहाम्बुदैः
व्यधमन्निशितैर्बाणैः क्षिप्रमर्जुनमारुतः २०
साश्वपत्तिद्विपरथं महाशस्त्रौघमप्लवम्

सहसा संतितीर्षन्तं पार्थं शस्त्रास्त्रसेतुना २१
अथाब्रवीद्वासुदेवः पार्थ किं क्रीडसेऽनघ
संशप्तकान्प्रमथ्यैतांस्ततः कर्णवधे त्वर २२
तथेत्युक्त्वार्जुनः क्षिप्रं शिष्टान्संशप्तकांस्तदा
आक्षिप्य शस्त्रेण बलाद्दैत्यानिन्द्र इवावधीत् २३
आदधत्संदधन्नेषून्दृष्टः कैश्चिद्रणेऽजुनः
विमुञ्चन्वा शराञ्शीघ्रं दृश्यते स्म हि कैरपि २४
आश्चर्यमिति गोविन्दो ब्रुवन्नश्वानचोदयत्
हंसांसगौरास्ते सेनां हंसाः सर इवाविशन् २५
ततः संग्रामभूमिं तां वर्तमाने जनक्षये
अवेक्षमाणो गोविन्दः सव्यसाचिनमब्रवीत् २६
एष पार्थ महारौद्रो वर्तते भरतक्षयः
पृथिव्यां पार्थिवानां वै दुर्योधनकृते महान् २७
पश्य भारत चापानि रुक्मपृष्ठानि धन्विनाम्
महतामपविद्धानि कलापानिषुधीस्तथा २८
जातरूपमयैः पुङ्खैः शरांश्च नतपर्वणः
तैलधौतांश्च नाराचान्निर्मुक्तानिव पन्नगान् २९
हस्तिदन्तत्सरून्खड्गाञ्जातरूपपरिष्कृतान्
आकीर्णांस्तोमरांश्चापांश्चित्रान्हेमविभूषितान् ३०
वर्माणि चापविद्धानि रुक्मपृष्ठानि भारत
सुवर्णविकृतान्प्रासाञ्शक्तीः कनकभूषिताः ३१
जाम्बूनदमयैः पट्टैर्बद्धाश्च विपुला गदाः
जातरूपमयीश्चर्ष्टीः पट्टिशान्हेमभूषितान् ३२
दण्डैः कनकचित्रैश्च विप्रविद्धान्परश्वधान्
अयस्कुशान्तान्पतितान्मुसलानि गुरूणि च ३३
शतघ्नीः पश्य चित्राश्च विपुलान्परिघांस्तथा
चक्राणि चापविद्धानि मुद्गरांश्च बहून्रणे ३४
नानाविधानि शस्त्राणि प्रगृह्य जयगृद्धिनः
जीवन्त इव लक्ष्यन्ते गतसत्त्वास्तरस्विनः ३५
गदाविमथितैर्गात्रैर्मुसलैर्भिन्नमस्तकान्

गजवाजिरथक्षुण्णान्पश्य योधान्सहस्रशः ३६
मनुष्यगजवाजीनां शरशक्त्यृष्टितोमरैः
निस्त्रिंशैः पट्टिशैः प्रासैर्नखरैर्लगुडैरपि ३७
शरीरैर्बहुधा भिन्नैः शोणितौघपरिप्लुतैः
गतासुभिरमित्रघ्न संवृता रणभूमयः ३८
बाहुभिश्चन्दनादिग्धैः साङ्गदैः शुभभूषणैः
सतलत्रैः सकेयूरैर्भाति भारत मेदिनी ३९
साङ्गुलित्रैर्भुजाग्रैश्च विप्रविद्धैरलंकृतैः
हस्तिहस्तोपमैश्छिन्नैरूरुभिश्च तरस्विनाम् ४०
बद्धचूडामणिवरैः शिरोभिश्च सकुण्डलैः
निकृत्तैर्वृषभाक्षाणां विराजति वसुंधरा ४१
कबन्धैः शोणितादिग्धैश्छिन्नगात्रशिरोधरैः
भूर्भाति भरतश्रेष्ठ शान्तार्चिर्भिरिवाग्निभिः ४२
रथान्बहुविधान्भग्नान्हेमकिङ्किणिनः शुभान्
अश्वांश्च बहुधा पश्य शोणितेन परिप्लुतान् ४३
योधानां च महाशङ्खान्पाण्डुरांश्च प्रकीर्णकान्
निरस्तजिह्वान्मातङ्गाञ्शयानान्पर्वतोपमान् ४४
वैजयन्तीविचित्रांश्च हतांश्चगजयोधिनः
वारणानां परिस्तोमान्सुयुक्ताम्बरकम्बलान् ४५
विपाटिता विचित्राश्चरूपचित्राः कुथास्तथा
भिन्नाश्च बहुधा घण्टाः पतद्भिश्चूर्णिता गजैः ४६
वैडूर्यमणिदण्डांश्च पतितानङ्कुशान्भुवि
बद्धाः सादिध्वजाग्रेषु सुवर्णविकृताः कशाः ४७
विचित्रान्मणिचित्रांश्च जातरूपपरिष्कृतान्
अश्वास्तरपरिस्तोमान्राङ्कवान्पतितान्भुवि ४८
चूडामणीन्नरेन्द्राणां विचित्राः काञ्चनस्रजः
छत्राणि चापविद्धानि चामरव्यजनानि च ४९
चन्द्रनक्षत्रभासैश्च वदनैश्चारुकुण्डलैः
क्लृप्तश्मश्रुभिरत्यर्थं वीराणां समलंकृतैः
वदनैः पश्य संछन्नां महीं शोणितकर्दमाम् ५०

सजीवांश्च नरान्पश्य कूजमानान्समन्ततः
उपास्यमानान्बहुभिर्न्यस्तशस्त्रैर्विशां पते ५१
ज्ञातिभिः सहितैस्तत्र रोदमानैर्मुहुर्मुहुः
व्युत्क्रान्तानपरान्योधांश्छादयित्वा तरस्विनः
पुनर्युद्धाय गच्छन्ति जयगृद्धाः प्रमन्यवः ५२
अपरे तत्र तत्रैव परिधावन्ति मानिनः
ज्ञातिभिः पतितैः शूरैर्याच्यमानास्तथोदकम् ५३
जलार्थं च गताः केचिन्निष्प्राणा बहवोऽजुन
संनिवृत्ताश्च ते शूरास्तान्दृष्ट्वैव विचेतसः ५४
जलं दृष्ट्वा प्रधावन्ति क्रोशमानाः परस्परम्
जलं पीत्वा मृतान्पश्य पिबतोऽन्याश्च भारत ५५
परित्यज्य प्रियानन्ये बान्धवान्बान्धवप्रिय
व्युत्क्रान्ताः समदृश्यन्त तत्र तत्र महारणे ५६
पश्यापरान्नरश्रेष्ठ संदष्टौष्ठपुटान्पुनः
भ्रुकुटी कुटिलैर्वक्त्रैः प्रेक्षमाणान्समन्ततः ५७
एतत्तवैवानुरूपं कर्मार्जुन महाहवे
दिवि वा देवराजस्य त्वया यत्कृतमाहवे ५८
एवं तां दर्शयन्कृष्णो युद्धभूमिं किरीटिने
गच्छन्नेवाशृणोच्छब्दं दुर्योधनबले महत् ५९
शङ्खदुन्दुभिनिर्घोषान्भेरीपणवमिश्रितान्
रथाश्वगजनादांश्च शस्त्रशब्दांश्च दारुणान् ६०
प्रविश्य तद्बलं कृष्णस्तुरगैर्वातवेगिभिः
पाण्ड्येनाभ्यर्दितां सेनां त्वदीयां वीक्ष्य धिष्ठितः ६१
स हि नानाविधैर्बाणैरिष्वासप्रवरो युधि
न्यहनद्द्विषतां व्रातान्गतासूनन्तको यथा ६२
गजवाजिमनुष्याणां शरीराणि शितैः शरैः
भित्त्वा प्रहरतां श्रेष्ठो विदेहासूंश्चकार सः ६३
शत्रुप्रवीरैरस्तानि नानाशस्त्राणि सायकैः
भित्त्वा तानहनत्पाण्ड्यः शत्रूञ्शक्र इवासुरान् ६४
इति श्रीमहाभारते कर्णपर्वणि चतुर्दशोऽध्यायः १४

पञ्चदशोऽध्यायः

धृतराष्ट्र उवाच
प्रोक्तस्त्वया पूर्वमेव प्रवीरो लोकविश्रुतः
न त्वस्य कर्म संग्रामे त्वया सञ्जय कीर्तितम् १
तस्य विस्तरतो ब्रूहि प्रवीरस्याद्य विक्रमम्
शिक्षां प्रभावं वीर्यं च प्रमाणं दर्पमेव च २
सञ्जय उवाच
द्रोणभीष्मकृपद्रौणिकर्णार्जुनजनार्दनान्
समाप्तविद्यान्धनुषि श्रेष्ठान्यान्मन्यसे युधि ३
तुल्यता कर्णभीष्माभ्यामात्मनो येन दृश्यते
वासुदेवार्जुनाभ्यां च न्यूनतां नात्मनीच्छति ४
स पाण्ड्यो नृपतिश्रेष्ठः सर्वशस्त्रभृतां वरः
कर्णस्यानीकमवधीत्परिभूत इवान्तकः ५
तदुदीर्णरथाश्वं च पत्तिप्रवरकुञ्जरम्
कुलालचक्रवद्भ्रान्तं पाण्ड्येनाधिष्ठितं बलम् ६
व्यश्वसूतध्वजरथान्विप्रविद्धायुधान्रिपून्
सम्यगस्तैः शरैः पाण्ड्यो वायुर्मेघानिवाक्षिपत् ७
द्विरदान्प्रहतप्रोथान्विपताकध्वजायुधान्
सपादरक्षानवधीद्वज्रेणारीनिवारिहा ८
सशक्तिप्रासतूणीरानश्वारोहान्हयानपि
पुलिन्दखशबाह्लीकान्निषादान्ध्रकतङ्गणान् ९
दाक्षिणात्यांश्च भोजांश्च क्रूरान्संग्रामकर्कशान्
विशस्त्रकवचान्बाणैः कृत्वा पाण्ड्योकरोद्व्यसून् १०
चतुरङ्गं बलं बाणैर्निघ्नन्तं पाण्ड्यमाहवे
दृष्ट्वा द्रौणिरसंभ्रान्तमसंभ्रान्ततरोऽभ्ययात् ११
आभाष्य चैनं मधुरमभि नृत्यन्नभीतवत्
प्राह प्रहरतां श्रेष्ठः स्मितपूर्वं समाह्वयन् १२
राजन्कमलपत्राक्ष प्रधानायुधवाहन
वज्रसंहननप्रख्य प्रधानबलपौरुष १३
मुष्टिश्लिष्टायुधाभ्यां च व्यायताभ्यां महद्धनुः

दोर्भ्यां विस्फारयन्भासि महाजलदवद्भृशम् १४
शरवर्षैर्महावेगैरमित्रानभिवर्षतः
मदन्यं नानुपश्यामि प्रतिवीरं तवाहवे १५
रथद्विरदपत्त्यश्वानेकः प्रमथसे बहून्
मृगसङ्घानिवारण्ये विभीर्भीमबलो हरिः १६
महता रथघोषेण दिवं भूमिं च नादयन्
वर्षान्ते सस्यहा पाथो भाभिरापूरयन्निव १७
संस्पृशानः शरांस्तीक्ष्णांस्तूणादाशीविषोपमान्
मयैवैकेन युध्यस्व त्र्यम्बकेणान्धको यथा १८
एवमुक्तस्तथेत्युक्त्वा प्रहरेति च ताडितः
कर्णिना द्रोणतनयं विव्याध मलयध्वजः १९
मर्मभेदिभिरत्युग्रैर्बाणैरग्निशिखोपमैः
स्मयन्नभ्यहनद्द्रौणिः पाण्ड्यमाचार्यसत्तमः २०
ततो नवापरांस्तीक्ष्णान्नाराचान्कङ्कवाससः
गत्या दशम्या संयुक्तानश्वत्थामा व्यवासृजत् २१
तेषां पञ्चाच्छिनत्पाण्ड्यः पंचभिर्निशितैः शरैः
चत्वारोऽभ्याहनन्वाहानाशु ते व्यसवोऽभवन् २२
अथ द्रोणसुतस्येषूंस्तांश्छित्त्वा निशितैः शरैः
धनुर्ज्यां विततां पाण्ड्यश्चिच्छेदादित्यवर्चसः २३
विज्यं धनुरथाधिज्यं कृत्वा द्रौणिरमित्रहा
ततः शरसहस्राणि प्रेषयामास पाण्ड्यतः
इषुसंबाधमाकाशमकरोद्दिश एव च २४
ततस्तानस्यतः सर्वान्द्रौणेर्बाणान्महात्मनः
जानानोऽप्यक्षयान्पाण्ड्योऽशातयत्पुरुषर्षभः २५
प्रहितांस्तान्प्रयत्नेन छित्त्वा द्रौणेरिषून्नरिः
चक्ररक्षौ ततस्तस्य प्राणुदन्निशितैः शरैः २६
अथारेर्लाघवं दृष्ट्वा मण्डलीकृतकार्मुकः
प्रास्यद्द्रोणसुतो बाणान्वृष्टिं पूषानुजो यथा २७
अष्टावष्टगवान्यूहुः शकटानि यदायुधम्
अह्नस्तदष्टभागेन द्रौणिश्चिक्षेप मारिष २८

तमन्तकमिव क्रुद्धमन्तकालान्तकोपमम्
ये ये ददृशिरे तत्र विसंज्ञाः प्रायशोऽभवन् २९
पर्जन्य इव घर्मान्ते वृष्ट्या साद्रिद्रुमां महीम्
आचार्यपुत्रस्तां सेनां बाणवृष्ट्याभ्यवीवृषत् ३०
द्रौणिपर्जन्यमुक्तां तां बाणवृष्टिं सुदुःसहाम्
वायव्यास्त्रेण स क्षिप्रं रुद्ध्वा पाण्ड्यानिलोऽनदत् ३१
तस्य नानदतः केतुं चन्दनागुरुभूषितम्
मलयप्रतिमं द्रौणिश्छित्त्वाश्वांश्चतुरोऽहनत् ३२
सूतमेकेषुणा हत्वा महाजलदनिस्वनम्
धनुश्छित्त्वार्धचन्द्रेण व्यधमत्तिलशो रथम् ३३
अस्त्रैरस्त्राणि संवार्य छित्त्वा सर्वायुधानि च
प्राप्तमप्यहितं द्रौणिर्न जघान रणेप्सया ३४
हतेश्वरो दन्तिवरः सुकल्पितस्त्वराभिसृष्टः प्रतिशर्मगो बली
तमध्यतिष्ठन्मलयेश्वरो महान्यथाद्रिशृङ्गं हरिरुन्नदंस्तथा ३५
स तोमरं भास्कररश्मिसंनिभं बलास्त्रसर्गोत्तमयत्नमन्युभिः
ससर्ज शीघ्रं प्रतिपीडयन्गजं गुरोः सुतायाद्रिपतीश्वरो नदन् ३६
मणिप्रतानोत्तमवज्रहाटकैरलंकृतं चांशुकमाल्यमौक्तिकैः
हतोऽस्यसावित्यसकृन्मुदा नदन्पराभिनद्द्रौणिवराङ्गभूषणम् ३७
तदर्कचन्द्रग्रहपावकत्विषं भृशाविघातात्पतितं विचूर्णितम्
महेन्द्रवज्राभिहतं महावनं यथाद्रिशृङ्गं धरणीतले तथा ३८
ततः प्रजज्वाल परेण मन्युना पदाहतो नागपतिर्यथा तथा
समादधे चान्तकदण्डसंनिभानिषूनमित्रान्तकरांश्चतुर्दश ३९
गजस्य पादाग्रकरान्स पञ्चभिर्नृपस्य बाहू च शिरोऽथ च त्रिभिः
जघान षड्भिः षडृतूत्तमत्विषः स पाण्ड्यराजानुचरान्महारथान् ४०
सुदीर्घवृत्तौ वरचन्दनोक्षितौ सुवर्णमुक्तामणिवज्रभूषितौ
भुजौ धरायां पतितौ नृपस्य तौ विवेष्टतुस्तार्क्ष्यहताविवोरगौ ४१
शिरश्च तत्पूर्णशशिप्रभाननं सरोषताम्रायतनेत्रमुन्नसम्
क्षितौ विबभ्राज पतत्सकुण्डलं विशाखयोर्मध्यगतः शशी यथा ४२
समाप्तविद्यं तु गुरोः सुतं नृपः समाप्तकर्माणमुपेत्य ते सुतः
सुहृद्वृतोऽत्यर्थमपूजयन्मुदा जिते बलौ विष्णुमिवामरेश्वरः ४३

इति श्रीमहाभारते कर्णपर्वणि पञ्चदशोऽध्यायः १५

षोडशोऽध्यायः

धृतराष्ट्र उवाच
पाण्ड्ये हते किमकरोदर्जुनो युधि सञ्जय
एकवीरेण कर्णेन द्रावितेषु परेषु च १
समाप्तविद्यो बलवान्युक्तो वीरश्च पाण्डवः
सर्वभूतेष्वनुज्ञातः शंकरेण महात्मना २
तस्मान्महद्भयं तीव्रममित्रघ्नाद्धनंजयात्
स यत्तत्राकरोत्पार्थस्तन्ममाचक्ष्व सञ्जय ३
सञ्जय उवाच
हते पाण्ड्येऽर्जुनं कृष्णस्त्वरन्नाह वचो हितम्
पश्यातिमान्यं राजानमपयातांश्च पाण्डवान् ४
अश्वत्थाम्नश्च संकल्पाद्धताः कर्णेन सृञ्जयाः
तथाश्वनरनागानां कृतं च कदनं महत्
इत्याचष्ट सुदुर्धर्षो वासुदेवः किरीटिने ५
एतच्छ्रुत्वा च दृष्ट्वा च भ्रातुर्घोरं महद्भयम्
वाहयाश्वान्हृषीकेश क्षिप्रमित्याह पाण्डवः ६
ततः प्रायाद्धृषीकेशो रथेनाप्रतियोधिना
दारुणश्चपुनस्तत्र प्रादुरासीत्समागमः ७
ततः प्रववृते भूयः संग्रामो राजसत्तम
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनः ८
धनूंषि बाणान्परिघानसितोमरपट्टिशान्
मुसलानि भुशुण्डीश्च शक्तिऋृष्टिपरश्वधान् ९
गदाः प्रासानसीन्कुन्तान्भिण्डिपालान्महाङ्कुशान्
प्रगृह्य क्षिप्रमापेतुः परस्परजिगीषया १०
बाणज्यातलशब्देन द्यां दिशः प्रदिशो वियत्
पृथिवीं नेमिघोषेण नादयन्तोऽभ्ययुः परान् ११
तेन शब्देन महता संहृष्टाश्चक्रुराहवम्
वीरा वीरैर्महाघोरं कलहान्तं तितीर्षवः १२

ज्यातलत्रधनुःशब्दाः कुञ्जराणां च बृंहितम्
ताडितानां च पततां निनादः सुमहानभूत् १३
बाणशब्दांश्च विविधाञ्शूराणामभिगर्जताम्
श्रुत्वा शब्दं भृशं त्रेसुर्जघ्नुर्मम्लुश्च भारत १४
तेषां नानद्यतां चैव शस्त्रवृष्टिं च मुञ्चताम्
बहूनाधिरथिः कर्णः प्रममाथ रणेषुभिः १५
पञ्च पाञ्चालवीराणां रथान्दश च पञ्च च
साश्वसूतध्वजान्कर्णः शरैर्निन्ये यमक्षयम् १६
योधमुख्या महावीर्याः पाण्डूनां कर्णमाहवे
शीघ्रास्त्रा दिवमावृत्य परिवव्रः समन्ततः १७
ततः कर्णो द्विषत्सेनां शरवर्षैर्विलोडयन्
विजगाहेऽण्डजापूर्णां पद्मिनीमिव यूथपः १८
द्विषन्मध्यमवस्कन्द्य रोधेयो धनुरुत्तमम्
विधुन्वानः शितैर्बाणैः शिरांस्युन्मथ्य पातयत् १९
चर्मवर्माणि संछिन्द्य निर्वापमिव देहिनाम्
विषेहुर्नास्य संपर्कं द्वितीयस्य पतत्त्रिणः २०
वर्मदेहासुमथनैर्धनुषः प्रच्युतैः शरैः
मौर्व्या तलत्रैर्न्यवृधीत्कशया वाजिनो यथा २१
पाण्डुसृञ्जयपाञ्चालाञ्शरगोचरमानयत्
ममर्दकर्णस्तरसा सिंहो मृगगणानिव २२
ततः पाञ्चालपुत्राश्च द्रौपदेयाश्च मारिष
यमौ च युयुधान श्चसहिताः कर्णमभ्ययुः २३
व्यायच्छमानाः सुभृशं कुरुपाण्डवसृञ्जयाः
प्रियानसून्रणे त्यक्त्वा योधा जग्मुः परस्परम् २४
सुसंनद्धाः कवचिनः सशिरस्त्राणभूषणाः
गदाभिर्मुसलैश्चान्ये परिघैश्च महारथाः २५
समभ्यधावन्त भृशं देवा दण्डैरिवोद्यतैः
नदन्तश्चाह्वयन्तश्च प्रवल्गन्तश्च मारिष २६
ततो निजघ्नुरन्योन्यं पेतुश्चाहवताडिताः
वमन्तो रुधिरं गात्रैर्विमस्तिष्केक्षणा युधि २७

दन्तपूर्णैः सरुधिरैर्वक्त्रैर्दाडिमसंनिभैः
जीवन्त इव चाप्येते तस्थुः शस्त्रोपबृंहिताः २८
परस्परं चाप्यपरे पट्टिशैरसिभिस्तथा
शक्तिभिर्भिण्डिपालैश्च नखरप्रासतोमरैः २९
ततक्षुश्चिच्छिदुश्चान्ये बिभिदुश्चिक्षिपुस्तथा
संचकर्तुश्च जघ्नुश्च क्रुद्धा निर्बिभिदुश्च ह ३०
पेतुरन्योन्यनिहता व्यसवो रुधिरोक्षिताः
क्षरन्तः स्वरसं रक्तं प्रकृत्ताश्चन्दना इव ३१
रथै रथा विनिहता हस्तिभिश्चापि हस्तिभिः
नरा नरवरैः पेतुरश्वाश्चाश्वैः सहस्रशः ३१
ध्वजाः शिरांसि च्छत्राणि द्विपहस्ता नृणां भुजाः
क्षुरैर्भल्लार्धचन्द्रैश्च छिन्नां शस्त्राणि तत्यजुः ३३
नरांश्च नागांश्च रथान्हयान्ममृदुराहवे
अश्वारोहैर्हताः शूराश्छिन्नहस्ताश्च दन्तिनः ३४
सपताका ध्वजाः पेतुर्विशीर्णा इव पर्वताः
पत्तिभिश्च समाप्लुत्य द्विरदाः स्यन्दनास्तथा ३५
प्रहता हन्यमानाश्च पतिताश्चैव सर्वशः
अश्वारोहाः समासाद्य त्वरिताः पत्तिभिर्हताः
सादिभिः पत्तिसंघाश्च निहता युधि शेरते ३६
मृदितानीव पद्मानि प्रम्लाना इव च स्रजः
हतानां वदनान्यासन्गात्राणि च महामते ३७
रूपाण्यभ्यर्थकाम्यानि द्विरदाश्वनृणां नृप
समुन्नानीव वस्त्राणि प्रापुर्दुर्दर्शतां परम् ३८
इति श्रीमहाभारते कर्णपर्वणि षोडशोऽध्यायः १६

सप्तदशोऽध्यायः

सञ्जय उवाच
हस्तिभिस्तु महामात्रास्तव पुत्रेण चोदिताः
धृष्टद्युम्नं जिघांसन्तः क्रुद्धाः पार्षतमभ्ययुः १
प्राच्याश्च दाक्षिणात्याश्च प्रवीरा गजयोधिनः

अङ्गा वङ्गाश्च पुण्ड्राश्च मागधास्ताम्रलिप्तकाः २
मेकलाः कोशला मद्रा दशार्णा निषधास्तथा
गजयुद्धेषु कुशलाः कलिङ्गैः सह भारत ३
शरतोमरनाराचैर्वृष्टिमन्त इवाम्बुदाः
सिषिचुस्ते ततः सर्वे पाञ्चालाचलमाहवे ४
तान्संमिमर्दिषुर्नागान्पार्ष्ण्यङ्गुष्ठाङ्कुशैर्भृशम्
पोथितान्पार्षतो बाणैर्नाराचैश्चाभ्यवीवृषत् ५
एकैकं दशभिः षड्भिरष्टाभिरपि भारत
द्विरदानभिविव्याध क्षिप्तैर्गिरिनिभाञ्शरैः
प्रच्छाद्यमानो द्विरदैर्मेघैरिव दिवाकरः ६
पर्यासुः पाण्डुपाञ्चाला नदन्तो निशितायुधाः
तान्नागानभिवर्षन्तो ज्यातन्त्रीशरनादितैः ७
नकुलः सहदेवश्च द्रौपदेयाः प्रभद्रकाः
सात्यकिश्च शिखण्डी च चेकितानश्च वीर्यवान् ८
ते म्लेच्छैः प्रेषिता नागा नरानश्वान्रथानपि
हस्तैराक्षिप्य ममृदुः पद्भिश्चाप्यतिमन्यवः ९
बिभिदुश्च विषाणाग्रैः समाक्षिप्य च चिक्षिपुः
विषाणलग्नैश्चाप्यन्ये परिपेतुर्विभीषणाः १०
प्रमुखे वर्तमानं तु द्विपं वङ्गस्य सात्यकिः
नाराचेनोग्रवेगेन भित्त्वा मर्मण्यपातयत् ११
तस्यावर्जितनागस्य द्विरदादुत्पतिष्यतः
नाराचेनाभिनद्वक्षः सोऽपतद्भुवि सात्यकेः १२
पुण्ड्रस्यापततो नागं चलन्तमिव पर्वतम्
सहदेवः प्रयत्नात्तैर्नाराचैर्व्यहनत्त्रिभिः १३
विपताकं वियन्तारं विवर्मध्वजजीवितम्
तं कृत्वा द्विरदं भूयः सहदेवोऽङ्गमभ्यगात् १४
सहदेवं तु नकुलो वारयित्वाङ्गमार्दयत्
नाराचैर्यमदण्डाभैस्त्रिभिर्नागं शतेन च १५
दिवाकरकरप्रख्यानङ्गश्चिक्षेप तोमरान्
नकुलाय शतान्यष्टौ त्रिधैकैकं तु सोऽच्छिनत् १६

तथार्धचन्द्रेण शिरस्तस्य चिच्छेद पाण्डवः
स पपात हतो म्लेच्छस्तेनैव सह दन्तिना १७
आचार्यपुत्रे निहते हस्तिशिक्षाविशारदे
अङ्गाः क्रुद्धा महामात्रा नागैर्नकुलमभ्ययुः १८
चलत्पताकैः प्रमुखैर्हेमकक्षातनुच्छदैः
मिमर्दिषन्तस्त्वरिताः प्रदीप्तैरिव पर्वतैः १९
मेकलोत्कलकालिङ्गा निषादास्ताम्रलिप्तकाः
शरतोमरवर्षाणि विमुञ्चन्तो जिघांसवः २०
तैश्छाद्यमानं नकुलं दिवाकरमिवाम्बुदैः
परि पेतुः सुसंरब्धाः पाण्डुपाञ्चालसोमकाः २१
ततस्तदभवद्युद्धं रथिनां हस्तिभिः सह
सृजतां शरवर्षाणि तोमरांश्च सहस्रशः २२
नागानां प्रस्फुटुः कुम्भा मर्माणि विविधानि च
दन्ताश्चैवातिविद्धानां नाराचैर्भूषणानि च २३
तेषामष्टौ महानागाञ्चतुःषष्ठ्या सुतेजनैः
सहदेवो जघानाशु ते पेतुः सह सादिभिः २४
अञ्जोगतिभिरायम्य प्रयत्नाद्धनुरुत्तमम्
नाराचैरहनन्नागान्नकुलः कुरुनन्दन २५
ततः शैनेयपाञ्चाल्यौ द्रौपदेयाः प्रभद्रकाः
शिखण्डी च महानागान्सिषिचुः शरवृष्टिभिः २६
ते पाण्डयोधाम्बुधरैः शत्रुद्विरदपर्वताः
बाणवर्षैर्हताः पेतुर्वज्रवर्षैरिवाचलाः २७
एवं हत्वा तव गजांस्ते पाण्डुनरकुञ्जराः
द्रुतं सेनामवैक्षन्त भिन्नकूलामिवापगाम् २८
ते तां सेनामवालोक्य पाण्डुपुत्रस्य सैनिकाः
विक्षोभयित्वा च पुनः कर्णमेवाभिदुद्रुवुः २९
सहदेवं ततः क्रुद्धं दहन्तं तव वाहिनीम्
दुःशासनो महाराज भ्राता भ्रातरमभ्ययात् ३०
तौ समेतौ महायुद्धे दृष्ट्वा तत्र नराधिपाः
सिंहनादरवांश्चक्रुर्वासांस्यादुधुवुश्च ह ३१

ततो भारत क्रुद्धेन तव पुत्रेण धन्विना
पाण्डुपुत्रस्त्रिभिर्बाणैर्वक्षस्यभिहतो बली ३२
सहदेवस्ततो राजन्नाराचेन तवात्मजम्
विद्ध्वा विव्याध सप्तत्या सारथिं च त्रिभिस्त्रिभिः ३३
दुःशासनस्तदा राजंश्छित्त्वा चापं महाहवे
सहदेवं त्रिसप्तत्या बाह्वोरुरसि चार्दयत् ३४
सहदेवस्ततः क्रुद्धः खड्गं गृह्य महाहवे
व्याविध्यत युधां श्रेष्ठः श्रीमांस्तव सुतं प्रति ३५
समार्गणगणं चापं छित्त्वा तस्य महानसिः
निपपात ततो भूमौ च्युतः सर्प इवाम्बरात् ३६
अथान्यद्धनुरादाय सहदेवः प्रतापवान्
दुःशासनाय चिक्षेप बाणमन्तकरं ततः ३७
तमापतन्तं विशिखं यमदण्डोपमत्विषम्
खड्गेन शितधारेण द्विधा चिच्छेद कौरवः ३८
तमापतन्तं सहसा निस्त्रिंशं निशितैः शरैः
पातयामास समरे सहदेवो हसन्निव ३९
ततो बाणांश्चतुःषष्टिं तव पुत्रो महारणे
सहदेवरथे तूर्णं पातयामास भारत ४०
ताञ्शरान्समरे राजन्वेगेनापततो बहून्
एकैकं पञ्चभिर्बाणैः सहदेवो न्यकृन्तत ४१
स निवार्य महाबाणांस्तव पुत्रेण प्रेषितान्
अथास्मै सुबहून्बाणान्माद्रीपुत्रः समाचिनोत् ४२
ततः क्रुद्धो महाराज सहदेवः प्रतापवान्
समाधत्त शरं घोरं मृत्युकालान्तकोपमम्
विकृष्य बलवच्चापं तव पुत्राय सोऽसृजत् ४३
स तं निर्भिद्य वेगेन भित्त्वा च कवचं महत्
प्राविशद्धरणीं राजन्वल्मीकमिव पन्नगः
ततः स मुमुहे राजंस्तव पुत्रो महारथः ४४
मूढं चैनं समालक्ष्य सारथिस्त्वरितो रथम्
अपोवाह भृशं त्रस्तो वध्यमानां शितैः शरैः ४५

पराजित्य रणे तं तु पाण्डवः पाण्डुपूर्वज
दुर्योधनबलं हृष्टः प्रामथद्वै समन्ततः ४६
पिपीलिकापुटं राजन्यथामृद्नान्नरो रुषा
तथा सा कौरवी सेना मृदिता तेन भारत ४७
नकुलं रभसं युद्धे दारयन्तं वरूथिनीम्
कर्णो वैकर्तनो राजन्वारयामास वै तदा ४८
नकुलश्च तदा कर्णं प्रहसन्निदमब्रवीत्
चिरस्य बत दृष्टोऽह दैवतैः सौम्यचक्षुषा ४९
यस्य मे त्वं रणे पाप चक्षुर्विषयमागतः
त्वं हि मूलमनर्थानां वैरस्य कलहस्य च ५०
त्वद्दोषात्कुरवः क्षीणाः समासाद्य परस्परम्
त्वामद्य समरे हत्वा कृतकृत्योऽस्मि विज्वरः ५१
एवमुक्तः प्रत्युवाच नकुलं सूतनन्दनः
सदृशं राजपुत्रस्य धन्विनश्च विशेषतः ५२
प्रहरस्व रणे बाल पश्यामस्तव पौरुषम्
कर्म कृत्वा रणे शूर ततः कत्थितुमर्हसि ५३
अनुक्त्वा समरे तात शूरा युध्यन्ति शक्तितः
स युध्यस्व मया शक्त्या विनेष्ये दर्पमद्य ते ५४
इत्युक्त्वा प्राहरत्तूर्णं पाण्डुपुत्राय सूतजः
विव्याध चैनं समरे त्रिसप्तत्या शिलीमुखैः ५५
नकुलस्तु ततो विद्धः सूतपुत्रेण भारत
अशीत्याशीविषप्रख्यैः सूतपुत्रमविध्यत ५६
तस्य कर्णो धनुश्छित्त्वा स्वर्णपुङ्खैः शिलाशितैः
त्रिंशता परमेष्वासः शरैः पाण्डवमार्दयत् ५७
ते तस्य कवचं भित्त्वा पपुः शोणितमाहवे
आशीविषा यथा नागा भित्त्वा गां सलिलं पपुः ५८
अथान्यद्धनुरादाय हेमपृष्ठं दुरासदम्
कर्णं विव्याध विंशत्या सारथिं च त्रिभिः शरैः ५९
ततः क्रुद्धो महाराज नकुलः परवीरहा
क्षुरप्रेण सुतीक्ष्णेन कर्णस्य धनुरच्छिनत् ६०

अथैनं छिन्नधन्वानं सायकानां शतैस्त्रिभिः
आजघ्ने प्रहसन्वीरः सर्वलोकमहारथम् ६१
कर्णमभ्यर्दितंदृष्ट्वा पाण्डुपुत्रेण मारिष
विस्मयं परमं जग्मू रथिनः सह दैवतैः ६२
अथान्यद्धनुरादाय कर्णो वैकर्तनस्तदा
नकुलं पञ्चभिर्बाणैर्जत्रुदेशे समार्दयत् ६३
उरःस्थैरथ तैर्बाणैर्माद्रीपुत्रो व्यरोचत
स्वरश्मिभिरिवादित्यो भुवने विसृजन्प्रभाम् ६४
नकुलस्तु ततः कर्णं विद्ध्वा सप्तभिरायसैः
अथास्य धनुषः कोटिं पुनश्चिच्छेद मारिष ६५
सोऽन्यत्कार्मुकमादाय समरे वेगवत्तरम्
नकुलस्य ततो बाणैः सर्वतोऽवारयद्दिशः ६६
संछाद्यमानः सहसा कर्णचापच्युतैः शरैः
चिच्छेद स शरांस्तूर्णं शरैरेव महारथः ६७
ततो बाणमयं जालं विततं व्योम्न्यदृश्यत
खद्योतानां गणैरेव संपतद्भिर्यथा नभः ६८
तैर्विमुक्तैः शरशतैश्छादितं गगनं तदा
शलभानां यथा व्रातैस्तद्वदासीत्समाकुलम् ६९
ते शरा हेमविकृताः संपतन्तो मुहुर्मुहुः
श्रेणीकृता अभासन्त हंसाः श्रेणीगता इव ७०
बाणजालावृते व्योम्नि छादिते च दिवाकरे
समसर्पत्ततो भूतं किंचिदेव विशां पते ७१
निरुद्धे तत्र मार्गे तु शरसंघैः समन्ततः
व्यरोचतां महाभागौ बालसूर्याविवोदितौ ७२
कर्णचापच्युतैर्बाणैर्वध्यमानास्तु सोमकाः
अवालीयन्त राजेन्द्र वेदनार्ताः शरार्दिताः ७३
नकुलस्य तथा बाणैर्वध्यमाना चमूस्तव
व्यशीर्यत दिशो राजन्वातनुन्ना इवाम्बुदाः ७४
ते सेने वध्यमाने तु ताभ्यां दिव्यैर्महाशरैः
शरपातमपक्रम्य ततः प्रेक्षकवत्स्थिते ७५

प्रोत्सारिते जने तस्मिन्कर्णपाण्डवयोः शरैः
विव्याधाते महात्मानावन्योन्यं शरवृष्टिभिः ७६
निदर्शयन्तौ त्वस्त्राणि दिव्यानि रणमूर्धनि
छादयन्तौ च सहसा परस्परवधैषिणौ ७७
नकुलेन शरा मुक्ताः कङ्कबर्हिणवाससः
ते तु कर्णमवच्छाद्य व्यतिष्ठन्त यथा परे ७८
शरवेश्मप्रविष्टौ तौ ददृशाते न कैश्चन
चन्द्रसूर्यौ यथा राजंश्छाद्यमानौ जलागमे ७९
ततः क्रुद्धो रणे कर्णः कृत्वा घोरतरं वपुः
पाण्डवं छादयामास समन्ताच्छरवृष्टिभिः ८०
स च्छाद्यमानः समरे सूतपुत्रेण पाण्डवः
न चकार व्यथां राजन्भास्करो जलदैर्यथा ८१
ततः प्रहस्याधिरथिः शरजालानि मारिष
प्रेषयामास समरे शतशोऽथ सहस्रशः ८२
एकच्छायमभूत्सर्वं तस्य बाणैर्महात्मनः
अभ्रच्छायेव संजज्ञे संपतद्भिः शरोत्तमैः ८३
ततः कर्णो महाराज धनुश्छित्त्वा महात्मनः
सारथिं पातयामास रथनीडाद्धसन्निव ८४
तथाश्वांश्चतुरश्चास्य चतुर्भिर्निशितैः शरैः
यमस्य सदनं तूर्णं प्रेषयामास भारत ८५
अथास्य तं रथं तूर्णं तिलशो व्यधमच्छरैः
पताकां चक्ररक्षौ च ध्वजं खड्गं च मारिष
शतचन्द्रं ततश्चर्म सर्वोपकरणानि च ८६
हताश्वो विरथश्चैव विवर्मा च विशां पते
अवतीर्य रथात्तूर्णं परिघं गृह्य विष्ठितः ८७
तमुद्यतं महाघोरं परिघं तस्य सूतजः
व्यहनत्सायकै राजञ्शतशोऽथ सहस्रशः ८८
व्यायुधं चैनमालक्ष्य शरैः संनतपर्वभिः
आर्दयद्बहुशः कर्णो न चैनं समपीडयत् ८९
स वध्यमानः समरे कृतास्त्रेण बलीयसा

प्राद्रवत्सहसा राजन्नकुलो व्याकुलेन्द्रियः ९०
तमभिद्रुत्य राधेयः प्रहसन्वै पुनः पुनः
सज्यमस्य धनुः कराठे सोऽवासृजत भारत ९१
ततः स शुशुभे राजन्कराठासक्तमहाधनुः
परिवेषमनुप्राप्तो यथा स्याद्व्योम्नि चन्द्रमाः
यथैव च सितो मेघः शक्रचापेन शोभितः ९२
तमब्रवीत्तदा कर्णो व्यर्थं व्याहृतवानसि
वदेदानीं पुनर्हृष्टो वध्यं मां त्वं पुनः पुनः ९३
मा योत्सीर्गुरुभिः सार्धं बलवद्भिश्च पाराडव
सदृशैस्तात युध्यस्व व्रीडां मा कुरु पाराडव
गृहं वा गच्छ माद्रेय यत्र वा कृष्णफल्गुनौ ९४
एवमुक्त्वा महाराज व्यसर्जयत तं ततः
वधप्राप्तं तु तं राजन्नावधीत्सूतनन्दनः
स्मृत्वा कुन्त्या वचो राजंस्तत एनं व्यसर्जयत् ९५
विसृष्टः पाराडवो राजन्सूतपुत्रेरा धन्विना
व्रीडन्निव जगामाथ युधिष्ठिररथं प्रति ९६
ग्रारुरोह रथं चापि सूतपुत्रप्रतापितः
निःश्वसन्दुःखसंतप्तः कुम्भे क्षिप्त इवोरगः ९७
तं विसृज्य रणे कर्णः पाञ्चालांस्त्वरितो ययौ
रथेनातिपताकेन चन्द्रवर्णहयेन च ९८
तत्राक्रन्दो महानासीत्पाराडवानां विशां पते
दृष्ट्वा सेनापतिं यान्तं पाञ्चालानां रथव्रजान् ९९
तत्राकरोन्महाराज कदनं सूतनन्दनः
मध्यं गते दिनकरे चक्रवत्प्रचरन्प्रभुः १००
भग्नचक्रै रथैः केचिच्छिन्नध्वजपताकिभिः
ससूतैर्हतसूतैश्च भग्नाक्षैश्चैव मारिष
ह्रियमाराानपश्याम पाञ्चालानां रथव्रजान् १०१
तत्र तत्र च संभ्रान्ता विचेरुर्मत्तकुञ्जराः
दवाग्निना परीताङ्गा यथैव स्युर्महावने १०२
भिन्नकुम्भा विरुधिराश्छिन्न हस्ताश्च वाररााः

भिन्नगात्रवराश्चैव च्छिन्नवालाश्च मारिष
छिन्नाभ्राणीव संपेतुर्वध्यमाना महात्मना १०३
अपरे त्रासिता नागा नाराचशततोमरैः
तमेवाभिमुखा यान्ति शलभा इव पावकम् १०४
अपरे निष्टनन्तः स्म व्यदृश्यन्त महाद्विपाः
क्षरन्तः शोणितं गात्रैर्नगा इव जलप्लवम् १०५
उरश्छदैर्विमुक्ताश्च वालबन्धैश्च वाजिनः
राजतैश्च तथा कांस्यैः सौवर्णैश्चैव भूषणैः १०६
हीना आस्तरणैश्चैव खलीनैश्च विवर्जिताः
चामरैश्च कुथाभिश्च तूणीरैः पतितैरपि १०७
निहतैः सादिभिश्चैव शूरैराहवशोभिभिः
अपश्याम रणे तत्र भ्राम्यमाणान्हयोत्तमान् १०८
प्रासैः खड्गैश्च संस्यूतानृष्टिभिश्च नराधिप
हययोधानपश्याम कंचुकोष्णीषधारिणः १०९
रथान्हेमपरिष्कारान्सुयुक्ताञ्जवनैर्हयैः
भ्रममाणानपश्याम हतेषु रथिषु द्रुतम् ११०
भग्नाक्षकूबरान्कांश्चिच्छिन्नचक्रांश्च मारिष
बिपताकाध्वजांश्चान्याञ्छिन्नेषायुगबन्धुरान् १११
बिहीनान्रथिनस्तत्र धावमानान्समन्ततः
सूर्यपुत्रशरैस्त्रस्तानपश्याम विशां पते ११२
विशस्त्रांश्च तथैवान्यान्सशस्त्रांश्च बहून्हतान्
तावकाञ्जालसंछन्नानुरोघण्टाविभूषितान् ११३
नानावर्णविचित्राभिः पताकाभिरलंकृतान्
पदातीनन्वपश्याम धावमानान्समन्ततः ११४
शिरांसि बाहूनूरूंश्च छिन्नानन्यांस्तथा युधि
कर्णचापच्युतैर्बाणैरपश्याम विनाकृतान् ११५
महान्व्यतिकरो रौद्रो योधानामन्वदृश्यत
कर्णसायकनुन्नानां हतानां निशितैः शरैः ११६
ते वध्यमानाः समरे सूतपुत्रेण सृञ्जयाः
तमेवाभिमुखा यान्ति पतंगा इव पावकम् ११७

तं दहन्तमनीकानि तत्र तत्र महारथम्
क्षत्रिया वर्जयामासुर्युगान्ताग्निमिवोल्बणम् ११८
हतशेषास्तु ये वीराः पाञ्चालानां महारथाः
तान्प्रभग्नान्द्रुतान्कर्णः पृष्ठतो विकिरञ्छरैः
अभ्यधावत तेजस्वी विशीर्णकवचध्वजान् ११९
तापयामास तान्बाणैः सूतपुत्रो महारथः
मध्यंदिनमनुप्राप्तो भूतानीव तमोनुदः १२०
इति श्रीमहाभारते कर्णपर्वणि सप्तदशोऽध्यायः १७

अष्टादशोऽध्यायः

सञ्जय उवाच
युयुत्सुं तव पुत्रं तु प्राद्रवन्तं महद्बलम्
उलूकोऽभ्यपतत्तूर्णं तिष्ठ तिष्ठेति चाब्रवीत् १
युयुत्सुस्तु ततो राजञ्शितधारेण पत्रिणा
उलूकं ताडयामास वज्रेणेन्द्र इवाचलम् २
उलूकस्तु ततः क्रुद्धस्तव पुत्रस्य संयुगे
क्षुरप्रेण धनुश्छित्त्वा ताडयामास कर्णिना ३
तदपास्य धनुश्छिन्नं युयुत्सुर्वेगवत्तरम्
अन्यदादत्त सुमहच्चापं संरक्तलोचनः ४
शाकुनिं च ततः षष्ट्या विव्याध भरतर्षभ
सारथिं त्रिभिरानर्छत्तं च भूयो व्यविध्यत ५
उलूकस्तं तु विंशत्या विद्ध्वा हेमविभूषितैः
अथास्य समरे क्रुद्धो ध्वजं चिच्छेद काञ्चनम् ६
स च्छिन्नयष्टिः सुमहाञ्शीर्यमाणो महाध्वजः
पपात प्रमुखे राजन्युयुत्सोः काञ्चनोज्ज्वलः ७
ध्वजमुन्मथितं दृष्ट्वा युयुत्सुः क्रोधमूर्छितः
उलूकं पञ्चभिर्बाणैराजघान स्तनान्तरे ८
उलूकस्तस्य भल्लेन तैलधौतेन मारिष
शिरश्चिच्छेद सहसा यन्तुर्भरतसत्तम ९
जघान चतुरोऽश्वांश्च तं च विव्याध पञ्चभिः

सोऽतिविद्धो बलवता प्रत्यपायाद्रथान्तरम् १०
तं निर्जित्य रणे राजन्नुलूकस्त्वरितो ययौ
पाञ्चालान्सृञ्जयांश्चैव विनिघ्नन्निशितैः शरैः ११
शतानीकं महाराज श्रुतकर्मा सुतस्तव
व्यश्वं सूतरथं चक्रे निमेषार्धादसंभ्रमम् १२
हताश्वे तु रथे तिष्ठञ्शतानीको महाबलः
गदां चिक्षेप संक्रुद्धस्तव पुत्रस्य मारिष १३
सा कृत्वा स्यन्दनं भस्म हयांश्चैव ससारथीन्
पपात धरणीं तूर्णं दारयन्तीव भारत १४
तावुभौ विरथौ वीरौ कुरूणां कीर्तिवर्धनौ
अपाक्रमेतां युद्धार्तौ प्रेक्षमाणौ परस्परम् १५
पुत्रस्तु तव संभ्रान्तो विवित्सो रथमाविशत्
शतानीकोऽपि त्वरितः प्रतिविन्ध्यरथं गतः १६
सुतसोमस्तु शकुनिं विव्याध निशितैः शरैः
नाकम्पयत संरब्धो वार्योघ इव पर्वतम् १७
सुतसोमस्तु तं दृष्ट्वा पितुरत्यन्तवैरिणम्
शरैरनेकसाहस्रैश्छादयामास भारत १८
ताञ्शराञ्शकुनिस्तूर्णं चिच्छेदान्यैः पतत्रिभिः
लघ्वस्त्रश्चित्रयोधी च जितकाशी च संयुगे १९
निवार्य समरे चापि शरांस्तान्निशितैः शरैः
आजघान सुसंक्रुद्धः सुतसोमं त्रिभिः शरैः २०
तस्याश्वान्केतनं सूतं तिलशो व्यधमच्छरैः
श्यालस्तव महावीर्यस्ततस्ते चुक्रुशुर्जनाः २१
हताश्वो विरथश्चैव छिन्नधन्वा च मारिष
धन्वी धनुर्वरं गृह्य रथाद्भूमावतिष्ठत
व्यसृजत्सायकांश्चैव स्वर्णपुङ्खाञ्शिलाशितान् २२
छादयामासुरथ ते तव श्यालस्य तं रथम्
पतंगानामिव व्राताः शरव्राता महारथम् २३
रथोपस्थान्समीक्ष्यापि विव्यथे नैव सौबलः
प्रमृद्नंश्च शरांस्तांस्ताञ्शरव्रातैर्महायशाः २४

तत्रातुष्यन्त योधाश्च सिद्धाश्चापि दिवि स्थिताः
सुतसोमस्य तत्कर्म दृष्ट्वाश्रद्धेयमद्भुतम्
रथस्थं नृपतिं तं तु पदातिः सन्नयोधयत् २५
तस्य तीक्ष्णैर्महावेगैर्भल्लैः संनतपर्वभिः
व्यहनत्कार्मुकं राजा तूणीरंचैव सर्वशः २६
स च्छिन्नधन्वा समरे खड्गमुद्यम्य नानदन्
वैडूर्योत्पलवर्णाभं हस्तिदन्तमयत्सरुम् २७
भ्राम्यमाणं ततस्तं तु विमलाम्बरवर्चसम्
कालोपमं ततो मेने सुतसोमस्य धीमतः २८
सोऽचरत्सहसा खड्गी मण्डलानि सहस्रशः
चतुर्विंशन्महाराज शिक्षाबलसमन्वितः २९
सौबलस्तु ततस्तस्य शरांश्चिक्षेप वीर्यवान्
तानापतत एवाशु चिच्छेद परमासिना ३०
ततः क्रुद्धो महाराज सौबलः परवीरहा
प्राहिणोत्सुतसोमस्य शरानाशीविषोपमान् ३१
चिच्छेद तांश्च खड्गेन शिक्षया च बलेन च
दर्शयँल्लाघवं युद्धे तार्क्ष्यवीर्यसमद्युतिः ३२
तस्य संचरतो राजन्मण्डलावर्तने तदा
क्षुरप्रेण सुतीक्ष्णेन खड्गं चिच्छेद सुप्रभम् ३३
स च्छिन्नः सहसा भूमौ निपपात महानसिः
अवशस्य स्थितं हस्ते तं खड्गं सत्सरुं तदा ३४
छिन्नमाज्ञाय निस्त्रिंशमवप्लुत्य पदानि षट्
प्राविध्यत ततः शेषं सुतसोमो महारथः ३५
स च्छित्त्वा सगुणं चापं रणे तस्य महात्मनः
पपात धरणीं तूर्णं स्वर्णवज्रविभूषितः
सुतसोमस्ततोऽगच्छच्छ्रुतकीर्तेर्महारथम् ३६
सौबलोऽपि धनुर्गृह्यघोरमन्यत्सुदुःसहम्
अभ्ययात्पाण्डवानीकं निघ्नञ्शत्रुगणान्बहून् ३७
तत्र नादो महानासीत्पाण्डवानां विशां पते
सौबलं समरे दृष्ट्वा विचरन्तमभीतवत् ३८

तान्यनीकानि दृप्तानि शस्त्रवन्ति महान्ति च
द्राव्यमाणान्यदृश्यन्त सौबलेन महात्मना ३९
यथा दैत्यचमूं राजन्देवराजो ममर्द ह
तथैव पाण्डवीं सेनां सौबलेयो व्यनाशयत् ४०
धृष्टद्युम्नं कृपो राजन्वारयामास संयुगे
यथा दृप्तं वने नागं शरभो वारयेद्युधि ४१
निरुद्धः पार्षतस्तेन गौतमेन बलीयसा
पदात्पदं विचलितुं नाशक्नोत्तत्र भारत ४२
गौतमस्य वपुर्दृष्ट्वा धृष्टद्युम्नरथं प्रति
वित्रेसुः सर्वभूतानि क्षयं प्राप्तं च मेनिरे ४३
तत्रावोचन्विमनसो रथिनः सादिनस्तथा
द्रोणस्य निधने नूनं संक्रुद्धो द्विपदां वरः ४४
शारद्वतो महातेजा दिव्यास्त्रविदुदारधीः
अपि स्वस्ति भवेदद्य धृष्टद्युम्नस्य गौतमात् ४५
अपीयं वाहिनी कृत्स्ना मुच्येत महतो भयात्
अप्ययं ब्राह्मणः सर्वान्न नो हन्यात्समागतान् ४६
यादृशं दृश्यते रूपमन्तकप्रतिमं भृशम्
गमिष्यत्यद्य पदवीं भारद्वाजस्य संयुगेः ४७
आचार्यः क्षिप्रहस्तश्च विजयी च सदा युधि
अस्त्रवान्वीर्यसंपन्नः क्रोधेन च समन्वितः ४८
पार्षतश्च भृशं युद्धे विमुखोऽद्यापि लक्ष्यते
इत्येवं विविधा वाचस्तावकानां परैः सह ४९
विनिः श्वस्य ततः क्रुद्धः कृपः शारद्वतो नृप
पार्षतं छादयामास निश्चेष्टं सर्वमर्मसु ५०
स वध्यमानः समरे गौतमेन महात्मना
कर्तव्यं न प्रजानाति मोहितः परमाहवे ५१
तमब्रवीत्ततो यन्ता कच्चित्क्षेमं नु पार्षत
ईदृशं व्यसनं युद्धे न ते दृष्टं कदाचन ५२
दैवयोगात्तु ते बाणा नातरन्मर्मभेदिनः
प्रेषिता द्विजमुख्येन मर्माण्युद्दिश्य सर्वशः ५३

व्यावर्तये तत्र रथं नदी वेगमिवार्णवात्
अवध्यं ब्राह्मणं मन्ये येन ते विक्रमो हतः ५४
धृष्टद्युम्नस्ततो राजञ्शनकैरब्रवीद्वचः
मुह्यते मे मनस्तात गात्रे स्वेदश्च जायते ५५
वेपथुं च शरीरे मे रोमहर्षं च पश्य वै
वर्जयन्ब्राह्मणं युद्धे शनैर्याहि यतोऽच्युतः ५६
अर्जुनं भीमसेनं वा समरे प्राप्य सारथे
क्षेममद्य भवेद्यन्तरिति मे नैष्ठिकी मतिः ५७
ततः प्रायान्महाराज सारथिस्त्वरयन्हयान्
यतो भीमो महेष्वासो युयुधे तव सैनिकैः ५८
प्रद्रुतं तु रथं दृष्ट्वा धृष्टद्युम्नस्य मारिष
किरञ्शरशतान्येव गौतमोऽनुययौ तदा ५९
शङ्खं च पूरयामास मुहुर्मुहुररिंदमः
पार्षतं प्राद्रवद्यन्तं महेन्द्र इव शम्बरम् ६०
शिखण्डिनं तु समरे भीष्ममृत्युं दुरासदम्
हार्दिक्यो वारयामास स्मयन्निव मुहुर्मुहुः ६१
शिखण्डी च समासाद्य हृदिकानां महारथम्
पञ्चभिर्निशितैर्भल्लैर्जत्रुदेशे समार्दयत् ६२
कृतवर्मा तु संक्रुद्धो भित्त्वा षष्टिभिराशुगैः
धनुरेकेन चिच्छेद हसन्राजन्महारथः ६३
अथान्यद्धनुरादाय द्रुपदस्यात्मजो बली
तिष्ठ तिष्ठेति संक्रुद्धो हार्दिक्यं प्रत्यभाषत ६४
ततोऽस्य नवतिं बाणान्रुक्मपुङ्खान्सुतेजनान्
प्रेषयामास राजेन्द्र तेऽस्याभ्रश्यन्त वर्मणः ६५
वितथांस्तान्समालक्ष्य पतितांश्च महीतले
क्षुरप्रेण सुतीक्ष्णेन कार्मुकं चिच्छिदे बली ६६
अथैनं छिन्नधन्वानं भग्नशृङ्गमिवर्षभम्
अशीत्या मार्गणैः क्रुद्धो बाह्वोरुरसि चार्दयत् ६७
कृतवर्मा तु संक्रुद्धो मार्गणैः कृतविक्षतः
धनुरन्यत्समादाय समार्गणगणं प्रभो

शिखण्डिनं बाणवरैः स्कन्धदेशेऽभ्यताडयत् ६८
स्कन्धदेशे स्थितैर्बाणैः शिखण्डी च रराज ह
शाखाप्रतानैर्विमलैः सुमहान्स यथा द्रुमः ६९
तावन्योन्यं भृशं विद्ध्वा रुधिरेण समुक्षितौ
अन्योन्यशृङ्गाभिहतौ रेजतुर्वृषभाविव ७०
अन्योन्यस्य वधे यत्नं कुर्वाणौ तौ महारथौ
रथाभ्यां चेरतुस्तत्र मण्डलानि सहस्रशः ७१
कृतवर्मा महाराज पार्षतं निशितैः शरैः
रणे विव्याध सप्तत्या स्वर्णपुङ्खैः शिलाशितैः ७२
ततोऽस्य समरे बाणं भोजः प्रहरतां वरः
जीवितान्तकरं घोरं व्यसृजत्त्वरयान्वितः ७३
स तेनाभिहतो राजन्मूर्च्छामाशु समाविशत्
ध्वजयष्टिं च सहसा शिश्रिये कश्मलावृतः ७४
अपोवाह रणात्तं तु सारथी रथिनां वरम्
हार्दिक्यशरसंतप्तं निःश्वसन्तं पुनः पुनः ७५
पराजिते ततः शूरे द्रुपदस्य सुते प्रभो
प्राद्रवत्पाण्डवी सेना वध्यमाना समन्ततः ७६
इति श्रीमहाभारते कर्णपर्वणि अष्टादशोऽध्यायः १८

एकोनविंशोऽध्यायः

सञ्जय उवाच
श्वेताश्वोऽपि महाराज व्यधमत्तावकं बलम्
यथा वायुः समासाद्य तूलराशिं समन्ततः १
प्रत्युद्ययुस्त्रिगर्तास्तं शिबयः कौरवैः सह
शाल्वाः संशप्तकाश्चैव नारायणबलं च यत् २
सत्यसेनः सत्यकीर्तिर्मित्रदेवः श्रुतंजयः
सौश्रुतिश्चित्रसेनश्च मित्रवर्मा च भारत ३
त्रिगर्तराजः समरे भ्रातृभिः परिवारितः
पुत्रैश्चैव महेष्वासैर्नानाशस्त्रधरैर्युधि ४
ते सृजन्तः सरव्रातान्किरन्तोऽजुनमाहवे

अभ्यद्रवन्त समरे वार्योघा इव सागरम् ५
ते त्वर्जुनं समासाद्य योधाः शतसहस्रशः
अगच्छन्विलयं सर्वे तार्क्ष्यं दृष्ट्वेव पन्नगाः ६
ते वध्यमानाः समरे नाजहुः पाण्डवं तदा
दह्यमाना यथा राजञ्शलभा इव पावकम् ७
सत्यसेनस्त्रिभिर्बाणैर्विव्याध युधि पाण्डवम्
मित्रदेवस्त्रिषष्ट्या च चन्द्रदेवश्च सप्तभिः ८
मित्रवर्मा त्रिसप्तत्या सौश्रुतिश्चापि पञ्चभिः
शत्रुंजयश्च विंशत्या शुशर्मा नवभिः शरैः ९
शत्रुञ्जयं च राजानं हत्वा तत्र शिलाशितैः
सौश्रुतेः सशिरस्त्राणं शिरः कायादपाहरत्
त्वरितश्चन्द्रदेवं च शरैर्निन्ये यमक्षयम् १०
अथेतरान्महाराज यतमानान्महारथान्
पञ्चभिः पञ्चभिर्बाणैरेकैकं प्रत्यवारयत् ११
सत्यसेनस्तु संक्रुद्धस्तोमरं व्यसृजन्महत्
समुद्दिश्य रणे कृष्णं सिंहनादं ननाद च १२
स निर्भिद्य भुजं सव्यं माधवस्य महात्मनः
अयस्मयो महाचण्डो जगाम धरणीं तदा १३
माधवस्य तु विद्धस्य तोमरेण महारणे
प्रतोदः प्रापतद्धस्ताद्रश्मयश्च विशां पते १४
स प्रतोदं पुनर्गृह्य रश्मींश्चैव महायशाः
वाहयामास तानश्वान्सत्यसेनरथंपति १५
विष्वक्सेनं तु निर्भिन्नं प्रेक्ष्य पार्थो धनञ्जयः
सत्यसेनं शरैस्तीक्ष्णैर्दारयित्वा महाबलः १६
ततः सुनिशितैर्बाणैः राज्ञस्तस्य महच्छिरः
कुण्डलोपचितं कायाच्चकर्त पृतनान्तरे १७
तं निहत्य शितैर्बाणैर्मित्रवर्माणमाक्षिपत्
वत्सदन्तेन तीक्ष्णेन सारथिं चास्य मारिष १८
ततः शरशतैर्भूयः संशप्तकगणान्वशी
पातयामास संक्रुद्धः शतशोऽथ सहस्रशः १९

ततो रजतपुङ्खेन राज्ञः शीर्षं महात्मनः
मित्रदेवस्य चिच्छेद क्षुरप्रेण महायशाः
सुशर्माणं च संक्रुद्धो जत्रुदेशे समार्दयत् २०
ततः संशप्तकाः सर्वे परिवार्य धनंजयम्
शस्त्रौघैर्ममृदुः क्रुद्धा नादयन्तो दिशो दश २१
अभ्यर्दितस्तु तैर्जिष्णुः शक्रतुल्यपराक्रमः
एन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे महारथः
ततः शरसहस्राणि प्रादुरासन्विशां पते २२
ध्वजानां छिद्यमानानां कार्मुकाणां च संयुगे
रथानां सपताकानां तूणीराणां शरैः सह २३
अक्षाणामथ योक्त्राणां चक्राणां रश्मिभिः सह
कूबराणां वरूथानां पृषत्कानां च संयुगे २४
अश्मनां पततां चैव प्रासानामृष्टिभिः सह
गदानां परिघाणां च शक्तीनां तोमरैः सह २५
शतघ्नीनां सचक्राणां भुजानामूरुभिः सह
कण्ठसूत्राङ्गदानां च केयूराणां च मारिष २६
हाराणामथ निष्काणां तनुत्राणां च भारत
छत्राणां व्यजनानां च शिरसां मुकुटैः सह
अश्रूयत महाञ्शब्दस्तत्र तत्र विशां पते २७
सकुण्डलानि स्वक्षीणि पूर्णचन्द्रनिभानि च
शिरांस्युर्व्यामदृश्यन्त तारागण इवाम्बरे २८
सुस्रग्वीणि सुवासांसि चन्दनेनोक्षितानि च
शरीराणि व्यदृश्यन्त हतानां च महीतले
गन्धर्वनगराकारं घोरमायोधनं तदा २९
निहतै राजपुत्रैश्च क्षत्रियैश्च महाबलैः
हस्तिभिः पतितैश्चैव तुरगैश्चाभवन्मही
अगम्यमार्गा समरे विशीर्णैरिव पर्वतैः ३०
नासीच्चक्रपथश्चैव पाण्डवस्य महात्मनः
निघ्नतः शात्रवान्भल्लैर्हस्त्यश्वं चामितं महत् ३१
आ तुम्बादवसीदन्ति रथचक्राणि मारिष

रणे विचरतस्तस्य तस्मिँल्लोहितकर्दमे ३२
सीदमानानि चक्राणि समूहुस्तुरगा भृशम्
श्रमेण महता युक्ता मनोमारुतरंहसः ३३
वध्यमानं तु तत्सैन्यं पाण्डुपुत्रेण धन्विना
प्रायशो विमुखं सर्वं नावतिष्ठत संयुगे ३४
ताञ्जित्वा समरे जिष्णुः संशप्तकगणान्बहून्
रराज स महाराज विधूमोऽग्निरिव ज्वलन् ३५
युधिष्ठिरं महाराज विसृजन्तं शरान्बहून्
स्वयं दुर्योधनो राजा प्रत्यगृह्णादभीतवत् ३६
तमापतन्तं सहसा तव पुत्रं महाबलम्
धर्मराजो द्रुतं विद्ध्वा तिष्ठ तिष्ठेति चाब्रवीत् ३७
स च तं प्रतिविव्याध नवभिर्निशितैः शरैः
सारथिं चास्य भल्लेन भृशं क्रुद्धोऽभ्यताडयत् ३८
ततो युधिष्ठिरो राजा हेमपुङ्खाञ्शिलीमुखान्
दुर्योधनाय चिक्षेप त्रयोदश शिलाशितान् ३९
चतुर्भिश्चतुरो वाहांस्तस्य हत्वा महारथः
पञ्चमेन शिरः कायात्सारथेस्तु समाक्षिपत् ४०
षष्ठेन च ध्वजं राज्ञः सप्तमेन च कार्मुकम्
अष्टमेन तथा खड्गं पातयामास भूतले
पञ्चभिर्नृपतिं चापि धर्मराजोऽदयद्भृशम् ४१
हताश्वात्तु रथात्तस्मादवप्लुत्य सुतस्तव
उत्तमं व्यसनं प्राप्तो भूमावेव व्यतिष्ठत ४२
तं तु कृच्छ्रगतं दृष्ट्वा कर्णद्रौणिकृपादयः
अभ्यवर्तन्त सहिताः परीप्सन्तो नराधिपम् ४३
अथ पाण्डुसुताः सर्वे परिवार्य युधिष्ठिरम्
अभ्ययुः समरे राजंस्ततो युद्धमवर्तत ४४
अथ तूर्यसहस्राणि प्रावाद्यन्त महामृधे
क्ष्वेडाः किलकिलाशब्दाः प्रादुरासन्महीपते
यदभ्यगच्छन्समरे पाञ्चालाः कौरवैः सह ४५
नरा नरैः समाजग्मुर्वारणा वरवारणैः

रथाश्च रथिभिः सार्धं हयाश्च हयसादिभिः ४६
द्वंद्वान्यासन्महाराज प्रेक्षणीयानि संयुगे
विस्मापनान्यचिन्त्यानि शस्त्रवन्त्युत्तमानि च ४७
अयुध्यन्त महावेगाः परस्परवधैषिणः
अन्योन्यं समरे जघ्नुर्योधव्रतमनुष्ठिताः
न हि ते समरं चक्रुः पृष्ठतो वै कथंचन ४८
मुहूर्तमेव तद्युद्धमासीन्मधुरदर्शनम्
तत उन्मत्तवद्राजन्निर्मर्यादमवर्तत ४९
रथी नागं समासाद्य विचरन्रणमूर्धनि
प्रेषयामास कालाय शरैः संनतपर्वभिः ५०
नागा हयान्समासाद्य विक्षिपन्तो बहूनथ
द्रावयामासुरत्युग्रास्तत्र तत्र तदा तदा ५१
विद्राव्य च बहूनश्वान्नागा राजन्बलोत्कटाः
विषाणैश्चापरे जघ्नुर्ममृदुश्चापरे भृशम् ५२
साश्वारोहांश्च तुरगान्विषाणैर्बिभिदू रणे
अपरांश्चिक्षिपुर्वेगात्प्रगृह्यातिबलास्तथा ५३
पादातैराहता नागा विवरेषु समन्ततः
चक्रुरार्तस्वरं घोरं व्यद्रवन्त दिशो दश ५४
पदातीनां तु सहसा प्रद्रुतानां महामृधे
उत्सृज्याभरणं तूर्णमवप्लुत्य रणाजिरे ५५
निमित्तं मन्यमानस्तु परिणम्य महागजाः
जगृहुर्बिभिदुश्चैव चित्राण्याभरणानि च ५६
प्रतिमानेषु कुम्भेषु दन्तवेष्टेषु चापरे
निगृहीता भृशं नागाः प्रासतोमरशक्तिभिः ५७
निगृह्य च गदाः केचित्पार्श्वस्थैर्भृशदारुणैः
रथाश्वसादिभिस्तत्र संभिन्ना न्यपतन्भुवि ५८
सरथं सादिनं तत्र अपरे तु महागजाः
भूमावमृद्नन्वेगेन सवर्माणं पताकिनम् ५९
रथं नागाः समासाद्य धुरि गृह्य च मारिष
व्याक्षिपन्सहसा तत्र घोररूपे महामृधे ६०

नाराचैर्निहतश्चापि निपपात महागजः
पर्वतस्येव शिखरं वज्रभग्नं महीतले ६१
योधा योधान्समासाद्य मुष्टिभिर्व्यहनन्युधि
केशेष्वन्योन्यमाक्षिप्य चिच्छिदुर्बिभिदुः सह ६२
उद्यम्य च भुजावन्यो निक्षिप्य च महीतले
पदा चोरः समाक्रम्य स्फुरतो व्यहनच्छिरः ६३
मृतमन्यो महाराज पद्भ्यां ताडितवांस्तदा
जीवतश्च तथैवान्यः शस्त्रं काये न्यमज्जयत् ६४
मुष्टियुद्धं महच्चासीद्योधानां तत्र भारत
तथा केशग्रहश्चोग्रो बाहुयुद्धं च केवलम् ६५
समासक्तस्य चान्येन अविज्ञातस्तथापरः
जहार समरे प्राणान्नानाशस्त्रैरनेकधा ६६
संसक्तेषु च योधेषु वर्तमाने च संकुले
कबन्धान्युत्थितानि स्म शतशोऽथ सहस्रशः ६७
लोहितैः सिच्यमानानि शस्त्राणि कवचानि च
महारङ्गानुरक्तानि वस्त्राणीव चकाशिरे ६८
एवमेतन्महायुद्धं दारुणं भृशसंकुलम्
उन्मत्तरङ्गप्रतिमं शब्देनापूरयज्जगत् ६९
नैव स्वे न परे राजन्विज्ञायन्ते शरातुराः
योद्धव्यमिति युध्यन्ते राजानो जयगृद्धिनः ७०
स्वान्स्वे जघ्नुर्महाराज परांश्चैव समागतान्
उभयोः सेनयोर्वीरैर्व्याकुलं समपद्यत ७१
रथैर्भग्नैर्महाराज वारणैश्च निपातितैः
हयैश्च पतितैस्तत्र नरैश्च विनिपातितैः ७२
अगम्यरूपा पृथिवी मांसशोणितकर्दमा
क्षणेनासीन्महाराज क्षतजौघप्रवर्तिनी ७३
पाञ्चालानवधीत्कर्णस्त्रिगर्तांश्च धनंजयः
भीमसेनः कुरून्राजन्हस्त्यनीकं च सर्वशः ७४
एवमेष क्षयो वृत्तः कुरुपाण्डवसेनयोः
अपराह्णे महाराज काङ्क्षन्त्योर्विपुलं जयम् ७५

इति श्रीमहाभारते कर्णपर्वणि एकोनविंशोऽध्यायः १९

विंशोऽध्यायः

धृतराष्ट्र उवाच
अतितीव्राणि दुःखानि दुःसहानि बहूनि च
तवाहं सञ्जयाश्रौषं पुत्राणां मम संक्षयम् १
तथा तु मे कथयसे यथा युद्धं तु वर्तते
न सन्ति सूत कौरव्या इति मे नैष्ठिकी मतिः २
दुर्योधनस्तु विरथः कृतस्तत्र महारणे
धर्मपुत्रः कथं चक्रे तस्मिन्वा नृपतिः कथम् ३
अपराह्णे कथं युद्धमभवल्लोमहर्षणम्
तन्ममाचक्ष्व तत्त्वेन कुशलो ह्यसि सञ्जय ४
सञ्जय उवाच
संसक्तेषु च सैन्येषु युध्यमानेषु भागशः
रथमन्यं समास्थाय पुत्रस्तव विशां पते ५
क्रोधेन महताविष्टः सविषो भुजगो यथा
दुर्योधनस्तु दृष्ट्वा वै धर्मराजं युधिष्ठिरम्
उवाच सूत त्वरित याहि याहीति भारत ६
अत्र मां प्रापय क्षिप्रं सारथे यत्र पाण्डवः
ध्रियमाणेन छत्रेण राजा राजति दंशितः ७
स सूतश्चोदितो राज्ञा राज्ञः स्यन्दनमुत्तमम्
युधिष्ठिरस्याभिमुखं प्रेषयामास संयुगे ८
ततो युधिष्ठिरः क्रुद्धः प्रमत्त इव सद्गवः
सारथिं चोदयामास याहि यत्र सुयोधनः ९
तौ समाजग्मतुर्वीरौ भ्रातरौ रथसत्तमौ
समेत्य च महावीर्यौ संनद्धौ युद्धदुर्मदौ
ततक्षतुर्महेष्वासौ शरैरन्योन्यमाहवे १०
ततो दुर्योधनो राजा धर्मशीलस्य मारिष
शिलाशितेन भल्लेन धनुश्चिच्छेद संयुगे
तं नामृष्यत संक्रुद्धो व्यवसायं युधिष्ठिरः ११

अपविध्य धनुश्छिन्नं क्रोधसंरक्तलोचनः
अन्यत्कार्मुकमादाय धर्मपुत्रश्चमूमुखे १२
दुर्योधनस्य चिच्छेद ध्वजं कार्मुकमेव च
अथान्यद्धनुरादाय प्रत्यविध्यत पाण्डवम् १३
तावन्योन्यं सुसंरब्धौ शरवर्षाण्यमुञ्चताम्
सिंहाविव सुसंक्रुद्धौ परस्परजिगीषया १४
अन्योन्यं जघ्नतुश्चैव नर्दमानौ वृषाविव
अन्योन्यं प्रेक्षमाणौ च चेरतुस्तौ महारथौ १५
ततः पूर्णायतोत्सृष्टैरन्योन्यं सुकृतव्रणौ
विरेजतुर्महाराज पुष्पिताविव किंशुकौ १६
ततो राजन्प्रतिभयान्सिंहनादान्मुहुर्मुहुः
तलयोश्च तथा शब्दान्धनुषोश्च महाहवे १७
शङ्खशब्दरवांश्चैव चक्रतुस्तौ रथोत्तमौ
अन्योन्यं च महाराज पीडयांचक्रतुर्भृशम् १८
ततो युधिष्ठिरो राजा तव पुत्रं त्रिभिः शरैः
आजघानोरसि क्रुद्धो वज्रवेगो दुरासदः १९
प्रतिविव्याध तं तूर्णं तव पुत्रो महीपतिम्
पञ्चभिर्निशितैर्बाणैर्हेमपुङ्खैः शिलाशितैः २०
ततो दुर्योधनो राजा शक्तिं चिक्षेप भारत
सर्वपारशवीं तीक्ष्णां महोल्काप्रतिमां तदा २१
तामापतन्तीं सहसा धर्मराजः शिलाशितैः
त्रिभिश्चिच्छेद सहसा तं च विव्याध सप्तभिः २२
निपपात ततः साथ हेमदण्डा महाघना
निपतन्ती महोल्केव व्यराजच्छिखिसंनिभा २३
शक्तिं विनिहतां दृष्ट्वा पुत्रस्तव विशां पते
नवभिर्निशितैर्भल्लैर्निजघान युधिष्ठिरम् २४
सोऽतिविद्धो बलवतामग्रणीः शत्रुतापनः
दुर्योधनं समुद्दिश्य बाणं जग्राह सत्वरः २५
समाधत्त च तं बाणं धनुष्युग्रं महाबलः
चिक्षेप च ततो राजा राज्ञः क्रुद्धः पराक्रमी २६

स तु बाणः समासाद्य तव पुत्रं महारथम्
व्यामोयहयत राजानं धरणीं च जगाम ह २७
ततो दुर्योधनः क्रुद्धो गदामुद्यम्य वेगितः
विधित्सुः कलहस्यान्तमभिदुद्राव पाण्डवम् २८
तमालक्ष्योद्यतगदं दण्डहस्तमिवान्तकम्
धर्मराजो महाशक्तिं प्राहिणोत्तव सूनवे
दीप्यमानां महावेगां महोल्कां ज्वलितामिव २९
रथस्थः स तया विद्धो वर्म भित्त्वा महाहवे
भृशं संविग्नहृदयः पपात च मुमोह च ३०
ततस्त्वरितमागत्य कृतवर्मा तवात्मजम्
प्रत्यपद्यत राजानं मग्नं वै व्यसनार्णवे ३१
भीमोऽपि महतीं गृह्य गदां हेमपरिष्कृताम्
अभिदुद्राव वेगेन कृतवर्माणमाहवे
एवं तदभवद्युद्धं त्वदीयानां परैः सह ३२
इति श्रीमहाभारते कर्णपर्वणि विंशोऽध्यायः २०

एक विंशोऽध्यायः

सञ्जय उवाच
ततः कर्णं पुरस्कृत्य त्वदीया युद्धदुर्मदाः
पुनरावृत्य संग्रामं चक्रुर्देवासुरोपमम् १
द्विरदरथनराश्वशङ्खशब्दैः परिहृषिता विविधैश्च शस्त्रपातैः
द्विरदरथपदातिसार्थवाहाः परिपतिताभिमुखाः प्रजह्रिरे ते २
शरपरशुवरासिपट्टिशैरिषुभिरनेकविधैश्च सादिताः
द्विरदरथहया महाहवे वरपुरुषैः पुरुषाश्च वाहनैः ३
कमलदिनकरेन्दुसंनिभैः सितदशनैः सुमुखाक्षिनासिकैः
रुचिरमुकुटकुण्डलैर्मही पुरुषशिरोभिरवस्तृता बभौ ४
परिघमुसलशक्तितोमरैर्नखरभुशुण्डिगदाशतैर्द्रुताः
द्विरदनरहयाः सहस्रशो रुधिरनदीप्रवहास्तदाभवन् ५
प्रहतनररथाश्वकुञ्जरं प्रतिभयदर्शनमुल्बणं तदा
तदहितनिहतं बभौ बलं पितृपतिराष्ट्रमिव प्रजाक्षये ६

अथ तव नरदेव सैनिकास्तव च सुताः सुरसूनुसंनिभाः
अमितबलपुरःसरा रणे कुरुवृषभाः शिनिपुत्रमभ्ययुः ७
तदतिरुचिरभीममाबभौ पुरुषवराश्वरथद्विपाकुलम्
लवणजलसमुद्धतस्वनं बलममरासुरसैन्यसंनिभम् ८
सुरपतिसमविक्रमस्ततस्त्रिदशवरावरजोपमं युधि
दिनकरकिरणप्रभैः पृषत्कै रवितनयोऽभ्यहनच्छिनिप्रवीरम् ९
तमपि सरथवाजिसारथिं शिनिवृषभो विविधैः शरैस्त्वरन्
भुजगविषसमप्रभै रणे पुरुषवरं समवास्तृणोत्तदा १०
शिनिवृषभशरप्रपीडितं तव सुहृदो वसुषेणमभ्ययुः
त्वरितमतिरथा रथर्षभं द्विरदरथाश्वपदातिभिः सह ११
तमुदधिनिभमाद्रवद्बली त्वरिततरैः समभिद्रुतं परैः
द्रुपदसुतसखस्तदाकरोत्पुरुषरथाश्वगजक्षयं महत् १२
अथ पुरुषवरौ कृताह्निकौ भवमभिपूज्य यथाविधि प्रभुम्
अरिवधकृतनिश्चयौ द्रुतं तव बलमर्जुनकेशवौ सृतौ १३
जलदनिनदनिस्वनं रथं पवनविधूतपताककेतनम्
सितहयमुपयान्तमन्तिकं हृतमनसो ददृशुस्तदारयः १४
अथ विस्फार्य गाण्डीवं रणे नृत्यन्निवार्जुनः
शरसंबाधमकरोत्खं दिशः प्रदिशस्तथा १५
रथान्विमानप्रतिमान्सज्जयन्त्रायुधध्वजान्
ससारथींस्तदा बाणैरभ्राणीवानिलोऽवधीत् १६
गजान्गजप्रयन्तॄंश्च वैजयन्त्यायुधध्वजान्
सादिनोऽश्वांश्च पत्तींश्च शरैर्निन्ये यमक्षयम् १७
तमन्तकमिव क्रुद्धमनिवार्यं महारथम्
दुर्योधनोऽभ्ययादेको निघ्नन्बाणैः पृथग्विधैः १८
तस्यार्जुनो धनुः सूतं केतुमश्वांश्च सायकैः
हत्वा सप्तभिरेकैकं छत्रं चिच्छेद पत्रिणा १९
नवमं च समासाद्य व्यसृजत्प्रातिघातिनम्
दुर्योधनायेषुवरं तं द्रौणिः सप्तधाच्छिनत् २०
ततो द्रौणेर्धनुश्छित्त्वा हत्वा चाश्ववराञ्शरैः
कृपस्यापि तथात्युग्रं धनुश्चिच्छेद पाण्डवः २१

हार्दिक्यस्य धनुश्छित्त्वा ध्वजं चाश्वं तथावधीत्
दुःशासनस्येषुवरं छित्त्वा राधेयमभ्ययात् २२
अथ सात्यकिमुत्सृज्य त्वरन्कर्णोऽर्जुनं त्रिभिः
विद्ध्वा विव्याध विंशत्या कृष्णं पार्थं पुनस्त्रिभिः २३
अथ सात्यकिरागत्य कर्णं विद्ध्वा शितैः शरैः
नवत्या नवभिश्चोग्रैः शतेन पुनरार्दयत् २४
ततः प्रवीराः पाण्डूनां सर्वे कर्णमपीडयन्
युधामन्युः शिखण्डी च द्रौपदेयाः प्रभद्रकाः २५
उत्तमौजा युयुत्सुश्च यमौ पार्षत एव च
चेदिकारूषमत्स्यानां केकयानां च यद्बलम्
चेकितानश्च बलबान्धर्मराजश्च सुव्रतः २६
एते रथाश्वद्विरदैः पत्तिभिश्चोग्रविक्रमैः
परिवार्य रणे कर्णं नानाशस्त्रैरवाकिरन्
भाषन्तो वाग्भिरुग्राभिः सर्वे कर्णवधे वृताः २७
तां शस्त्र वृष्टिं बहुधा छित्त्वा कर्णः शितैः शरैः
अपोवाह स्म तान्सर्वान्द्रुमान्भङ्क्त्वेव मारुतः २८
रथिनः समहामात्रान्गजानश्वान्ससादिनः
शरव्रातांश्च संक्रुद्धो निघ्नन्कर्णो व्यदृश्यत २९
तद्वध्यमानं पाण्डूनां बलं कर्णास्त्रतेजसा
विशस्त्रक्षतदेहं च प्राय आसीत्पराङ्मुखम् ३०
अथ कर्णास्त्रमस्त्रेण प्रतिहत्यार्जुनः स्वयम्
दिशः खं चैव भूमिं च प्रावृणोच्छरवृष्टिभिः ३१
मुसलानीव निष्पेतुः परिघा इव चेषवः
शतघ्न्य इव चाप्यन्ये वज्राण्युग्राणि वापरे ३२
तैर्वध्यमानं तत्सैन्यं सपत्त्यश्वरथद्विपम्
निमीलिताक्षमत्यर्थमुदभ्राम्यत्समन्ततः ३३
निष्कवल्यं तदा युद्धं प्रापुरश्वनरद्विपाः
वध्यमानाः शरैरन्ये तदा भीताः प्रदुद्रुवुः ३४
एवं तेषां तदा युद्धे संसक्तानां जयैषिणाम्
गिरिमस्तं समासाद्य प्रत्यपद्यत भानुमान् ३५

तमसा च महाराज रजसा च विशेषतः
न किञ्चित्प्रत्यपश्याम शुभं वा यदि वाशुभम् ३६
ते त्रसन्तो महेष्वासा रात्रियुद्धस्य भारत
अपयानं ततश्चक्रुः सहिताः सर्ववाजिभिः ३७
कौरवेषु च यातेषु तदा राजन्दिनक्षये
जयं सुमनसः प्राप्य पार्थाः स्वशिबिरं ययुः ३८
वादित्रशब्दैर्विविधैः सिंहनादैश्च नर्तितैः
परानवहसन्तश्च स्तुवन्तश्चाच्युतार्जुनौ ३९
कृतेऽवहारे तैर्वीरैः सैनिकाः सर्व एव ते
आशिषः पाण्डवेयेषु प्रायुज्यन्त नरेश्वराः ४०
ततः कृतेऽवहारे च प्रहृष्टाः कुरुपाण्डवाः
निशायां शिबिरं गत्वा न्यविशन्त नरेश्वराः ४१
यक्षरक्षःपिशाचाश्च श्वापदानि च संघशः
जग्मुरायोधनं घोरं रुद्रस्यानर्तनोपमम् ४२
इति श्रीमहाभारते कर्णपर्वणि एकविंशोऽध्यायः २१

द्वाविंशोऽध्यायः

धृतराष्ट्र उवाच
स्वेन च्छन्देन नः सर्वान्नावधीद्व्यक्तमर्जुनः
न ह्यस्य समरे मुच्येतान्तकोऽप्याततायिनः १
पार्थो ह्येकोऽहरद्भद्रामेकश्चाग्निमतर्पयत्
एकश्चेमां महीं जित्वा चक्रे बलिभृतो नृपान् २
एको निवातकवचानवधीद्दिव्यकार्मुकः
एकः किरातरूपेण स्थितं शर्वमयोधयत् ३
एकोऽभ्यरक्षद्भरतानेको भवमतोषयत्
तेनैकेन जिताः सर्वे मदीया उग्रतेजसाः
ते न निन्द्याः प्रशस्याश्च यत्ते चक्रुर्ब्रवीहि तत् ४
सञ्जय उवाच
हतप्रहतविध्वस्ता विवर्मायुधवाहनाः
दीनस्वरा दूयमाना मानिनः शत्रुभिर्जिताः ५

शिबिरस्थाः पुनर्मन्त्रं मन्त्रयन्ति स्म कौरवाः
भग्नदंष्ट्रा हतविषाः पदाक्रान्ता इवोरगाः ६
तानब्रवीत्ततः कर्णः क्रुद्धः सर्प इव श्वसन्
करं करेणाभिपीड्य प्रेक्षमाणस्तवात्मजम् ७
यत्तो दृढश्च दक्षश्च धृतिमानर्जुनः सदा
स बोधयति चाप्येनं प्राप्तकालमधोक्षजः ८
सहसास्त्रविसर्गेण वयं तेनाद्य वञ्चिताः
श्वस्त्वहं तस्य संकल्पं सर्वं हन्ता महीपते ९
एवमुक्तस्तथेत्युक्त्वा सोऽनुजज्ञे नृपोत्तमान्
सुखोषितास्ते रजनीं हृष्टा युद्धाय निर्ययुः १०
तेऽपश्यन्विहितं व्यूहं धर्मराजेन दुर्जयम्
प्रयत्नात्कुरुमुख्येन बृहस्पत्युशनोमतात् ११
अथ प्रतीपकर्तारं सततं विजितात्मनाम्
सस्मार वृषभस्कन्धं कर्णं दुर्योधनस्तदा १२
पुरंदरसमं युद्धे मरुद्गणसमं बले
कार्तवीर्यसमं वीर्ये कर्णं राजोऽगमन्मनः
सूतपुत्रं महेष्वासं बन्धुमात्ययिकेष्विव १३
धृतराष्ट्र उवाच
यद्वोऽगमन्मनो मन्दाः कर्णं वैकर्तनं तदा
अप्यद्राक्षत तं यूयं शीतार्ता इव भास्करम् १४
कृतेऽवहारे सैन्यानां प्रवृत्ते च रणे पुनः
कथं वैकर्तनः कर्णस्तत्रायुध्यत सञ्जय
कथं च पाण्डवाः सर्वे युयुधुस्तत्र सूतजम् १५
कर्णो ह्येको महाबाहुर्हन्यात्पार्थान्ससोमकान्
कर्णस्य भुजयोर्वीर्यं शक्रविष्णुसमं मतम्
तथास्त्राणि सुघोराणि विक्रमश्च महात्मनः १६
दुर्योधनं तदा दृष्ट्वा पाण्डवेन भृशार्दितम्
पराक्रान्तान्पाण्डुसुतान्दृष्ट्वा चापि महाहवे १७
कर्णमाश्रित्य संग्रामे दर्पो दुर्योधने पुनः
जेतुमुत्सहते पार्थान्सपुत्रान्सहकेशवान् १८

अहो बत महद्दुःखं यत्र पाराडुसुतान्रणे
नातरद्रभसः कर्णो दैवं नूनं परायणम्
अहो द्यूतस्य निष्ठेयं घोरा संप्रति वर्तते १९
अहो दुःखानि तीव्राणि दुर्योधनकृतान्यहम्
सहिष्यामि सुघोराणि शल्यभूतानि सञ्जय २०
सौबलं च तथा तात नीतिमानिति मन्यते २१
युद्धेषु नाम दिव्येषु वर्तमानेषु सञ्जय
अश्रौषं निहतान्पुत्रान्नित्यमेव च निर्जितान् २२
न पाराडवानां समरे कश्चिदस्ति निवारकः
स्त्रीमध्यमिव गाहन्ति दैवं हि बलवत्तरम् २३
सञ्जय उवाच
अतिक्रान्तं हि यत्कार्यं पश्चाच्चिन्तयतीति च
तच्चास्य न भवेत्कार्यं चिन्तया च विनश्यति २४
तदिदं तव कार्यं तु दूरप्राप्तं विजानता
न कृतं यत्त्वया पूर्वं प्राप्ताप्राप्तविचारणे २५
उक्तोऽसि बहुधा राजन्मा युध्यस्वेति पाराडवैः
गृह्णीषे न च तन्मोहात्पाराडवेषु विशां पते २६
त्वया पापानि घोराणि समाचीर्णानि पाराडुषु
त्वत्कृते वर्तते घोरः पार्थिवानां जनक्षयः २७
तत्त्विदानीमतिक्रम्य मा शुचो भरतर्षभ
शृणु सर्वं यथावृत्तं घोरं वैशसमच्युत २८
प्रभातायां रजन्यां तु कर्णो राजानमभ्ययात्
समेत्य च महाबाहुर्दुर्योधनमभाषत २९
अद्य राजन्समेष्यामि पाराडवेन यशस्विना
हनिष्यामि च तं वीरं स वा मां निहनिष्यति ३०
बहुत्वान्मम कार्याणां तथा पार्थस्य पार्थिव
नाभूत्समागमो राजन्मम चैवार्जुनस्य च ३१
इदं तु मे यथाप्रज्ञं शृणु वाक्यं विशां पते
अनिहत्य रणे पार्थं नाहमेष्यामि भारत ३२
हतप्रवीरे सैन्येऽस्मिन्मयि चैव स्थिते युधि

अभियास्यति मां पार्थः शक्रशक्त्या विनाकृतम् ३३
ततः श्रेयस्करं यत्ते तन्निबोध जनेश्वर
आयुधानां च यद्वीर्यं द्रव्याणामर्जुनस्य च ३४
कायस्य महतो भेदे लाघवे दूरपातने
सौष्ठवे चास्त्रयोगे च सव्यसाची न मत्समः ३५
सर्वायुधमहामात्रं विजयं नाम तद्धनुः
इन्द्रार्थमभिकामेन निर्मितं विश्वकर्मणा ३६
येन दैत्यगणान्राजञ्जितवान्वै शतक्रतुः
यस्य घोषेण दैत्यानां विमुह्यन्ति दिशो दश
तद्भार्गवाय प्रायच्छच्छक्रः परमसंमतम् ३७
तद्दिव्यं भार्गवो मह्यमददाद्धनुरुत्तमम्
येन योत्स्ये महाबाहुमर्जुनं जयतां वरम्
यथेन्द्रः समरे सर्वान्दैतेयान्वै समागतान् ३८
धनुर्घोरं रामदत्तं गाण्डीवात्तद्विशिष्यते
त्रिः सप्तकृत्वः पृथिवी धनुषा तेन निर्जिता ३९
धनुषो यस्य कर्माणि दिव्यानि प्राह भार्गवः
तद्रामो ह्यददान्मह्यं येन योत्स्यामि पाण्डवम् ४०
अद्य दुर्योधनाहं त्वां नन्दयिष्ये सबान्धवम्
निहत्य समरे वीरमर्जुनं जयतां वरम् ४१
सपर्वत वन द्वीपा हत द्विड्भूः ससागरा
पुत्र पौत्र प्रतिष्ठा ते भविष्यत्यद्य पार्थिव ४२
नासाध्यं विद्यते मेऽद्य त्वत्प्रियार्थं विशेषतः
सम्यग्धर्मानुरक्तस्य सिद्धिरात्मवतो यथा ४३
न हि मां समरे सोढुं स शक्तोऽग्निं तरुर्यथा
अवश्यं तु मया वाच्यं येन हीनोऽस्मि फल्गुनात् ४४
ज्या तस्य धनुषो दिव्या तथाक्षय्यौ महेषुधी
तस्य दिव्यं धनुः श्रेष्ठं गाण्डीवमजरं युधि ४५
विजयं च महद्दिव्यं ममापि धनुरुत्तमम्
तत्राहमधिकः पार्थाद्धनुषा तेन पार्थिव ४६
मया चाभ्यधिको वीरः पाण्डवस्तन्निबोध मे

रश्मिग्राहश्च दाशार्हः सर्वलोकनमस्कृतः ४७
अग्निदत्तश्च वै दिव्यो रथः काञ्चनभूषणः
अच्छेद्यः सर्वतो वीर वाजिनश्च मनोजवाः
ध्वजश्च दिव्यो द्युतिमान्वानरो विस्मयंकरः ४८
कृष्णश्च स्रष्टा जगतो रथं तमभिरक्षति
एभिर्द्रव्यैरहं हीनो योद्धुमिच्छामि पाण्डवम् ४९
अयं तु सदृशो वीरः शल्यः समितिशोभनः
सारथ्यं यदि मे कुर्याद्ध्रुवस्ते विजयो भवेत् ५०
तस्य मे सारथिः शल्यो भवत्वसुकरः परैः
नाराचान्गार्ध्रपत्रांश्च शकटानि वहन्तु मे ५१
रथाश्च मुख्या राजेन्द्र युक्ता वाजिभिरुत्तमैः
आयान्तु पश्चात्सततं मामेव भरतर्षभ ५२
एवमभ्यधिकः पार्थाद्भविष्यामि गुणैरहम्
शल्यो ह्यभ्यधिकः कृष्णादर्जुनादधिको ह्यहम् ५३
यथाश्वहृदयं वेद दाशार्हः परवीरहा
तथा शल्योऽपि जानीते हयानां वै महारथः ५४
बाहुवीर्ये समो नास्ति मद्रराजस्य कश्चन
तथास्त्रैर्मत्समो नास्ति कश्चिदेव धनुर्धरः ५५
तथा शल्यसमो नास्ति हययाने ह कश्चन
सोऽयमभ्यधिकः पार्थाद्भविष्यति रथो मम ५६
एतत्कृतं महाराज त्वयेच्छामि परंतप
एवं कृते कृतं मह्यं सर्वकामैर्भविष्यति ५७
ततो द्रष्टासि समरे यत्करिष्यामि भारत
सर्वथा पाण्डवान्सर्वाञ्जेष्याम्यद्य समागतान् ५८
दुर्योधन उवाच
सर्वमेतत्करिष्यामि यथा त्वं कर्ण मन्यसे
सोपासङ्गा रथाः साश्वा अनुयास्यन्ति सूतज ५९
नाराचान्गार्ध्रपक्षांश्च शकटानि वहन्तु ते
अनुयास्याम कर्ण त्वां वयं सर्वे च पार्थिवाः ६०
सञ्जय उवाच

एवमुक्त्वा महाराज तव पुत्रः प्रतापवान्
अभिगम्याब्रवीद्राजा मद्रराजमिदं वचः ६१
इति श्रीमहाभारते कर्णपर्वणि द्वाविंशतितमोऽध्यायः २२

त्रयोविंशोऽध्यायः

सञ्जय उवाच
पुत्रस्तव महाराज मद्रराजमिदं वचः
विनयेनोपसंगम्य प्रणयाद्वाक्यमब्रवीत् १
सत्यव्रत महाभाग द्विषतामघवर्धन
मद्रेश्वर रणे शूर परसैन्यभयङ्कर २
श्रुतवानसिकर्णस्य ब्रुवतो वदतां वर
यथा नृपतिसिंहानां मध्ये त्वां वरयत्वयम् ३
तस्मात्पार्थविनाशार्थं हितार्थे मम चैव हि
सारथ्यं रथिनां श्रेष्ठ सुमनाः कर्तुमर्हसि ४
अस्याभीशुग्रहो लोके नान्योऽस्ति भवता समः
स पातु सर्वतः कर्णं भवान्ब्रह्मेव शंकरम् ५
पार्थस्य सचिवः कृष्णो यथाभीशुग्रहो वरः
तथा त्वमपि राधेयं सर्वतः परिपालय ६
भीष्मो द्रोणः कृपः कर्णो भवान्भोजश्च वीर्यवान्
शकुनिः सौबलो द्रोणिरहमेव च नो बलम्
एषामेव कृतो भागो नवधा पृतनापते ७
नैव भागोऽत्र भीष्मस्य द्रोणस्य च महात्मनः
ताभ्यामतीत्य तौ भागौ निहता मम शत्रवः ८
वृद्धौ हि तौ नरव्याघ्रौ छलेन निहतौ च तौ
कृत्वा नसुकरं कर्म गतौ स्वर्गमितोऽनघ ९
तथान्ये पुरुषव्याघ्राः परैर्विनिहता युधि
अस्मदीयाश्च बहवः स्वर्गायोपगता रणे
त्यक्त्वा प्राणान्यथाशक्ति चेष्टाः कृत्वा च पुष्कलाः १०
कर्णो ह्येको महाबाहुरस्मत्प्रियहिते रतः
भवांश्च पुरुषव्याघ्र सर्वलोकमहारथः

तस्मिञ्जयाशा विपुला मम मद्रजनाधिप ११
पार्थस्य समरे कृष्णो यथा भीशुवरग्रहः
तेन युक्तो रणे पार्थो रक्ष्यमाणश्च पार्थिव
यानि कर्माणि कुरुते प्रत्यक्षाणि तथैव ते १२
पूर्वं न समरे ह्येवमवधीदर्जुनो रिपून्
अहन्यहनि मद्रेश द्रावयन्दृश्यते युधि १३
भागोऽवशिष्टः कर्णस्य तव चैव महाद्युते
तं भागं सह कर्णेन युगपन्नाशयाहवे १४
सूर्यारुणौ यथा दृष्ट्वा तमो नश्यति मारिष
तथा नश्यन्तु कौन्तेयाः सपाञ्चालाः ससृञ्जयाः १५
रथानां प्रवरः कर्णो यन्तॄणां प्रवरो भवान्
संनिपातः समो लोके भवतोर्नास्ति कश्चन १६
यथा सर्वास्ववस्थासु वार्ष्णेयः पाति पाण्डवम्
तथा भवान्परित्रातु कर्णं वैकर्तनं रणे १७
त्वया सारथिना ह्येष अप्रधृष्यो भविष्यति
देवतानामपि रणे सशक्राणां महीपते
किं पुनः पाण्डवेयानां मातिशङ्कीर्वचो मम १८
दुर्योधनवचः श्रुत्वा शल्यः क्रोधसमन्वितः
त्रिशिखां भ्रुकुटीं कृत्वा धुन्वन्हस्तौ पुनः पुनः १९
क्रोधरक्ते महानेत्रे परिवर्त्य महाभुजः
कुलैश्वर्यश्रुतिबलैर्दृप्तः शल्योऽब्रवीदिदम् २०
अवमन्यसेमां गान्धारे ध्रुवं मां परिशङ्कसे
यन्मां ब्रवीषि विस्रब्धं सारथ्यं क्रियतामिति २१
अस्मत्तोऽभ्यधिकं कर्णं मन्यमानः प्रशंससि
न चाहं युधि राधेयं गणये तुल्यमात्मना २२
आदिश्यतामभ्यधिको ममांशः पृथिवीपते
तमहं समरे हित्वा गमिष्यामि यथागतम् २३
अथ वाप्येक एवाहं योत्स्यामि कुरुनन्दन
पश्य वीर्यं ममाद्य त्वं संग्रामे दहतो रिपून् २४
न चाभिकामान्कौरव्य विधाय हृदये पुमान्

अस्मद्विधः प्रवर्तेत मा मा त्वमतिशङ्किथाः २५
युधि चाप्यवमानो मे न कर्तव्यः कथंचन
पश्य हीमौ मम भुजौ वज्रसंहननोपमौ २६
धनुः पश्य च मे चित्रं शरांश्चाशीविषोपमान्
रथं पश्य च मे क्लृप्तं सदश्वैर्वातवेगितैः
गदां च पश्य गान्धारे हेमपट्ट विभूषिताम् २७
दारयेयं महीं क्रुद्धो विकिरेयं च पर्वतान्
शोषयेयं समुद्रांश्च तेजसा स्वेन पार्थिव २८
तन्मामेवंविधं जानन्समर्थमरिनिग्रहे
कस्माद्युनक्षि सारथ्ये न्यूनस्याधिरथेर्नृप २९
न मामधुरि राजेन्द्र प्रयोक्तुं त्वमिहार्हसि
न हि पापीयसः श्रेयान्भूत्वा प्रेष्यत्वमुत्सहे ३०
यो ह्यभ्युपगतं प्रीत्या गरीयांसं वशे स्थितम्
वशे पापीयसो धत्ते तत्पापमधरोत्तरम् ३१
ब्राह्मणा ब्रह्मणा सृष्टा मुखात्क्षत्रमथोरसः
ऊरुभ्यामसृजद्वैश्याञ्शूद्रान्पद्भ्यामितिश्रुतिः
तेभ्यो वर्णविशेषाश्च प्रतिलोमानुलोमजाः ३२
अथान्योन्यस्य संयोगाच्चातुर्वर्ण्यस्य भारत
गोप्तारः संग्रहीतारो दातारः क्षत्रियाः स्मृताः ३३
याजनाध्यापनैर्विप्रा विशुद्धैश्च प्रतिग्रहैः
लोकस्यानुग्रहार्थाय स्थापिता ब्रह्मणा भुवि ३४
कृषिश्च पाशुपाल्यं च विशां दानं च सर्वशः
ब्रह्मक्षत्रविशां शूद्रा विहिताः परिचारकाः ३५
ब्रह्मक्षत्रस्य विहिताः सूता वै परिचारकाः
न विट्शूद्रस्य तत्रैव शृणु वाक्यं ममानघ ३६
सोऽह मूर्धावसिक्तः सन्राजर्षिकुलसंभवः
महारथः समाख्यातः सेव्यः स्तव्यश्च बन्दिनाम् ३७
सोऽहमेतादृशो भूत्वा नेहारिकुलमर्दन
सूतपुत्रस्य संग्रामे सारथ्यं कर्तुमुत्सहे ३८
अवमानमहं प्राप्य न योत्स्यामि कथंचन

आपृच्छ्य त्वाद्य गान्धारे गमिष्यामि यथागतम् ३९
एवमुक्त्वा नरव्याघ्रः शल्यः समितिशोभनः
उत्थाय प्रययौ तूर्णं राजमध्यादमर्षितः ४०
प्रणयाद्बहुमानाच्च तं निगृह्य सुतस्तव
अब्रवीन्मधुरं वाक्यं साम्ना सर्वार्थसाधकम् ४१
यथा शल्य त्वमात्थेदमेवमेतदसंशयम्
अभिप्रायस्तु मे कश्चित्तं निबोध जनेश्वर ४२
न कर्णोऽभ्यधिकस्त्वत्तः शङ्के नैव कथंचन
न हि मद्रेश्वरो राजा कुर्याद्यदनृतं भवेत् ४३
ऋतमेव हि पूर्वास्ते वहन्ति पुरुषोत्तमाः
तस्मादार्तायनिः प्रोक्तो भवानिति मतिर्मम ४४
शल्यभूतश्च शत्रूणां यस्मात्त्वं भुवि मानद
तस्माच्छल्येति ते नाम कथ्यते पृथिवीपते ४५
यदेव व्याहृतं पूर्वं भवता भूरिदक्षिण
तदेव कुरु धर्मज्ञ मदर्थं यद्यदुच्यसे ४६
न च त्वत्तो हि राधेयो न चाहमपि वीर्यवान्
वृणीमस्त्वां हयाग्र्याणां यन्तारमिति संयुगे ४७
यथा ह्यभ्यधिकं कर्णं गुणैस्तात धनञ्जयात्
वासुदेवादपि त्वां च लोकोऽयमिति मन्यते ४८
कर्णो ह्यभ्यधिकः पार्थादस्त्रैरेव नरर्षभ
भवानप्यधिकः कृष्णादश्वयाने बले तथा ४९
यथाश्वहृदयं वेद वासुदेवो महामनाः
द्विगुणं त्वं तथा वेत्थ मद्रराज न संशयः ५०
शल्य उवाच
यन्मा ब्रवीषि गान्धारे मध्ये सैन्यस्य कौरव
विशिष्टं देवकीपुत्रात्प्रीतिमानस्म्यहं त्वयि ५१
एष सारथ्यमातिष्ठे राधेयस्य यशस्विनः
युध्यतः पाण्डवाग्र्येण यथा त्वं वीर मन्यसे ५२
समयश्च हि मे वीर कश्चिद्वैकर्तनं प्रति
उत्सृजेयं यथाश्रद्धमहं वाचोऽस्य संनिधौ ५३

सञ्जय उवाच
तथेति राजन्पुत्रस्ते सह कर्णेन भारत
अब्रवीन्मद्रराजस्य सुतं भरतसत्तम ५४
इति श्रीमहाभारते कर्णपर्वणि त्रयोविंशोऽध्यायः २३

चतुर्विंशोऽध्यायः

दुर्योधन उवाच
भूय एव तु मद्रेश यत्ते वक्ष्यामि तच्छृणु
यथा पुरा वृत्तमिदं युद्धे देवासुरे विभो १
यदुक्तवान्पितुर्मह्यं मार्कण्डेयो महानृषिः
तदशेषेण ब्रुवतो मम राजर्षि सत्तम
त्वं निबोध न चाप्यत्र कर्तव्या ते विचारणा २
देवानामसुराणां च महानासीत्समागमः
बभूव प्रथमो राजन्संग्रामस्तारकामयः
निर्जिताश्च तदा दैत्या दैवतैरिति नः श्रुतम् ३
निर्जितेषु च दैत्येषु तारकस्य सुतास्त्रयः
ताराक्षः कमलाक्षश्च विद्युन्माली च पार्थिव ४
तप उग्रं समास्थाय नियमे परमे स्थिताः
तपसा कर्शयामासुर्देहान्स्वाञ्शत्रुतापन ५
दमेन तपसा चैव नियमेन च पार्थिव
तेषां पितामहः प्रीतो वरदः प्रददौ वरान् ६
अवध्यत्वं च ते राजन्सर्वभूतेषु सर्वदा
सहिता वरयामासुः सर्वलोकपितामहम् ७
तानब्रवीत्तदा देवो लोकानां प्रभुरीश्वरः
नास्ति सर्वामरत्वं वै निवर्तध्वमितोऽसुराः
वरमन्यं वृणीध्वं वै यादृशं संप्रोचते ८
ततस्ते सहिता राजन्संप्रधार्यासकृद्बहु
सर्वलोकेश्वरं वाक्यं प्रणम्यैनमथाब्रुवन् ९
अस्माकं त्वं वरं देव प्रयच्छेमं पितामह
वयं पुराणि त्रीण्येव समास्थाय महीमिमाम्

विचरिष्यामि लोकेऽस्मिंस्त्वत्प्रसादपुरस्कृताः १०
ततो वर्षसहस्रे तु समेष्यामः परस्परम्
एकीभावं गमिष्यन्ति पुराण्येतानि चानघ ११
समागतानि चैतानि यो हन्याद्भगवंस्तदा
एकेषुणा देववरः स नो मृत्युर्भविष्यति
एवमस्त्विति तान्देवः प्रत्युक्त्वा प्राविशद्दिवम् १२
ते तु लब्धवराः प्रीताः संप्रधार्य परस्परम्
पुरत्रयविसृष्ट्यर्थं मयं वव्रुर्महासुरम्
विश्वकर्माणमजरं दैत्यदानवपूजितम् १३
ततो मयः स्वतपसा चक्रे धीमान्पुराणि ह
त्रीणि काञ्चनमेकं तु रौप्यं कार्ष्णायसं तथा १४
काञ्चनं दिवि तत्रासीदन्तरिक्षे च राजतम्
आयसं चाभवद्भूमौ चक्रस्थं पृथिवीपते १५
एकैकं योजनशतं विस्तारायामसंमितम्
गृहाट्टाट्टालकयुतं बृहत्प्राकारतोरणम् १६
गुणप्रसवसंबाधमसंबाधमनामयम्
प्रासादैर्विविधैश्चैव द्वारैश्चाप्युपशोभितम् १७
पुरेषु चाभवन्राजन्राजानो वै पृथक्पृथक्
काञ्चनं तारकाक्षस्य चित्रमासीन्महात्मनः
राजतं कमलाक्षस्य विद्युन्मालिन आयसम् १८
त्रयस्ते दैत्यराजानस्त्रीँल्लोकानाशु तेजसा
आक्रम्य तस्थुर्वर्षाणां पूगान्नाम प्रजापतिः १९
तेषां दानवमुख्यानां प्रयुतान्यर्बुदानि च
कोट्यश्चाप्रतिवीराणां समाजग्मुस्ततस्ततः
महदैश्वर्यमिच्छन्तस्त्रिपुरं दुर्गमाश्रिताः २०
सर्वेषां च पुनस्तेषां सर्वयोगवहो मयः
तमाश्रित्य हि ते सर्वे अवर्तन्ताकुतोभयाः २१
यो हि यं मनसा कामं दध्यौ त्रिपुरसंश्रयः
तस्मै कामं मयस्तं तं विदधे मायया तदा २२
तारकाक्षसुतश्चासीद्धरिर्नाम महाबलः

तपस्तेपे परमकं येनातुष्यत्पितामहः २३
स तुष्टमवृणोद्देवं वापी भवतु नः पुरे
शस्त्रैर्विनिहता यत्र क्षिप्ताः स्युर्बलवत्तराः २४
स तु लब्ध्वा वरं वीरस्तारकाक्षसुतो हरिः
ससृजे तत्र वापीं तां मृतानां जीवनीं प्रभो २५
येन रूपेण दैत्यस्तु येन वेषेण चैव ह
मृतस्तस्यां परिक्षिप्तस्तादृशेनैव जज्ञिवान् २६
तां प्राप्य त्रैपुरस्थास्तु सर्वाँल्लोकान्बबाधिरे
महता तपसा सिद्धाः सुराणां भयवर्धनाः
न तेषामभवद्राजन्क्षयो युद्धे कथंचन २७
ततस्ते लोभमोहाभ्यामभिभूता विचेतसः
निर्ह्रीकाः संस्थितिं सर्वे स्थापितां समलूलुपन् २८
विद्राव्य सगणान्देवांस्तत्र तत्र तदा तदा
विचेरुः स्वेन कामेन वरदानेन दर्पिताः २९
देवारण्यानि सर्वाणि प्रियाणि च दिवौकसाम्
ऋषीणामाश्रमान्पुण्यान्यूपाञ्जनपदांस्तथा
व्यनाशयन्त मर्यादा दानवा दुष्टचारिणः ३०
ते देवाः सहिताः सर्वे पितामहमरिंदम
अभिजग्मुस्तदाख्यातुं विप्रकारं सुरेतरैः ३१
ते तत्त्वं सर्वमाख्याय शिरसाभिप्रणम्य च
वधोपायमपृच्छन्त भगवन्तं पितामहम् ३२
श्रुत्वा तद्भगवान्देवो देवानिदमुवाच ह
असुराश्च दुरात्मानस्ते चापि विबुधद्विषः
अपराध्यन्ति सततं ये युष्मान्पीडयन्त्युत ३३
अहं हि तुल्यः सर्वेषां भूतानां नात्र संशयः
अधार्मिकास्तु हन्तव्या इत्यहं प्रब्रवीमि वः ३४
ते यूयं स्थाणुमीशानं जिष्णुमक्लिष्टकारिणम्
योद्धारं वृणुतादित्याः स तान्हन्ता सुरेतरान् ३५
इति तस्य वचः श्रुत्वा देवाः शक्रपुरोगमाः
ब्रह्माणमग्रतः कृत्वा वृषाङ्कं शरणं ययुः ३६

तपः परं समातस्थुर्गृणन्तो ब्रह्म शाश्वतम्
ऋषिभिः सह धर्मज्ञा भवं सर्वात्मना गताः ३७
तुष्टुवुर्वाग्भिरर्थ्याभिर्भयेष्वभयकृत्तमम्
सर्वात्मानं महात्मानं येनाप्तं सर्वमात्मना ३८
तपोविशेषैर्बहुभिर्योगं यो वेद चात्मनः
यः सांख्यमात्मनो वेद यस्य चात्मा वशे सदा ३९
ते तं ददृशुरीशानं तेजोराशिमुमापतिम्
अनन्यसदृशं लोके व्रतवन्तमकल्मषम् ४०
एकं च भगवन्तं ते नानारूपमकल्पयन्
आत्मनः प्रतिरूपाणि रूपाण्यथ महात्मनि
परस्परस्य चापश्यन्सर्वे परमविस्मिताः ४१
सर्वभूतमयं चेशं तमजं जगतः पतिम्
देवा ब्रह्मर्षयश्चैव शिरोभिर्धरणीं गताः ४२
तान्स्वस्तिवाक्येनाभ्यर्च्य समुत्थाप्य च शंकरः
ब्रूत ब्रूतेति भगवान्स्मयमानोऽभ्यभाषत ४३
त्र्यम्बकेणाभ्यनुज्ञातास्ततस्तेऽस्वस्थचेतसः
नमो नमस्तेऽस्तु विभो तत इत्यब्रुवन्भवम् ४४
नमो देवातिदेवाय धन्विने चातिमन्यवे
प्रजापतिमखघ्नाय प्रजापतिभिरीड्यसे ४५
नमः स्तुताय स्तुत्याय स्तूयमानाय मृत्यवे
विलोहिताय रुद्राय नीलग्रीवाय शूलिने ४६
अमोघाय मृगाक्षाय प्रवरायुधयोधिने
दुर्वारणाय शुक्राय ब्रह्मणे ब्रह्मचारिणे ४७
ईशानायाप्रमेयाय नियन्त्रे चर्मवाससे
तपोनित्याय पिङ्गाय व्रतिने कृत्तिवाससे ४८
कुमारपित्रे त्र्यक्षाय प्रवरायुधधारिणे
प्रपन्नार्तिविनाशाय ब्रह्मद्विट्सङ्घघातिने ४९
वनस्पतीनां पतये नराणां पतये नमः
गवां च पतये नित्यं यज्ञानां पतये नमः ५०
नमोऽस्तु ते ससैन्याय त्र्यम्बकायोग्रतेजसे

मनोवाक्कर्मभिर्देव त्वां प्रपन्नान्भजस्व नः ५१
ततः प्रसन्नो भगवान्स्वागतेनाभिनन्द्य तान्
प्रोवाच व्येतु वस्त्रासो ब्रूत किं करवाणि वः ५२
पितृदेवर्षिसङ्घेभ्यो वरे दत्ते महात्मना
सत्कृत्य शङ्करं प्राह ब्रह्मा लोकहितं वचः ५३
तवातिसर्गाद्देवेश प्राजापत्यमिदं पदम्
मयाधितिष्ठता दत्तो दानवेभ्यो महान्वरः ५४
तानतिक्रान्तमर्यादान्नान्यः संहर्तुमर्हति
त्वामृते भूतभव्येश त्वं ह्येषां प्रत्यरिर्वधे ५५
स त्वं देव प्रपन्नानां याचतां च दिवौकसाम्
कुरु प्रसादं देवेश दानवाञ्जहि शूलभृत् ५६
श्रीभगवानुवाच
हन्तव्याः शत्रवः सर्वे युष्माकमिति मे मतिः
न त्वेकोऽह वधे तेषां समर्थो वै सुरद्विषाम् ५७
ते यूयं सहिताः सर्वे मदीयेनास्त्रतेजसा
जयध्वं युधि ताञ्शत्रून्संघातो हि महाबलः ५८
देवा ऊचुः
अस्मत्तेजोबलं यावत्तावद्द्विगुणमेव च
तेषामिति हि मन्यामो दृष्टतेजोबला हि ते ५९
भगवानुवाच
वध्यास्ते सर्वतः पापा ये युष्मास्वपराधिनः
मम तेजोबलार्धेन सर्वांस्तान्घत शात्रवान् ६०
देवा ऊचुः
बिभर्तुं तेजसोऽध ते न शक्ष्यामो महेश्वर
सर्वेषां नो बलार्धेन त्वमेव जहि शात्रवान् ६१
दुर्योधन उवाच
ततस्तथेति देवेशस्तैरुक्तो राजसत्तम
अर्धमादाय सर्वेभ्यस्तेजसाभ्यधिकोऽभवत् ६२
स तु देवो बलेनासीत्सर्वेभ्यो बलवत्तरः
महादेव इति ख्यातस्तदाप्रभृति शंकरः ६३

ततोऽब्रवीन्महादेवो धनुर्बाणधरस्त्वहम्
हनिष्यामि रथेनाजौ तान्रिपून्वै दिवौकसः ६४
ते यूयं मे रथं चैव धनुर्बाणं तथैव च
पश्यध्वं यावदद्यैतान्पातयामि महीतले ६५
देवा ऊचुः
मूर्तिसर्वस्वमादाय त्रैलोक्यस्य ततस्ततः
रथं ते कल्पयिष्याम देवेश्वर महौजसम् ६६
तथैव बुद्ध्या विहितं विश्वकर्मकृतं शुभम्
ततो विबुधशार्दूलास्तं रथं समकल्पयन् ६७
वन्धुरं पृथिवीं देवीं विशालपुरमालिनीम्
सपर्वतवनद्वीपां चक्रुर्भूतधरां तदा ६८
मन्दरं पर्वतं चाक्षं जङ्घास्तस्य महानदीः
दिशश्च प्रदिशश्चैव परिवारं रथस्य हि ६९
अनुकर्षान्ग्रहान्दीप्तान्वरूथं चापि तारकाः
धर्मार्थकामसंयुक्तं त्रिवेणुं चापि बन्धुरम्
ओषधीर्विविधास्तत्र नानापुष्पफलोद्गमाः ७०
सूर्याचन्द्रमसौ कृत्वा चक्रे रथवरोत्तमे
पक्षौ पूर्वापरौ तत्र कृते रात्र्यहनी शुभे ७१
दश नागपतीनीषां धृतराष्ट्रमुखान्दृढाम्
द्यां युगं युगचर्माणि संवर्तकबलाहकान् ७२
शम्यां धृतिं च मेधां च स्थितिं संनतिमेव च
ग्रहनक्षत्रताराभिश्चर्म चित्रं नभस्तलम् ७३
सुराम्बुप्रेतवित्तानां पतींल्लोकेश्वरान्हयान्
सिनीवालीमनुमतिं कुहूं राकां च सुव्रताम्
योक्त्राणि चक्रुर्वाहानां रोहकांश्चापि कण्ठकम् ७४
कर्म सत्यं तपोऽर्थश्च विहितास्तत्र रश्मयः
अधिष्ठानं मनस्त्वासीत्परिरथ्यं सरस्वती ७५
नानावर्णाश्च चित्राश्च पताकाः पवनेरिताः
विद्युदिन्द्रधनुर्नद्धं रथं दीप्तं व्यदीपयत् ७६
एवं तस्मिन्महाराज कल्पिते रथसत्तमे

देवैर्मनुजशार्दूल द्विषतामभिमर्दने ७७
स्वान्यायुधानि मुख्यानि न्यदधाच्छंकरो रथे
रथयष्टिं वियत्कृष्टां स्थापयामास गोवृषम् ७८
ब्रह्मदण्डः कालदण्डो रुद्रदण्डस्तथा ज्वरः
परिस्कन्दा रथस्यास्य सर्वतोदिशमुद्यताः ७९
अथर्वाङ्गिरसावास्तां चक्ररक्षौ महात्मनः
ऋग्वेदः सामवेदश्च पुराणं च पुरःसराः ८०
इतिहासयजुर्वेदौ पृष्ठरक्षौ बभूवतुः
दिव्या वाचश्च विद्याश्च परिपार्श्वचराः कृताः ८१
तोत्रादयश्च राजेन्द्र वषट्कारस्तथैव च
ॐकारश्च मुखे राजन्नतिशोभाकरोऽभवत् ८२
विचित्रमृतुभिः षड्भिः कृत्वा संवत्सरं धनुः
तस्मान्नृणां कालरात्रिर्ज्या कृता धनुषोऽजरा ८३
इषुश्चाप्यभवद्विष्णुर्ज्वलनः सोम एव च
अग्नीषोमौ जगत्कृत्स्नं वैष्णवं चोच्यते जगत् ८४
विष्णुश्चात्मा भगवतो भवस्यामिततेजसः
तस्माद्धनुर्ज्यासंस्पर्शं न विषेहुर्हरस्य ते ८५
तस्मिञ्शरे तिग्ममन्युर्मुमोचाविषहं प्रभुः
भृग्वङ्गिरोमन्युभवं क्रोधाग्निमतिदुःसहम् ८६
स नीललोहितो धूम्रः कृत्तिवासा भयङ्करः
आदित्यायुतसंकाशस्तेजोज्वालावृतो ज्वलन् ८७
दुश्च्यावश्च्यावनो जेता हन्ता ब्रह्मद्विषां हरः
नित्यं त्राता च हन्ता च धर्माधर्माश्रिताञ्जनान् ८८
प्रमाथिभिर्घोररूपैर्भीमोदग्रैर्गणैर्वृतः
विभाति भगवान्स्थाणुस्तैरेवात्मगुणैर्वृतः ८९
तस्याङ्गानि समाश्रित्य स्थितं विश्वमिदं जगत्
जङ्गमाजङ्गमं राजञ्शुशुभेऽद्भुतदर्शनम् ९०
दृष्ट्वा तु तं रथं दिव्यं कवची स शरासनी
बाणमादत्त तं दिव्यं सोमविष्णवग्निसम्भवम् ९१
तस्य वाजांस्ततो देवाः कल्पयांचक्रिरे विभोः

पुरयगन्धवहं राजञ्श्वसनं राजसत्तम ९२
तमास्थाय महादेवस्त्रासयन्दैवतान्यपि
ग्रारुरोह तदा यत्तः कम्पयन्निव रोदसी ९३
स शोभमानो वरदः खड्गी बाणी शरासनी
हसन्निवाब्रवीद्देवो सारथिः को भविष्यति ९४
तमब्रुवन्देवगणा यं भवान्संनियोच्यते
स भविष्यति देवेश सारथिस्ते न संशयः ९५
तानब्रवीत्पुनर्देवो मत्तः श्रेष्ठतरो हि यः
तं सारथिं कुरुध्वं मे स्वयं संचिन्त्य माचिरम् ९६
एतच्छ्रुत्वा ततो देवा वाक्यमुक्तं महात्मना
गत्वा पितामहं देवं प्रसाद्यैवं वचोऽब्रुवन् ९७
देव त्वयेदं कथितं त्रिदशारिनिबर्हणम्
तथा च कृतमस्माभिः प्रसन्नो वृषभध्वजः ९८
रथश्च विहितोऽस्माभिर्विचित्रायुधसंवृतः
सारथिं तु न जानीमः कः स्यात्तस्मिन्रथोत्तमे ९९
तस्माद्विधीयतां कश्चित्सारथिर्देवसत्तम
सफलां तां गिरं देव कर्तुमर्हसि नो विभो १००
एवमस्मासु हि पुरा भगवन्नुक्तवानसि
हितं कर्तास्मि भवतामिति तत्कर्तुमर्हसि १०१
स देव युक्तो रथसत्तमो नो दुरावरो द्रावणः शात्रवाणाम्
पिनाकपाणिर्विहितोऽत्र योद्धा विभीषयन्दानवानुद्यतोऽसौ १०२
तथैव वेदाश्चतुरो हयाग्र्या धरा सशैला च रथो महात्मन्
नक्षत्रवंशोऽनुगतो वरूथे यस्मिन्योद्धा सारथिनाभिरक्ष्यः १०३
तत्र सारथिरेष्टव्यः सर्वैरेतैर्विशेषवान्
तत्प्रतिष्ठो रथो देव हया योद्धा तथैव च
कवचानि च शस्त्राणि कार्मुकं च पितामह १०४
त्वामृते सारथिं तत्र नान्यं पश्यामहे वयम्
त्वं हि सर्वैर्गुणैर्युक्तो देवताभ्योऽधिकः प्रभो
सारथ्ये तूर्णमारोह संयच्छ परमान्हयान् १०५
इति ते शिरसा नत्वा त्रिलोकेशं पितामहम्

देवाः प्रसादयामासुः सारथ्यायेति नः श्रुतम् १०६
ब्रह्मोवाच
नात्र किञ्चिन्मृषा वाक्यं यदुक्तं वो दिवौकसः
संयच्छामि हयानेष युध्यतो वै कपर्दिनः १०७
ततः स भगवान्देवो लोकस्रष्टा पितामहः
सारथ्ये कल्पितो देवैरीशानस्य महात्मनः १०८
तस्मिन्नारोहति क्षिप्रं स्यन्दनं लोकपूजिते
शिरोभिरगमंस्तूर्णं ते हया वातरंहसः १०९
महेश्वरे त्वारुहति जानुभ्यामगमन्महीम् ११०
अभीशून्हि त्रिलोकेशः संगृह्य प्रपितामहः
तानश्वांश्चोदयामास मनोमारुतरंहसः १११
ततोऽधिरूढे वरदे प्रयाते चासुरान्प्रति
साधु साध्विति विश्वेशः स्मयमानोऽभ्यभाषत ११२
याहि देव यतो दैत्याश्चोदयाश्वानतन्द्रितः
पश्य बाह्वोर्बलं मेऽद्य निघ्नतः शात्रवान्रणे ११३
ततस्तांश्चोदयामास वायुवेगसमाञ्जवे
येन तत्त्रिपुरं राजन्दैत्यदानवरक्षितम् ११४
अथाधिज्यं धनुः कृत्वा शर्वः संधाय तं शरम्
युक्त्वा पाशुपतास्त्रेण त्रिपुरं समचिन्तयत् ११५
तस्मिन्स्थिते तदा राजन्क्रुद्धे विधृतकार्मुके
पुराणि तानि कालेन जग्मुरेकत्वतां तदा ११६
एकीभावं गते चैव त्रिपुरे समुपागते
बभूव तुमुलो हर्षो दैवतानां महात्मनाम् ११७
ततो देवगणाः सर्वे सिद्धाश्च परमर्षयः
जयेति वाचो मुमुचुः संस्तुवन्तो मुदान्विताः ११८
ततोऽग्रतः प्रादुरभूत्त्रिपुरं जघ्नुषोऽसुरान्
अनिर्देश्योग्रवपुषो देवस्यासह्यतेजसः ११९
स तद्विकृष्य भगवान्दिव्यं लोकेश्वरो धनुः
त्रैलोक्यसारं तमिषुं मुमोच त्रिपुरं प्रति
तत्सासुरगणंदग्ध्वा प्राक्षिपत्पश्चिमार्णवे १२०

एवं तत्त्रिपुरं दग्धं दानवाश्चाप्यशेषतः
महेश्वरेण क्रुद्धेन त्रैलोक्यस्य हितैषिणा १२१
स चात्मक्रोधजो वह्निर्हाहेत्युक्त्वा निवारितः
मा कार्षीर्भस्मसाल्लोकानिति त्र्यक्षोऽब्रवीच्च तम् १२२
ततः प्रकृति मापन्ना देवा लोकास्तथर्षयः
तुष्टुवुर्वाग्भिरर्थ्याभिः स्थाणुमप्रतिमौजसम् १२३
तेऽनुज्ञाता भगवता जग्मुः सर्वे यथागतम्
कृतकामाः प्रसन्नेन प्रजापतिमुखाः सुराः १२४
यथैव भगवान्ब्रह्मा लोकधाता पितामहः
संयच्छ त्वं हयानस्य राधेयस्य महात्मनः १२५
त्वं हि कृष्णाच्च कर्णाच्च फल्गुनाच्च विशेषतः
विशिष्टो राजशार्दूल नास्ति तत्र विचारणा १२६
युद्धे ह्ययं रुद्रकल्पस्त्वं च ब्रह्मसमोऽनघ
तस्माच्छक्तौ युवां जेतुं मच्छत्रूंस्ताविवासुरान् १२७
यथा शल्याद्य कर्णोऽय श्वेताश्वं कृष्णसारथिम्
प्रमथ्य हन्यात्कौन्तेयं तथा शीघ्रं विधीयताम्
त्वयि कर्णश्च राज्यं च वयं चैव प्रतिष्ठिताः १२८
इमं चाप्यपरं भूय इतिहासं निबोध मे
पितुर्मम सकाशे यं ब्राह्मणः प्राह धर्मवित् १२९
श्रुत्वा चैतद्वचश्चित्रं हेतुकार्यार्थसंहितम्
कुरुशल्य विनिश्चित्य मा भूदत्र विचारणा १३०
भार्गवाणां कुले जातो जमदग्निर्महातपाः
तस्य रामेति विख्यातः पुत्रस्तेजोगुणान्वितः १३१
स तीव्रं तप आस्थाय प्रसादयितवान्भवम्
अस्त्रहेतोः प्रसन्नात्मा नियतः संयतेन्द्रियः १३२
तस्य तुष्टो महादेवो भक्त्या च प्रशमेन च
हृद्गतं चास्य विज्ञाय दर्शयामास शङ्करः १३३
ईश्वर उवाच
राम तुष्टोऽस्मि भद्रं ते विदितं मे तवेप्सितम्
कुरुष्व पूतमात्मानं सर्वमेतदवाप्स्यसि १३४

दास्यामि ते तदास्त्राणि यदा पूतो भविष्यसि
अपात्रमसमर्थं च दहन्त्यस्त्राणि भार्गव १३५
इत्युक्तो जामदग्न्यस्तु देवदेवेन शूलिना
प्रत्युवाच महात्मानं शिरसावनतः प्रभुम् १३६
यदा जानासि देवेश पात्रं मामस्त्रधारणे
तदा शुश्रूषतेऽस्त्राणि भवान्मे दातुमर्हति १३७
दुर्योधन उवाच
ततः स तपसा चैव दमेन नियमेन च
पूजोपहारबलिभिर्होममन्त्रपुरस्कृतैः १३८
आराधयितवाञ्शर्वं बहून्वर्षगणांस्तदा
प्रसन्नश्च महादेवो भार्गवस्य महात्मनः १३९
अब्रवीत्तस्य बहुशो गुणान्देव्याः समीपतः
भक्तिमानेष सततं मयि रामो दृढव्रतः १४०
एवं तस्य गुणान्प्रीतो बहुशोऽकथयत्प्रभुः
देवतानां पितॄणां च समक्षमरिसूदनः १४१
एतस्मिन्नेव काले तु दैत्या आसन्महाबलाः
तैस्तदा दर्पमोहान्धैरबाध्यन्त दिवौकसः १४२
ततः सम्भूय विबुधास्तान्हन्तुं कृतनिश्चयाः
चक्रुः शत्रुवधे यत्नं न शेकुर्जेतुमेव ते १४३
अभिगम्य ततो देवा महेश्वरमथाब्रुवन्
प्रसादयन्तस्तं भक्त्या जहि शत्रुगणानिति १४४
प्रतिज्ञाय ततो देवो देवतानां रिपुक्षयम्
रामं भार्गवमाहूय सोऽभ्यभाषत शंकरः १४५
रिपून्भार्गव देवानां जहि सर्वान्समागतान्
लोकानां हितकामार्थं मत्प्रीत्यर्थं तथैव च १४६
राम उवाच
अकृतास्त्रस्य देवेश का शक्तिर्मे महेश्वर
निहन्तुं दानवान्सर्वान्कृतास्त्रान्युद्धदुर्मदान् १४७
ईश्वर उवाच
गच्छ त्वं मदनुध्यानान्निहनिष्यसि दानवान्

विजित्य च रिपून्सर्वान्गुणान्प्राप्स्यसि पुष्कलान् १४८
दुर्योधन उवाच
एतच्छ्रुत्वा च वचनं प्रतिगृह्य च सर्वशः
रामः कृतस्वस्त्ययनः प्रययौ दानवान्प्रति १४९
अवधीद्देवशत्रूंस्तान्मददर्पबलान्वितान्
वज्राशनिसमस्पर्शैः प्रहारैरेव भार्गवः १५०
स दानवैः क्षततनुर्जामदग्न्यो द्विजोत्तमः
संस्पृष्टः स्थाणुना सद्यो निर्व्रणः समजायत १५१
प्रीतश्च भगवान्देवः कर्मणा तेन तस्य वै
वरान्प्रादाद्ब्रह्मविदे भार्गवाय महात्मने १५२
उक्तश्च देवदेवेन प्रीतियुक्तेन शूलिना
निपातात्तव शस्त्राणां शरीरे याभवद्रुजा १५३
तया ते मानुषं कर्म व्यपोढं भृगुनन्दन
गृहाणास्त्राणि दिव्यानि मत्सकाशाद्यथेप्सितम् १५४
ततोऽस्त्राणि समस्तानि वरांश्च मनसेप्सितान्
लब्ध्वा बहुविधान्रामः प्रणम्य शिरसा शिवम् १५५
अनुज्ञां प्राप्य देवेशाज्जगाम स महातपाः
एवमेतत्पुरावृत्तं तदा कथितवानृषिः १५६
भार्गवोऽप्यददात्सर्वं धनुर्वेदं महात्मने
कर्णाय पुरुषव्याघ्र सुप्रीतेनान्तरात्मना १५७
वृजिनं हि भवेत्किंचिद्यदि कर्णस्य पार्थिव
नास्मै ह्यस्त्राणि दिव्यानि प्रादास्यद्भृगुनन्दनः १५८
नापि सूतकुले जातं कर्णं मन्ये कथञ्चन
देवपुत्रमहं मन्ये क्षत्रियाणां कुलोद्भवम् १५९
सकुण्डलं सकवचं दीर्घबाहुं महारथम्
कथमादित्यसदृशं मृगी व्याघ्रं जनिष्यति १६०
पश्य ह्यस्य भुजौ पीनौ नागराजकरोपमौ
वक्षः पश्य विशालं च सर्वशत्रुनिबर्हणम् १६१
इति श्रीमहाभारते कर्णपर्वणि चतुर्विंशोऽध्यायः २४

पञ्चविंशोऽध्यायः

दुर्योधन उवाच
एवं स भगवान्देवः सर्वलोकपितामहः
सारथ्यमकरोत्तत्र यत्र रुद्रोऽभवद्रथी १
रथिनाभ्यधिको वीरः कर्तव्यो रथसारथिः
तस्मात्त्वं पुरुषव्याघ्र नियच्छ तुरगान्युधि २
सञ्जय उवाच
ततः शल्यः परिष्वज्य सुतं ते वाक्यमब्रवीत्
दुर्योधनममित्रघ्नः प्रीतो मद्राधिपस्तदा ३
एवं चेन्मन्यसे राजन्गान्धारे प्रियदर्शन
तस्मात्ते यत्प्रियं किञ्चित्तत्सर्वं करवाण्यहम् ४
यत्रास्मि भरतश्रेष्ठ योग्यः कर्मणि कर्हिचित्
तत्र सर्वात्मना युक्तो वक्ष्ये कार्यधुरं तव ५
यत्तु कर्णमहं ब्रूयां हितकामः प्रियाप्रियम्
मम तत्क्षमतां सर्वं भवान्कर्णश्च सर्वशः ६
कर्ण उवाच
ईशानस्य यथा ब्रह्मा यथा पार्थस्य केशवः
तथा नित्यं हिते युक्तो मद्रराज भजस्व नः ७
शल्य उवाच
आत्मनिन्दात्मपूजा च परनिन्दा परस्तवः
अनाचरितमार्याणां वृत्तमेतच्चतुर्विधम् ८
यत्तु विद्वन्प्रवक्ष्यामि प्रत्ययार्थमहं तव
आत्मनः स्तवसंयुक्तं तन्निबोध यथातथम् ९
अहं शक्रस्य सारथ्ये योग्यो मातलिवत्प्रभो
अप्रमादप्रयोगाच्च ज्ञानविद्याचिकित्सितैः १०
ततः पार्थेन संग्रामे युध्यमानस्य तेऽनघ
वाहयिष्यामि तुरगान्विज्वरो भव सूतज ११
इति श्रीमहाभारते कर्णपर्वणि पञ्चविंशोऽध्यायः २५

षड्विंशोऽध्यायः

दुर्योधन उवाच
अयं ते कर्ण सारथ्यं मद्रराजः करिष्यति
कृष्णादभ्यधिको यन्ता देवेन्द्रस्येव मातलि १
यथा हरिहयैर्युक्तं संगृह्णाति स मातलि
शल्यस्तव तथाद्यायं संयन्ता रथवाजिनाम् २
योधे त्वयि रथस्थे च मद्रराजे च सारथौ
रथश्रेष्ठो ध्रुवं संख्ये पार्थो नाभिभविष्यति ३
सञ्जय उवाच
ततो दुर्योधनो भूयो मद्रराजं तरस्विनम्
उवाच राजन्संग्रामे संयच्छन्तं हयोत्तमान् ४
त्वयाभिगुप्तो राधेयो विजेष्यति धनञ्जयम्
इत्युक्तो रथमास्थाय तथेति प्राह भारत ५
शल्येऽभ्युपगते कर्णः सारथिं सुमनोऽब्रवीत्
स्वं सूत स्यन्दनं मह्यं कल्पयेत्यसकृत्त्वरन् ६
ततो जैत्रं रथवरं गन्धर्वनगरोपमम्
विधिवत्कल्पितं भर्त्रे जयेत्युक्त्वा न्यवेदयत् ७
तं रथं रथिनां श्रेष्ठः कर्णोऽभ्यर्च्य यथाविधि
संपादितं ब्रह्मविदा पूर्वमेव पुरोधसा ८
कृत्वा प्रदक्षिणं यत्नादुपस्थाय च भास्करम्
समीपस्थं मद्रराजं समारोपयदग्रतः ९
ततः कर्णस्य दुर्धर्षं स्यन्दनप्रवरं महत्
आरुरोह महातेजाः शल्यः सिंह इवाचलम् १०
ततः शल्यास्थितं राजन्कर्णः स्वरथमुत्तमम्
अध्यतिष्ठद्यथाम्भोदं विद्युत्वन्तं दिवाकरः ११
तावेकरथमारूढावादित्याग्निसमत्विषौ
व्यभ्राजेतां यथा मेघं सूर्याग्नी सहितौ दिवि १२
संस्तूयमानौ तौ वीरौ तदास्तां द्युतिमत्तरौ
ऋत्विक्सदस्यैरिन्द्राग्नी हूयमानाविवाध्वरे १३
स शल्यसंगृहीताश्वे रथे कर्णः स्थितोऽभवत्

धनुर्विस्फारयन्घोरं परिवेषीव भास्करः १४
आस्थितः स रथश्रेष्ठं कर्णः शरगभस्तिमान्
प्रबभौ पुरुषव्याघ्रो मन्दरस्थ इवांशुमान् १५
तं रथस्थं महावीरं यान्तं चामिततेजसम्
दुर्योधनः स्म राधेयमिदं वचनमब्रवीत् १६
अकृतं द्रोणभीष्माभ्यां दुष्करं कर्म संयुगे
कुरुष्वाधिरथे वीर मिषतां सर्वधन्विनाम् १७
मनोगतं मम ह्यासीद्भीष्मद्रोणौ महारथौ
अर्जुनं भीमसेनं च निहन्ताराविति ध्रुवम् १८
ताभ्यां यदकृतं वीर वीरकर्म महामृधे
तत्कर्म कुरु राधेय वज्रपाणिरिवापरः १९
गृहाण धर्मराजं वा जहि वा त्वं धनञ्जयम्
भीमसेनं च राधेय माद्रीपुत्रौ यमावपि २०
जयश्च तेऽस्तु भद्रं च प्रयाहि पुरुषर्षभ
पाण्डुपुत्रस्य सैन्यानि कुरु सर्वाणि भस्मसात् २१
ततस्तूर्यसहस्राणि भेरीणामयुतानि च
वाद्यमानान्यरोचन्त मेघशब्दो यथा दिवि २२
प्रतिगृह्य तु तद्वाक्यं रथस्थो रथसत्तमः
अभ्यभाषत राधेयः शल्यं युद्धविशारदम् २३
चोदयाश्वान्महाबाहो यावद्धन्मि धनञ्जयम्
भीमसेनं यमौ चोभौ राजानं च युधिष्ठिरम् २४
अद्य पश्यतु मे शल्य बाहुवीर्यं धनञ्जयः
अस्यतः कङ्कपत्राणां सहस्राणि शतानि च २५
अद्य क्षेप्स्याम्यहं शल्य शरान्परमतेजनान्
पाण्डवानां विनाशाय दुर्योधनजयाय च २६
शल्य उवाच
सूतपुत्र कथं नु त्वं पाण्डवानवमन्यसे
सर्वास्त्रज्ञान्महेष्वासान्सर्वानेव महारथान् २७
अनिवर्तिनो महाभागानजेयान्सत्यविक्रमान्
अपि संजनयेयुर्ये भयं साक्षाच्छतक्रतोः २८

यदा श्रोष्यसि निर्घोषं विस्फूर्जितमिवाशनेः
राधेय गाण्डिवस्याजौ तदा नैवं वदिष्यसि २९
सञ्जय उवाच
अनादृत्य तु तद्वाक्यं मद्रराजेन भाषितम्
द्दयस्यद्येत्यवोचद्वै शल्यं कर्णो नरेश्वर ३०
दृष्ट्वा कर्णं महेष्वासं युयुत्सुं समवस्थितम्
चुक्रुशुः कुरवः सर्वे हृष्टरूपाः परंतप ३१
ततो दुन्दुभिघोषेण भेरीणां निनदेन च
बाणशब्दैश्च विविधैर्गर्जितैश्च तरस्विनाम्
निर्ययुस्तावका युद्धे मृत्युं कृत्वा निवर्तनम् ३२
प्रयाते तु ततः कर्णे योधेषु मुदितेषु च
चचाल पृथिवी राजन्ररास च सुविस्वरम् ३३
निश्चरन्तो व्यदृश्यन्त सूर्यात्सप्त महाग्रहाः
उल्कापातश्च सञ्जज्ञे दिशां दाहस्तथैव च
तथाशन्यश्च संपेतुर्ववुर्वाताश्च दारुणाः ३४
मृगपक्षिगणाश्चैव बहुशः पृतनां तव
अपसव्यं तदा चक्रुर्वेदयन्तो महद्भयम् ३५
प्रस्थितस्य च कर्णस्य निपेतुस्तुरगा भुवि
अस्थिवर्षं च पतितमन्तरिक्षाद्भयानकम् ३६
जज्वलुश्चैव शस्त्राणि ध्वजाश्चैव चकम्पिरे
अश्रूणि च व्यमुञ्चन्त वाहनानि विशां पते ३७
एते चान्ये च बहव उत्पातास्तत्र मारिष
समुत्पेतुर्विनाशाय कौरवाणां सुदारुणाः ३८
न च तान्गणयामासुः सर्वे ते दैवमोहिताः
प्रस्थितं सूतपुत्रं च जयेत्यूचुर्नरा भुवि
निर्जितान्पाण्डवांश्चैव मेनिरे तव कौरवाः ३९
ततो रथस्थः परवीरहन्ता भीष्मद्रोणावत्तवीर्यौ निरीक्ष्य
समज्वलद्भारता पावकाभो वैकर्तनोऽसौ रथकुञ्जरो वृषः ४०
स शल्यमाभाष्य जगाद वाक्यं पार्थस्य कर्माप्रतिमं च दृष्ट्वा
मानेन दर्पेण च दह्यमानः क्रोधेन दीप्यन्निव निःश्वासित्वा ४१

नाहं महेन्द्रादपि वज्रपाणेः क्रुद्धाद्बिभेम्यात्तधनू रथस्थः
दृष्ट्वा तु भीष्मप्रमुखाञ्शयानान्न त्वेव मां स्थिरता संजहाति ४२
महेन्द्रविष्णुप्रतिमावनिन्दितौ रथाश्वनागप्रवरप्रमाथिनौ
अवध्यकल्पौ निहतौ यदा परैस्ततो ममाद्यापि रणेऽस्ति साध्वसम् ४३
समीक्ष्य सङ्ख्येऽतिबलान्नराधिपैर्नराश्वमातङ्गरथाञ्शरैर्हतान्
कथं न सर्वानहितान्रणेऽवधीन्महास्त्रविद्ब्राह्मणपुङ्गवो गुरुः ४४
स संस्मरन्द्रोणहवं महाहवे ब्रवीमि सत्यं कुरवो निबोधत
न वा मदन्यः प्रसहेद्रणेऽजुनं क्रमागतं मृत्युमिवोग्ररूपिणम् ४५
शिक्षा प्रसादश्च बलं धृतिश्च द्रोणे महास्त्राणि च संनतिश्च
स चेदगान्मृत्युवशं महात्मा सर्वानन्यानातुरानद्य मन्ये ४६
नेह ध्रुवं किञ्चिदपि प्रचिन्त्यं विदुर्लोके कर्मणोऽनित्ययोगात्
सूर्योदये को हि विमुक्तसंशयो गर्वं कुर्वीताद्य गुरौ निपातिते ४७
न नूनमस्त्राणि बलं पराक्रमः क्रिया सुनीतं परमायुधानि वा
अलं मनुष्यस्य सुखाय वर्तितुं तथा हि युद्धे निहतः परैर्गुरुः ४८
हुताशनादित्यसमानतेजसं पराक्रमे विष्णुपुरंदरोपमम्
नये बृहस्पत्युशनः समं सदा न चैनमस्त्रं तदुपात्सुदुःसहम् ४९
संप्रक्रुष्टे रुदितस्त्रीकुमारे पराभूते पौरुषे धार्तराष्ट्रे
मया कृत्यमिति जानामि शल्य प्रयाहि तस्माद्द्विषतामनीकम् ५०
यत्र राजा पाण्डवः सत्यसंधो व्यवस्थितो भीमसेनार्जुनौ च
वासुदेवः सृञ्जयाः सात्यकिश्च यमौ च कस्तौ विषहेन्मदन्यः ५१
तस्मात्क्षिप्रं मद्रपते प्रयाहि रणे पाञ्चालान्पाण्डवान्सृञ्जयांश्च
तान्वा हनिष्यामि समेत्य सङ्ख्ये यास्यामि वा द्रोणमुखाय मन्ये ५२
न त्वेवाहं न गमिष्यामि मध्यं तेषां शूराणामिति मा शल्य विद्धि
मित्रद्रोहो मर्षणीयो न मेऽय त्यक्त्वा प्राणाननुयास्यामि द्रोणम् ५३
प्राज्ञस्य मूढस्य च जीवितान्ते प्राणप्रमोक्षोऽन्तकवत्क्रमस्य
अतो विद्वन्नभियास्यामि पार्थं दिष्टं न शक्यं व्यतिवर्तितुं वै ५४
कल्याणवृत्तः सततं हि राजन्वैचित्रवीर्यस्य सुतो ममासीत्
तस्यार्थसिद्ध्यर्थमहं त्यजामि प्रियान्भोगान्दुस्त्यजं जीवितं च ५५
वैयाघ्रचर्माणमकूजनाक्षं हैमत्रिकोशं रजतत्रिवेणुम्
रथप्रबर्हं तुरगप्रबर्हैर्युक्तं प्रादान्मह्यमिदं हि रामः ५६

धनूंषि चित्राणि निरीक्ष्य शल्य ध्वजं गदां सायकांश्चोग्ररूपान्
असिं च दीप्तंपरमायुधं च शङ्खं च शुभ्रं स्वनवन्तमुग्रम् ५७
पताकिनं वज्रनिपातनिस्वनं सिताश्वयुक्तं शुभतूणशोभितम्
इमं समास्थाय रथं रथर्षभं रणे हनिष्याम्यहमर्जुनं बलात् ५८
तं चेन्मृत्युः सर्वहरोऽभिरक्षते सदाप्रमत्तः समरे पाण्डुपुत्रम्
तं वा हनिष्यामि समेत्य युद्धे यास्यामि वा भीष्ममुखो यमाय ५९
यमवरुणकुबेर वासवा वा यदि युगपत्सगणा महाहवे
जुगुपिषव इहैत्य पाण्डवं किमु बहुना सह तैर्जयामि तम् ६०
इति रणरभसस्य कत्थतस्तदुपनिशम्य वचः स मद्रराट्
अवहसदवमन्य वीर्यवान्प्रतिषिषिधे च जगाद चोत्तरम् ६१
विरम विरम कर्ण कत्थनादतिरभसोऽस्यति चाप्ययुक्तवाक्
क्व च हि नरवरो धनञ्जयः क्व पुनरिह त्वमुपारमाबुध ६२
यदुसदनमुपेन्द्रपालितं त्रिदिवमिवामरराजरक्षितम्
प्रसभमिह विलोक्य को हरेत्पुरुषवरावरजामृतेऽजुनात् ६३
त्रिभुवनसृजमीश्वरेश्वरं क इह पुमान्भवमाह्वयेद्युधि
मृगवधकलहे ऋतेऽजुनात्सुरपतिवीर्यसमप्रभावतः ६४
असुरसुरमहोरगान्नरान्गरुडपिशाचसयक्षराक्षसान्
इषुभिरजयदग्निगौरवात्स्वभिलषितं च हविर्ददौ जयः ६५
स्मरसि ननु यदा परैर्हृतः स च धृतराष्ट्रसुतो विमोक्षितः
दिनकरज नरोत्तमैर्यदा मरुषु बहून्विनिहत्य तानरीन् ६६
प्रथममपि पलायिते त्वयि प्रियकलहा धृतराष्ट्रसूनवः
स्मरसि ननु यदा प्रमोचिताः खचरगणानवजित्य पाण्डवैः ६७
समुदितबलवाहनाः पुनः पुरुषवरेण जिताः स्थ गोग्रहे
सगुरुगुरुसुताः सभीष्मकाः किमु न जितः स तदा त्वयार्जुनः ६८
इदमपरमुपस्थितं पुनस्तव निधनाय सुयुद्धमद्य वै
यदि न रिपुभयात्पलायसे समरगतोऽद्य हतोऽसि सूतज ६९
सञ्जय उवाच
इति बहुपरुषं प्रभाषति प्रमनसि मद्रपतौ रिपुस्तवम्
भृशमतिरुषितः परं वृषः कुरुपृतनापतिराह मद्रपम् ७०
भवतु भवतु किं विकत्थसे ननु मम तस्य च युद्धमुद्यतम्

यदि स जयति मां महाहवे तत इदमस्तु सुकत्थितं तव ७१
एवमस्त्विति मद्रेश उक्त्वा नोत्तरमुक्तवान्
याहि मद्रेश चाप्येनं कर्णः प्राह युयुत्सया ७२
स रथः प्रययौ शत्रूञ्श्वेताश्वः शल्यसारथिः
निघ्नन्नमित्रान्समरे तमो घ्नन्सविता यथा ७३
ततः प्रायात्प्रीतिमान्वै रथेन वैयाघ्रेण श्वेतयुजाथ कर्णः
स चालोक्य ध्वजिनीं पाण्डवानां धनञ्जयं त्वरया पर्यपृच्छत् ७४
इति श्रीमहाभारते कर्णपर्वणि षड्विंशोऽध्यायः २६

सप्तविंशोऽध्यायः

सञ्जय उवाच
प्रयानेव तदा कर्णो हर्षयन्वाहिनीं तव
एकैकं समरे दृष्ट्वा पाण्डवं पर्यपृच्छत १
यो ममाद्य महात्मानं दर्शयेच्छ्वेतवाहनम्
तस्मै दद्यामभिप्रेतं वरं यं मनसेच्छति २
स चेत्तदभिमन्येत तस्मै दद्यामहं पुनः
शकटं रत्नसंपूर्णं यो मे ब्रूयाद्धनञ्जयम् ३
स चेत्तदभिमन्येत पुरुषोऽजुनदर्शिवान्
अन्यं तस्मै पुनर्दद्यां सौवर्णं हस्तिषड्गवम् ४
तथा तस्मै पुनर्दद्यां स्त्रीणां शतमलंकृतम्
श्यामानां निष्ककण्ठीनां गीतवाद्यविपश्चिताम् ५
न चेत्तदभिमन्येत पुरुषोऽजुनदर्शिवान्
अन्यं तस्मै वरं दद्यां श्वेतान्पञ्चशतान्हयान् ६
हेमभाण्डपरिच्छन्नान्सुमृष्टमणिकुण्डलान्
सुदान्तानपि चैवाहं दद्यामष्टशतान्परान् ७
रथं च शुभ्रं सौवर्णं दद्यां तस्मै स्वलंकृतम्
युक्तं परमकाम्बोजैर्यो मे ब्रूयाद्धनञ्जयम् ८
अन्यं तस्मै वरं दद्यां कुञ्जराणां शतानि षट्
काञ्चनैर्विविधैर्भाण्डैराच्छन्नान्हेममालिनः
उत्पन्नानपरान्तेषु विनीतान्हस्तिशिक्षकैः ९

स चेत्तदभिमन्येत पुरुषोऽजुनदर्शिवान्
अन्यं तस्मै वरं दद्यां यमसौ कामयेत्स्वयम् १०
पुत्रदारान्विहारांश्च यदन्यद्वित्तमस्ति मे
तच्च तस्मै पुनर्दद्यां यद्यत्स मनसेच्छति ११
हत्वा च सहितौ कृष्णौ तयोर्वित्तानि सर्वशः
तस्मै दद्यामहं यो मे प्रब्रूयात्केशवार्जुनौ १२
एता वाचः सुबहुशः कर्ण उच्चारयन्युधि
दध्मौ सागरसंभूतं सुस्वनं शङ्खमुत्तमम् १३
ता वाचः सूतपुत्रस्य तथा युक्ता निशम्य तु
दुर्योधनो महाराज प्रहृष्टः सानुगोऽभवत् १४
ततो दुन्दुभिनिर्घोषो मृदङ्गानां च सर्वशः
सिंहनादः सवादित्रः कुञ्जराणां च निस्वनः १५
प्रादुरासीत्तदा राजंस्त्वत्सैन्ये भरतर्षभ
योधानां संप्रहृष्टानां तथा समभवत्स्वनः १६
तथा प्रहृष्टे सैन्ये तु प्लवमानं महारथम्
विकत्थमानं समरे राधेयमरिकर्शनम्
मद्रराजः प्रहस्येदं वचनं प्रत्यभाषत १७
मा सूतपुत्र मानेन सौवर्णं हस्तिषड्गवम्
प्रयच्छ पुरुषायाद्य द्रक्ष्यसि त्वं धनञ्जयम् १८
बाल्याद्धि त्वं त्यजसि वसु वैश्रवणो यथा
अयत्नेनैव राधेयद्रष्टास्यद्य धनञ्जयम् १९
परासृजसि मिथ्या किं किं च त्वं बहु मूढवत्
अपात्रदाने ये दोषास्तान्मोहान्नावबुध्यसे २०
यत्प्रवेदयसे वित्तं बहुत्वेन खलु त्वया
शक्यं बहुविधैर्यज्ञैर्यष्टुं सूत यजस्व तैः २१
यच्च प्रार्थयसे हन्तुं कृष्णौ मोहान्मृषैव तत्
न हि शुश्रुम संमर्दे क्रोष्ट्रा सिंहौ निपातितौ २२
अप्रार्थितं प्रार्थयसे सुहृदो न हि सन्ति ते
ये त्वां न वारयन्त्याशु प्रपतन्तं हुताशने २३
कालकार्यं न जानीषे कालपक्वोऽस्यसंशयम्

बह्वबद्धमकर्णीयं को हि ब्रूयाज्जिजीविषुः २४
समुद्रतरणं दोर्भ्यां कण्ठे बद्ध्वा यथा शिलाम्
गिर्यग्राद्वा निपतनं तादृक्तव चिकीर्षितम् २५
सहितः सर्वयोधैस्त्वं व्यूढानीकैः सुरक्षितः
धनञ्जयेन युध्यस्व श्रेयश्चेत्प्राप्तुमिच्छसि २६
हितार्थं धार्तराष्ट्रस्य ब्रवीमि त्वा न हिंसया
श्रद्धस्वैतन्मया प्रोक्तं यदि तेऽस्ति जिजीविषा २७
कर्ण उवाच
स्ववीर्येऽह पराश्वस्य प्रार्थयाम्यर्जुनं रणे
त्वं तु मित्रमुखः शत्रुर्मां भीषयितुमिच्छसि २८
न मामस्मादभिप्रायात्कश्चिदद्य निवर्तयेत्
अपीन्द्रो वज्रमुद्यम्य किं नु मर्त्यः करिष्यति २९
सञ्जय उवाच
इति कर्णस्य वाक्यान्ते शल्यः प्राहोत्तरं वचः
चुकोपयिषुरत्यर्थं कर्णं मद्रेश्वरं पुनः ३०
यदा वै त्वां फल्गुनवेगनुन्ना ज्याचोदिता हस्तवता विसृष्टाः
अन्वेतारः कङ्कपत्राः शिताग्रास्तदा तप्स्यस्यर्जुनस्याभियोगात् ३१
यदा दिव्यं धनुरादाय पार्थः प्रभासयन्पृतनां सव्यसाची
त्वामर्दयेत निशितैः पृषत्कैस्तदा पश्चात्तप्स्यसे सूतपुत्र ३२
बालश्चन्द्रं मातुरङ्के शयानो यथा कश्चित्प्रार्थयतेऽपहर्तुम्
तद्वन्मोहाद्यतमानो रथस्थस्त्वं प्रार्थयस्यर्जुनमद्य जेतुम् ३३
त्रिशूलमाश्लिष्य सुतीक्ष्णधारं सर्वाणि गात्राणि निघर्षसि त्वम्
सुतीक्ष्णधारोपमकर्मणा त्वं युयुत्ससे योऽजुनेनाद्य कर्ण ३४
सिद्धं सिंहं केसरिणं बृहन्तं बालो मूढः क्षुद्रमृगस्तरस्वी
समाह्वयेत्तद्वदेतत्तवाद्य समाह्वानं सूतपुत्रार्जुनस्य ३५
मा सूतपुत्राह्वय राजपुत्रं महावीर्यं केसरिणं यथैव
वने शृगालः पिशितस्य तृप्तो मा पार्थमासाद्य विनङ्क्ष्यसि त्वम् ३६
ईषादन्तं महानागं प्रभिन्नकरटामुखम्
शशकाह्वयसे युद्धे कर्ण पार्थं धनञ्जयम् ३७
बिलस्थं कृष्णसर्पं त्वं बाल्यात्काष्ठेन विध्यसि

महाविषं पूर्णकोशं यत्पार्थं योद्धुमिच्छसि ३८
सिहं केसरिणं क्रुद्धमतिक्रम्याभिनर्दसि
शृगाल इव मूढत्वान्नृसिंहं कर्ण पाण्डवम् ३९
सुपर्णं पतगश्रेष्ठं वैनतेयं तरस्विनम्
लट्वेवाह्वयसे पाते कर्ण पार्थं धनञ्जयम् ४०
सर्वाम्भोनिलयं भीममूर्मिमन्तं झषायुतम्
चन्द्रोदये विवर्तन्तमप्लवः संतितीर्षसि ४१
ऋषभं दुन्दुभिग्रीवं तीक्ष्णशृङ्गं प्रहारिणम्
वत्स आह्वयसे युद्धे कर्ण पार्थं धनञ्जयम् ४२
महाघोषं महामेघं दर्दुरः प्रतिनर्दसि
कामतोयप्रदं लोके नरपर्जन्यमर्जुनम् ४३
यथा च स्वगृहस्थः श्वा व्याघ्रं वनगतं भषेत्
तथा त्वं भषसे कर्ण नरव्याघ्रं धनञ्जयम् ४४
शृगालोऽपि वने कर्ण शशैः परिवृतो वसन्
मन्यते सिंहमात्मानं यावत्सिंहं न पश्यति ४५
तथा त्वमपि राधेय सिंहमात्मानमिच्छसि
अपश्यञ्शत्रुदमनं नरव्याघ्रं धनञ्जयम् ४६
व्याघ्रं त्वं मन्यसेऽत्मानं यावत्कृष्णौ न पश्यसि
समास्थितावेकरथे सूर्याचन्द्रमसाविव ४७
यावद्गाण्डीवनिर्घोषं न शृणोषि महाहवे
तावदेव त्वया कर्ण शक्यं वक्तुं यथेच्छसि ४८
रथशब्दधनुः शब्दैर्नादयन्तं दिशो दश
नर्दन्तमिव शार्दूलं दृष्ट्वा क्रोष्टा भविष्यसि ४९
नित्यमेव शृगालस्त्वं नित्यं सिंहो धनञ्जयः
वीरप्रद्वेषणान्मूढ नित्यं क्रोष्टेव लक्ष्यसे ५०
यथाखुः स्याद्बिडालश्च श्वा व्याघ्रश्च बलाबले
यथा शृगालः सिंहश्च यथा च शशकुञ्जरौ ५१
यथानृतं च सत्यं च यथा चापि विषामृते
तथा त्वमपि पार्थश्च प्रख्यातावात्मकर्मभिः ५२
सञ्जय उवाच

अधिक्षिप्तस्तु राधेयः शल्येनामिततेजसा
शल्यमाह सुसंक्रुद्धो वाक्शल्यमवधारयन् ५३
गुणान्गुणवतः शल्य गुणवान्वेत्ति नागुणः
त्वं तु नित्यं गुणैर्हीनः किं ज्ञास्यस्यगुणो गुणान् ५४
अर्जुनस्य महास्त्राणि क्रोधं वीर्यं धनुः शरान्
अहं शल्याभिजानामि न त्वं जानासि तत्तथा ५५
एवमेवात्मनो वीर्यमहं वीर्यं च पाण्डवे
जानन्नेवाह्वये युद्धे शल्य नाग्निं पतंगवत् ५६
अस्ति चायमिषुः शल्य सुपुङ्खो रक्तभोजनः
एकतूणीशयः पत्री सुधौतः समलंकृतः ५७
शेते चन्दनपूर्णेन पूजितो बहुलाः समाः
आहेयो विषवानुग्रो नराश्वद्विपसंघहा ५८
एकवीरो महारौद्रस्तनुत्रास्थिविदारणः
निर्भिन्द्यां येन रुष्टोऽहमपि मेरुं महागिरिम् ५९
तमहं जातु नास्येयमन्यस्मिन्फल्गुनादृते
कृष्णाद्वा देवकीपुत्रात्सत्यं चात्र शृणुष्व मे ६०
तेनाहमिषुणा शल्य वासुदेवधनंजयौ
योत्स्ये परमसंक्रुद्धस्तत्कर्म सदृशं मम ६१
सर्वेषां वासुदेवानां कृष्णे लक्ष्मीः प्रतिष्ठिता
सर्वेषां पाण्डुपुत्राणां जयः पार्थे प्रतिष्ठितः
उभयं तत्समासाद्य कोऽतिवर्तितुमर्हति ६२
तावेतौ पुरुष व्याघ्रौ समेतौ स्यन्दने स्थितौ
मामेकमभिसंयातौ सुजातं शल्य पश्य मे ६३
पितृष्वसामातुलजौ भ्रातरावपराजितौ
मणी सूत्र इव प्रोतौ द्रष्टासि निहतौ मया ६४
अर्जुने गाण्डिवं कृष्णे चक्रं तार्क्ष्यकपिध्वजौ
भीरूणां त्रासजननौ शल्य हर्षकरौ मम ६५
त्वं तु दुष्प्रकृतिर्मूढो महायुद्धेष्वकोविदः
भयावतीर्णः संत्रासादबद्धं बहु भाषसे ६६
संस्तौषि त्वं तु केनापि हेतुना तौ कुदेशज

तौ हत्वा समरे हन्ता त्वामद्धा सहबान्धवम् ६७
पापदेशज दुर्बुद्धे क्षुद्र क्षत्रियपांसन
सुहृद्भूत्वा रिपुः किं मां कृष्णाभ्यां भीषयन्नसि ६८
तौ वा ममाद्य हन्तारौ हन्तास्मि समरे स्थितौ
नाहं बिभेमि कृष्णाभ्यां विजानन्नात्मनो बलम् ६९
वासुदेवसहस्रं वा फल्गुनानां शतानि च
अहमेको हनिष्यामि जोषमास्स्व कुदेशज ७०
स्त्रियो बालाश्च वृद्धाश्च प्रायः क्रीडागता जनाः
या गाथाः संप्रगायन्ति कुर्वन्तोऽध्ययनं यथा
ता गाथाः शृणु मे शल्य मद्रकेषु दुरात्मसु ७१
ब्राह्मणैः कथिताः पूर्वं यथावद्राजसंनिधौ
श्रुत्वा चैकमना मूढ क्षम वा ब्रूहि वोत्तरम् ७२
मित्रध्रुङ्मद्रको नित्यं यो नो द्वेष्टि स मद्रकः
मद्रके संगतं नास्ति क्षुद्रवाक्ये नराधमे ७३
दुरात्मा मद्रको नित्यं नित्यं चानृतिकोऽनृजुः
यावदन्तं हि दौरात्म्यं मद्रकेष्विति नः श्रुतम् ७४
पिता माता च पुत्रश्च श्वश्रूश्वशुरमातुलाः
जामाता दुहिता भ्राता नप्ता ते ते च बान्धवाः ७५
वयस्याभ्यागताश्चान्ये दासीदासं च संगतम्
पुंभिर्विमिश्रा नार्यश्च ज्ञाताज्ञाताः स्वयेच्छया ७६
येषां गृहेषु शिष्टानां सक्तुमन्थाशिनां सदा
पीत्वा सीधुं सगोमांसं नर्दन्ति च हसन्ति च ७७
यानि चैवाप्यबद्धानि प्रवर्तन्ते च कामतः
कामप्रलापिनोऽन्योन्यं तेषु धर्मः कथं भवेत् ७८
मद्रकेषु विलुप्तेषु प्रख्याताशुभकर्मसु
नापि वैरं न सौहार्दं मद्रकेषु समाचरेत् ७९
मद्रके संगतं नास्ति मद्रको हि सचापलः
मद्रकेषु च दुःस्पर्शं शौचं गान्धारकेषु च ८०
राजयाजकयाज्येन नष्टं दत्तं हविर्भवेत् ८१
शूद्रसंस्कारको विप्रो यथा याति पराभवम्

तथा ब्रह्मद्विषो नित्यं गच्छन्तीह पराभवम् ८२
मद्रके संगतं नास्ति हतं वृश्चिकतो विषम्
आथर्वणेन मन्त्रेण सर्वा शान्तिः कृताभवेत् ८३
इति वृश्चिकदष्टस्य नानाविषहतस्य च
कुर्वन्ति भेषजं प्राज्ञाः सत्यं तच्चापि दृश्यते
एवं विद्वञ्जोषमास्स्व शृणु चात्रोत्तरं वचः ८४
वासांस्युत्सृज्य नृत्यन्ति स्त्रियो या मद्यमोहिताः
मिथुनेऽसयताश्चापि यथाकामचराश्च ताः
तासां पुत्रः कथं धर्मं मद्रको वक्तुमर्हति ८५
यास्तिष्ठन्त्यः प्रमेहन्ति यथैवोष्ट्रीदशेरके
तासां विभ्रष्टलज्जानां निर्लज्जानां ततस्ततः
त्वं पुत्रस्तादृशीनां हि धर्मं वक्तुमिहेच्छसि ८६
सुवीरकं याच्यमाना मद्रका कर्षति स्फिजौ
अदातुकामा वचनमिदं वदति दारुणम् ८७
मा मा सुवीरकं कश्चिद्याचतां दयितो मम
पुत्रं दद्यां प्रतिपदं न तु दद्यां सुवीरकम् ८८
नार्यो बृहत्यो निर्ह्रीका मद्रकाः कम्बलावृताः
घस्मरा नष्टशौचाश्च प्राय इत्यनुशुश्रुम ८९
एवमादि मयान्यैर्वा शक्यं वक्तुं भवेद्बहु
आ केशाग्रान्नखाग्राच्च वक्तव्येषु कुवर्त्मसु ९०
मद्रकाः सिन्धुसौवीरा धर्मं विद्युः कथं त्विह
पापदेशोद्भवा म्लेच्छा धर्माणामविचक्षणाः ९१
एष मुख्यतमो धर्मः क्षत्रियस्येति नः श्रुतम्
यदाजौ निहतः शेते सद्भिः समभिपूजितः ९२
आयुधानां संपराये यन्मुच्येयमहं ततः
न मे स प्रथमः कल्पो निधने स्वर्गमिच्छतः ९३
सोऽह प्रियः सखा चास्मि धार्तराष्ट्रस्य धीमतः
तदर्थे हि मम प्राणा यच्च मे विद्यते वसु ९४
व्यक्तं त्वमप्युपहितः पाण्डवैः पापदेशज
यथा ह्यमित्रवत्सर्वं त्वमस्मासु प्रवर्तसे ९५

कामं न खलु शक्योऽह त्वद्विधानां शतैरपि
संग्रामाद्विमुखः कर्तुं धर्मज्ञ इव नास्तिकैः ९६
सारङ्ग इव घर्मार्तः कातं विलप शुष्य च
नाहं भीषयितुं शक्यः क्षत्रवृत्ते व्यवस्थितः ९७
तनुत्यजां नृसिंहानामाहवेष्वनिवर्तिनाम्
या गतिर्गुरुणा प्राङ्गे प्रोक्ता रामेण तां स्मरे ९८
स्वेषां त्राणार्थमुद्युक्तं वधाय द्विषतामपि
विद्धि मामास्थितं वृत्तं पौरूरवसमुत्तमम् ९९
न तद्भूतं प्रपश्यामि त्रिषु लोकेषु मद्रक
यो मामस्मादभिप्रायाद्वारयेदिति मे मतिः १००
एवं विद्वञ्जोषमास्स्व त्रासात्किं बहु भाषसे
मा त्वा हत्वा प्रदास्यामि क्रव्याद्भ्यो मद्रकाधम १०१
मित्रप्रतीक्षया शल्य धार्तराष्ट्रस्य चोभयोः
अपवादतितिक्षाभिस्त्रिभिरेतैर्हि जीवसि १०२
पुनश्चेदीदृशं वाक्यं मद्रराज वदिष्यसि
शिरस्ते पातयिष्यामि गदया वज्रकल्पया १०३
श्रोतारस्त्विदमद्येह द्रष्टारो वा कुदेशज
कर्णं वा जघ्नतुः कृष्णौ कर्णो वापि जघान तौ १०४
एवमुक्त्वा तु राधेयः पुनरेव विशां पते
अब्रवीन्मद्रराजानं याहि याहीत्यसंभ्रमम् १०५
इति श्रीमहाभारते कर्णपर्वणि सप्तविंशोऽध्यायः २७

अष्टाविंशोऽध्यायः

सञ्जय उवाच
मारिषाधिरथेः श्रुत्वा वचो युद्धाभिनन्दिनः
शल्योऽब्रवीत्पुनः कर्णं निदर्शनमुदाहरन् १
यथैव मत्तो मद्येन त्वं तथा न च वा तथा
तथाहं त्वां प्रमाद्यन्तं चिकित्सामि सुहृत्तया २
इमां काकोपमां कर्ण प्रोच्यमानां निबोध मे
श्रुत्वा यथेष्टं कुर्यास्त्वं विहीन कुलपांसन ३

नाहमात्मनि किञ्चिद्वै किल्बिषं कर्ण संस्मरे
येन त्वं मां महाबाहो हन्तुमिच्छस्यनागसम् ४
अवश्यं तु मया वाच्यं बुध्यतां यदि ते हितम्
विशेषतो रथस्थेन राज्ञश्चैव हितैषिणा ५
समं च विषमं चैव रथिनश्च बलाबलम्
श्रमः खेदश्च सततं हयानां रथिना सह ६
आयुधस्य परिज्ञानं रुतं च मृगपक्षिणाम्
भारश्चाप्यतिभारश्च शल्यानां च प्रतिक्रिया ७
अस्त्रयोगश्च युद्धं च निमित्तानि तथैव च
सर्वमेतन्मया ज्ञेयं रथस्यास्य कुटुम्बिना
अतस्त्वां कथये कर्ण निदर्शनमिदं पुनः ८
वैश्यः किल समुद्रान्ते प्रभूतधनधान्यवान्
यज्वा दानपतिः क्षान्तः स्वकर्मस्थोऽभवच्छुचिः ९
बहुपुत्रः प्रियापत्यः सर्वभूतानुकम्पकः
राज्ञो धर्मप्रधानस्य राष्ट्रे वसति निर्भयः १०
पुत्राणां तस्य बालानां कुमाराणां यशस्विनाम्
काको बहूनामभवदुच्छिष्टकृतभोजनः ११
तस्मै सदा प्रयच्छन्ति वैश्यपुत्राः कुमारकाः
मांसोदनं दधि क्षीरं पायसं मधुसर्पिषी १२
स चोच्छिष्टभृतः काको वैश्यपुत्रैः कुमारकैः
सदृशान्पक्षिणो दृप्तः श्रेयसश्चावमन्यते १३
अथ हंसाः समुद्रास्ते कदाचिदभिपातिनः
गरुडस्य गतौ तुल्याश्चक्राङ्गा हृष्टचेतसः १४
कुमारकास्ततो हंसान्दृष्ट्वा काकमथाब्रुवन्
भवानेव विशिष्टो हि पतत्रिभ्यो विहंगम १५
प्रतार्यमाणस्तु स तैरल्पबुद्धिभिरण्डजः
तद्वचः सत्यमित्येव मौर्ख्याद्दर्पाच्च मन्यते १६
तान्सोऽभिपत्य जिज्ञासुः क एषां श्रेष्ठभागिति
उच्छिष्टदर्पितः काको बहूनां दूरपातिनाम् १७
तेषां यं प्रवरं मेने हंसानां दूरपातिनाम्

तमाह्वयत दुर्बुद्धिः पताम इति पक्षिणम् १८
तच्छ्रुत्वा प्राहसन्हंसा ये तत्रासन्समागताः
भाषतो बहु काकस्य बलिनः पततां वराः
इदमूचुश्च चक्राङ्गा वचः काकं विहंगमाः १९
वयं हंसाश्चरामेमां पृथिवीं मानसौकसः
पक्षिणां च वयं नित्यं दूरपातेन पूजिताः २०
कथं नु हंसं बलिनं वज्राङ्गं दूरपातिनम्
काको भूत्वा निपतने समाह्वयसि दुर्मते
कथं त्वं पतनं काक सहास्माभिर्ब्रवीषि तत् २१
अथ हंसवचो मूढः कुत्सयित्वा पुनः पुनः
प्रजगादोत्तरं काकः कत्थनो जातिलाघवात् २२
शतमेकं च पातानां पतितास्मि न संशयः
शतयोजनमेकैकं विचित्रं विविधं तथा २३
उड्डीनमवडीनं च प्रडीनं डीनमेव च
निडीनमथ संडीनं तिर्यक्चातिगतानि च २४
विडीनं परिडीनं च पराडीनं सुडीनकम्
अतिडीनं महाडीनं निडीनं परिडीनकम् २५
गतागतप्रतिगता वह्वीश्च निकुडीनिकाः
कर्तास्मि मिषतां वोऽद्य ततो द्रक्ष्यथ मे बलम् २६
एवमुक्ते तु काकेन प्रहस्यैको विहंगमः
उवाच हंसस्तं काकं वचनं तन्निबोध मे २७
शतमेकं च पातानां त्वं काक पतिता ध्रुवम्
एकमेव तु ये पातं विदुः सर्वे विहंगमाः २८
तमहं पतिता काक नान्यं जानामि कंचन
पत त्वमपि रक्ताक्ष येन वा तेन मन्यसे २९
अथ काकाः प्रजहसुर्ये तत्रासन्समागताः
कथमेकेन पातेन हंसः पातशतं जयेत् ३०
एकेनैव शतस्यैकं पातेनाभिभविष्यति
हंसस्य पतितं काको बलवानाशुविक्रमः ३१
प्रपेततुः स्पर्धयाथ ततस्तौ हंसवायसौ

एकपाती च चक्राङ्गः काकः पातशतेन च ३२
पेतिवानथ चक्राङ्गः पेतिवानथ वायसः
विसिस्मापयिषुः पातैराचक्षाणोऽत्मनः क्रियाम् ३३
अथ काकस्य चित्राणि पतितानीतराणि च
दृष्ट्वा प्रमुदिताः काका विनेदुरथ तैः स्वरैः ३४
हंसांश्चावहसन्ति स्म प्रावदन्नप्रियाणि च
उत्पत्योत्पत्य च प्राहुर्मुहूर्तमिति चेति च ३५
वृक्षाग्रेभ्यः स्थलेभ्यश्च निपतन्त्युत्पतन्ति च
कुर्वाणा विविधान्रावानाशंसन्तस्तदा जयम् ३६
हंसस्तु मृदुनैकेव विक्रान्तुमुपचक्रमे
प्रत्यहीयत काकाच्च मुहूर्तमिव मारिष ३७
अवमन्य रयं हंसानिदं वचनमब्रवीत्
योऽसावुत्पतितो हंसः सोऽसावेव प्रहीयते ३८
अथ हंसः स तच्छ्रुत्वा प्रापतत्पश्चिमां दिशम्
उपर्युपरि वेगेन सागरं वरुणालयम् ३९
ततोः भीः प्राविशत्काकं तदा तत्र विचेतसम्
द्वीपद्रुमानपश्यन्तं निपतन्तं श्रमान्वितम्
निपतेयं क्व नु श्रान्त इति तस्मिञ्जलार्णवे ४०
अविषह्यः समुद्रो हि बहुसत्त्वगणालयः
महाभूतशतोद्भासी नभसोऽपि विशिष्यते ४१
गाम्भीर्याद्धि समुद्रस्य न विशेषः कुलाधम
दिगम्बराम्भसां कर्ण समुद्रस्था हि दुर्जयाः
विदूरपातात्तोयस्य किं पुनः कर्ण वायसः ४२
अथ हंसोऽभ्यतिक्रम्य मुहूर्तमिति चेति च
अवेक्षमाणस्तं काकं नाशक्नोद्व्यपसर्पितुम्
अतिक्रम्य च चक्राङ्गः काकं तं समुदैक्षत ४३
तं तथा हीयमानं च हंसो दृष्ट्वा ब्रवीदिदम्
उज्जिहीर्षुर्निमज्जन्तं स्मरन्सत्पुरुषव्रतम् ४४
बहूनि पतनानि त्वमाचक्षाणो मुहुर्मुहुः
पतस्यव्याहरंश्चेदं न नो गुह्यं प्रभाषसे ४५

किं नाम पतनं काक यत्त्वं पतसि सांप्रतम्
जलं स्पृशसि पक्षाभ्यां तुण्डेन च पुनः पुनः ४६
स पक्षाभ्यां स्पृशन्नार्तस्तुण्डेन जलमर्णवे
काको दृढं परिश्रान्तः सहसा निपपात ह ४७
हंस उवाच
शतमेकं च पातानां यत्प्रभाषसि वायस
नानाविधानीह पुरा तच्चानृतमिहाद्य ते ४८
काक उवाच
उच्छिष्टदर्पितो हंस मन्येऽत्मानं सुपर्णवत्
अवमन्य बहूंश्चाहं काकानन्यांश्च पक्षिणः
प्राणैर्हंस प्रपद्ये त्वां द्वीपान्तं प्रापयस्व माम् ४९
यद्यहं स्वस्तिमान्हंस स्वदेशं प्राप्नुयां पुनः
न कंचिदवमन्येयमापदो मां समुद्धर ५०
तमेवंवादिनं दीनं विलपन्तमचेतनम्
काक काकेति वाशन्तं निमज्जन्तं महार्णवे ५१
तथैत्य वायसं हंसो जलक्लिन्नं सुदुर्दशम्
पद्भ्यामुत्क्षिप्य वेपन्तं पृष्ठमारोपयच्छनैः ५२
आरोप्य पृष्ठं काकं तं हंसः कर्ण विचेतसम्
आजगाम पुनर्द्वीपं स्पर्धया पेततुर्यतः ५३
संस्थाप्य तं चापि पुनः समाश्वास्य च खेचरम्
गतो यथेप्सितं देशं हंसो मन इवाशुगः ५४
उच्छिष्टभोजनात्काको यथा वैश्यकुले तु सः
एवं त्वमुच्छिष्टभृतो धार्तराष्ट्रैर्न संशयः
सदृशाञ्श्रेयसश्चापि सर्वान्कर्णातिमन्यसे ५५
द्रोणद्रौणिकृपैर्गुप्तो भीष्मेणान्यैश्च कौरवैः
विराटनगरे पार्थमेकं किं नावधीस्तदा ५६
यत्र व्यस्ताः समस्ताश्च निर्जिताः स्थ किरीटिना
शृगाला इव सिंहेन क्व ते वीर्यमभूत्तदा ५७
भ्रातरं च हितं दृष्ट्वा निर्जितः सव्यसाचिना
पश्यतां कुरुवीराणां प्रथमं त्वं पलायथाः ५८

तथा द्वैतवने कर्ण गन्धर्वैः समभिद्रुतः
कुरून्समग्रानुत्सृज्य प्रथमं त्वं पलायथाः ५९
हत्वा जित्वा च गन्धर्वांश्चित्रसेनमुखान्रणे
कर्ण दुर्योधनं पार्थः सभार्यं सममोचयत् ६०
पुनः प्रभावः पार्थस्य पुराणः केशवस्य च
कथितः कर्ण रामेण सभायां राजसंसदि ६१
सततं च तदश्रौषीर्वचनं द्रोणभीष्मयोः
अवध्यौ वदतोः कृष्णौ संनिधौ वै महीक्षिताम् ६२
कियन्तं तत्र वक्ष्यामि येन येन धनञ्जयः
त्वत्तोऽतिरिक्तः सर्वेभ्यो भूतेभ्यो ब्राह्मणो यथा ६३
इदानीमेव द्रष्टासि प्रधने स्यन्दने स्थितौ
पुत्रं च वसुदेवस्य पाण्डवं च धनञ्जयम् ६४
देवासुरमनुष्येषु प्रख्यातौ यौ नरर्षभौ
प्रकाशेनाभिविख्यातौ त्वं तु खद्योतवन्नृषु ६५
एवं विद्वान्मावमंस्थाः सूतपुत्राच्युतार्जुनौ
नृसिंहौ तौ नरश्वा त्वं जोषमास्स्व विकत्थन ६६
इति श्रीमहाभारतेकर्णपर्वणि अष्टाविंशोऽध्यायः २८

एकोनत्रिंशोऽध्यायः

सञ्जय उवाच
मद्राधिपस्याधिरथिस्तदैवं वचो निशम्याप्रियमप्रतीतः
उवाच शल्यं विदितं ममैतद्यथाविधावर्जुनवासुदेवौ १
शौरे रथं वाहयतोऽजुनस्य बलं महास्त्राणि च पाण्डवस्य
अहं विजानामि यथावदद्य परोक्षभूतं तव तत्तु शल्य २
तौ चाप्रधृष्यौ शस्त्रभृतां वरिष्ठौ व्यपेतभीर्योधयिष्यामि कृष्णौ
संतापयत्यभ्यधिकं तु रामाच्छापोऽद्य मां ब्राह्मणसत्तमाच्च ३
अवात्सं वै ब्राह्मणच्छद्मनाहंरामे पुरा दिव्यमस्त्रं चिकीर्षुः
तत्रापि मे देवराजेन विघ्नो हितार्थिना फल्गुनस्यैव शल्य ४
कृतोऽवभेदेन ममोरुमेत्य प्रविश्य कीटस्य तनुं विरूपाम्
गुरोर्भयाच्चापि न चेलिवानहं तच्चावबुद्धो ददृशे स विप्रः ५

पृष्टश्चाहं तमवोचं महर्षिं सूतोऽहमस्मीति स मां शशाप
सूतोपधावाप्तमिदं त्वयास्त्रं न कर्मकाले प्रतिभास्यति त्वाम् ६
अन्यत्र यस्मात्तव मृत्युकालादब्राह्मणे ब्रह्म न हि ध्रुवं स्यात्
तदद्य पर्याप्तमतीव शस्त्रमस्मिन्संग्रामे तुमुले तात भीमे ७
अपां पतिर्वेगवानप्रमेयो निमज्जयिष्यन्निवहान्प्रजानाम्
महानगं यः कुरुते समुद्रं वेलैव तं वारयत्यप्रमेयम् ८
प्रमुञ्चन्तं बाणसङ्घानमोघान्मर्मच्छिदो वीरहणः सपत्रान्
कुन्तीपुत्रं प्रतियोत्स्यामि युद्धे ज्याकर्षिणामुत्तममद्य लोके ९
एवं बलेनातिबलं महास्त्रं समुद्रकल्पं सुदुरापमुग्रम्
शरौघिणं पार्थिवान्मज्जयन्तं वेलेव पार्थमिषुभिः संसहिष्ये १०
अद्याहवे यस्य न तुल्यमन्यं मन्ये मनुष्यं धनुराददानम्
सुरासुरान्वै युधि यो जयेत तेनाद्य मे पश्य युद्धं सुघोरम् ११
अतिमानी पाण्डवो युद्धकामो अमानुषैरेष्यति मे महास्त्रैः
तस्यास्त्रमस्त्रैरभिहत्य संख्ये शरोत्तमैः पातयिष्यामि पार्थम् १२
दिवाकरेणापि समं तपन्तं समाप्तरश्मिं यशसा ज्वलन्तम्
तमोनुदं मेघ इवातिमात्रो धनञ्जयं छादयिष्यामि बाणैः १३
वैश्वानरं धूमशिखं ज्वलन्तं तेजस्विनं लोकमिमं दहन्तम्
मेघो भूत्वा शरवर्षैर्यथाग्निं तथा पार्थं शमयिष्यामि युद्धे १४
प्रमाथिनं बलवन्तं प्रहारिणं प्रभञ्जनं मातरिश्वानमुग्रम्
युद्धे सहिष्ये हिमवानिवाचलो धनञ्जयं क्रुद्धममृष्यमाणम् १५
विशारदं रथमार्गेष्वसक्तं धुर्यं नित्यं समरेषु प्रवीरम्
लोके वरं सर्वधनुर्धराणां धनञ्जयं संयुगे संसहिष्ये १६
अद्याहवे यस्य न तुल्यमन्यं मध्येमनुष्यं धनुराददानम्
सर्वामिमां यः पृथिवीं सहेत तथा विद्वान्योत्स्यमानोऽस्मि तेन १७
यः सर्वभूतानि सदेवकानि प्रस्थेऽजयत्खाण्डवे सव्यसाची
को जीवितं रक्षमाणो हि तेन युयुत्सते मामृते मानुषोऽन्य १८
अहं तस्य पौरुषं पाण्डवस्य ब्रूयां हृष्टः समितौ क्षत्रियाणाम्
किं त्वं मूर्खः प्रभषन्मूढचेता मामवोचः पौरुषमर्जुनस्य १९
अप्रियो यः पुरुषो निष्ठुरो हि क्षुद्रः क्षेप्ता क्षमिणश्चाक्षमावान्
हन्यामहं तादृशानां शतानि क्षमामि त्वां क्षमया कालयोगात् २०

अवोचस्त्वं पाण्डवार्थेऽप्रियाणि प्रधर्षयन्मां मूढवत्पापकर्मन्
मय्यार्जवे जिह्मगतिर्हतस्त्वं मित्रद्रोही सप्तपदं हि मित्रम् २१
कालस्त्वयं मृत्युमयोऽतिदारुणो दुर्योधनो युद्धमुपागमद्यत्
तस्यार्थ सिद्धिमभिकाङ्क्षमाणस्तमभ्येष्ये यत्र नैकान्त्यमस्ति २२
मित्रं मिदेर्नन्दतेः प्रीयतेर्वा संत्रायतेर्मानद मोदतेर्वा
ब्रवीति तच्चामुत विप्रपूर्वात्तच्चापि सर्वं मम दुर्योधनेऽस्ति २३
शत्रुः शदेः शासतेः शायतेर्वा शृणातेर्वा श्वयतेर्वापि सर्गे
उपसर्गाद्बहुधा सूदतेश्च प्रायेण सर्वं त्वयि तच्च मह्यम् २४
दुर्योधनार्थं तव चाप्रियार्थं यशोर्थमात्मार्थमपीश्वरार्थम्
तस्मादहं पाण्डववासुदेवौ योत्स्ये यत्नात्कर्म तत्पश्य मेऽद्य २५
अस्त्राणि पश्याद्य ममोत्तमानि ब्राह्माणि दिव्यान्यथ मानुषाणि
आसादयिष्याम्यहमुग्रवीर्यं द्विपोत्तमं मत्तमिवाभिमत्तः २६
अस्त्रं ब्राह्मं मनसा तद्ध्यजय्यं क्षेप्स्ये पार्थायाप्रतिमं जयाय
तेनापि मे नैव मुच्येत युद्धे न चेत्पतेद्विषमे मेऽद्य चक्रम् २७
वैवस्वताद्दण्डहस्ताद्वरुणाद्वापि पाशिनः
सगदाद्वा धनपतेः सवज्राद्वापि वासवात् २८
नान्यस्मादपि कस्माच्चिद्बिभिमो ह्याततायिनः
इति शल्य विजानीहि यथा नाहं बिभेम्यभीः २९
तस्माद्भयं न मे पार्थान्नापि चैव जनार्दनात्
अद्य युद्धं हि ताभ्यां मे संपराये भविष्यति ३०
श्वभ्रे ते पततां चक्रमिति मे ब्राह्मणोऽवदत्
युध्यमानस्य संग्रामे प्राप्तस्यैकायने भयम् ३१
तस्माद्बिभेमि बलवद्ब्राह्मणव्याहृतादहम्
एते हि सोमराजान ईश्वराः सुखदुःखयोः ३२
होमधेन्वा वत्समस्य प्रमत्त इषुणाहनम्
चरन्तमजने शल्य ब्राह्मणात्तपसो निधेः ३३
ईषादन्तान्सप्तशतान्दासीदासशतानि च
ददतो द्विजमुख्याय प्रसादं न चकार मे ३४
कृष्णानां श्वेतवत्सानां सहस्राणि चतुर्दश
आहरन्न लभे तस्मात्प्रसादं द्विजसत्तमात् ३५

ऋद्धं गेहं सर्वकामैर्यच्च मे वसु किञ्चन
तत्सर्वमस्मै सत्कृत्य प्रयच्छामि न चेच्छति ३६
ततोऽब्रवीन्मां याचन्तमपराद्धं प्रयत्नतः
व्याहृतं यन्मया सूत तत्तथा न तदन्यथा ३७
अनृतोक्तं प्रजा हन्यात्ततः पापमवाप्नुयात्
तस्माद्धर्माभिरक्षार्थं नानृतं वक्तुमुत्सहे ३८
मा त्वं ब्रह्मगतिं हिंस्याः प्रायश्चित्तं कृतं त्वया
मद्वाक्यं नानृतं लोके कश्चित्कुर्यात्समाप्नुहि ३९
इत्येतत्ते मया प्रोक्तं क्षिप्तेनापि सुहृत्तया
जानामि त्वाधिक्षिपन्तं जोषमास्स्वोत्तरं शृणु ४०
इति श्रीमहाभारते कर्णपर्वणि एकोनत्रिंशोऽध्यायः २९

त्रिंशोऽध्यायः

सञ्जय उवाच
ततः पुनर्महाराज मद्रराजमरिंदमम्
अभ्यभाषत राधेयः संनिवार्योत्तरं वचः १
यत्त्वं निदर्शनार्थं मां शल्य जल्पितवानसि
नाहं शक्यस्त्वया वाचा विभीषयितुमाहवे २
यदि मां देवताः सर्वा योधयेधुः सवासवाः
तथापि मे भयं न स्यात्किमु पार्थात्सकेशवात् ३
नाहं भीषयितुं शक्यो वाङ्मात्रेण कथञ्चन
अन्यं जानीहि यः शक्यस्त्वया भीषयितुं रणे ४
नीचस्य बलमेतावत्पारुष्यं यत्त्वमात्थ माम्
अशक्तोऽस्मद्गुणान्प्राप्तुं वल्गसे बहु दुर्मते ५
न हि कर्णः समुद्भूतो भयार्थमिह मारिष
विक्रमार्थमहं जातो यशोर्थं च तथैव च ६
इदं तु मे त्वमेकाग्रः शृणु मद्रजनाधिप
संनिधौ धृतराष्ट्रस्य प्रोच्यमानं मया श्रुतम् ७
देशांश्च विविधांश्चित्रान्पूर्ववृत्तांश्च पार्थिवान्
ब्राह्मणाः कथयन्तः स्म धृतराष्ट्रमुपासते ८

तत्र वृद्धः पुरावृत्ताः कथाः काश्चिद्द्विजोत्तमः
बाह्लीकदेशं मद्रांश्च कुत्सयन्वाक्यमब्रवीत् ९
बहिष्कृता हिमवता गङ्गया च तिरस्कृताः
सरस्वत्या यमुनया कुरुक्षेत्रेण चापि ये १०
पञ्चानां सिन्धुषष्ठानां नदीनां येऽन्तराश्रिताः
तान्धर्मबाह्यानशुचीन्बाह्लीकान्परिवर्जयेत् ११
गोवर्धनो नाम वटः शुभाण्डं नाम चत्वरम्
एतद्राजकुलद्वारमाकुमारः स्मराम्यहम् १२
कार्येणात्यर्थगाढेन बाह्लीकेषूषितं मया
तत एषां समाचारः संवासाद्विदितो मम १३
शाकलं नाम नगरमापगा नाम निम्नगा
जर्तिका नाम बाह्लीकास्तेषां वृत्तं सुनिन्दितम् १४
धानागौडासवे पीत्वा गोमांसं लशुनैः सह
अपूपमांसवाट्यानामाशिनः शीलवर्जिताः १५
हसन्ति गान्ति नृत्यन्ति स्त्रीभिर्मत्ता विवाससः
नगरागारवप्रेषु बहिर्माल्यानुलेपनाः १६
मत्तावगीतैर्विविधैः खरोष्ट्रनिनदोपमैः
आहुरन्योन्यमुक्तानि प्रब्रुवाणा मदोत्कटाः १७
हा हते हा हतेत्येव स्वाभिभर्तृहतेति च
आक्रोशन्त्यः प्रनृत्यन्ति मन्दाः पर्वस्वसंयताः १८
तेषां किलावलिप्तानां निवसन्कुरुजाङ्गले
कश्चिद्बाह्लीकमुख्यानां नातिहृष्टमना जगौ १९
सा नूनं बृहती गौरी सूक्ष्मकम्बलवासिनी
मामनुस्मरती शेते बाह्लीकं कुरुवासिनम् २०
शतद्रुकनदीं तीर्त्वा तां च रम्यामिरावतीम्
गत्वा स्वदेशं द्रक्ष्यामि स्थूलशङ्खाः शुभाः स्त्रियः २१
मनः शिलोज्ज्वलापाङ्गा गौर्यस्त्रिककुदाञ्जनाः
केवलाजिनसंवीताः कूर्दन्त्यः प्रियदर्शनाः २२
मृदङ्गानकशङ्खानां मर्दलानां च निस्वनैः
खरोष्ट्राश्वतरैश्चैव मत्ता यास्यामहे सुखम् २३

शमीपीलुकरीराणां वनेषु सुखवर्त्मसु
अपूपान्सक्तुपिण्डीश्च खादन्तो मथितान्विताः २४
पथिषु प्रबला भूत्वा कदासमृदितेऽध्वनि
खलोपहारं कुर्वाणास्ताडयिष्याम भूयसः २५
एवं हीनेषु व्रात्येषु बाह्लीकेषु दुरात्मसु
कश्चेतयानो निवसेन्मुहूर्तमपि मानवः २६
ईदृशा ब्राह्मणेनोक्ता बाह्लीका मोघचारिणः
येषां षड्भागहर्ता त्वमुभयोः शुभपापयोः २७
इत्युक्त्वा ब्राह्मणः साधुरुत्तरं पुनरुक्तवान्
बाह्लीकेष्वविनीतेषु प्रोच्यमानं निबोधत २८
तत्र स्म राक्षसी गाति सदा कृष्णचतुर्दशीम्
नगरे शाकले स्फीते आहत्य निशि दुन्दुभिम् २९
कदा वा घोषिका गाथाः पुनर्गास्यन्ति शाकले
गव्यस्य तृप्ता मांसस्य पीत्वा गौडं महासवम् ३०
गौरीभिः सह नारीभिर्बृहतीभिः स्वलंकृताः
पलाण्डुगण्डूषयुतान्खादन्ते चैडकान्बहून् ३१
वाराहं कौक्कुटं मांसं गव्यं गार्दभमौष्ट्रकम्
एडं च ये न खादन्ति तेषां जन्म निरर्थकम् ३२
इति गायन्ति ये मत्ताः शीधुना शाकलावतः
सबालवृद्धाः कूर्दन्तस्तेषु वृत्तं कथं भवेत् ३३
इति शल्य विजानीहि हन्त भूयो ब्रवीमि ते
यदन्योऽप्युक्तवानस्मान्ब्राह्मणः कुरुसंसदि ३४
पञ्च नद्यो वहन्त्येता यत्र पीलुवनान्यपि
शतद्रुश्च विपाशा च तृतीयेरावती तथा
चन्द्रभागा वितस्ता च सिन्धुषष्ठा बहिर्गताः ३५
आरट्टा नाम ते देशा नष्टधर्मान्न तान्व्रजेत्
व्रात्यानां दासमीयानां विदेहानामयज्वनाम् ३६
न देवाः प्रतिगृह्णन्ति पितरो ब्राह्मणास्तथा
तेषां प्रनष्टधर्माणां बाह्लीकानामिति श्रुतिः ३७
ब्राह्मणेन तथा प्रोक्तं विदुषा साधुसंसदि

काष्ठकुण्डेषु बाह्लीका मृण्मयेषु च भुञ्जते
सक्तुवाट्यावलिप्तेषु श्वादिलीढेषु निर्घृणाः ३८
आविकं चौष्ट्रिकं चैवक्षीरं गार्दभमेव च
तद्विकारांश्च बाह्लीकाः खादन्ति च पिबन्ति च ३९
पुत्रसंकरिणो जाल्माः सर्वान्नक्षीरभोजनाः
आरट्टा नाम बाह्लीका वर्जनीया विपश्चिता ४०
उत शल्य विजानीहि हन्त भूयो ब्रवीमि ते
यदन्योऽप्युक्तवान्सभ्यो ब्राह्मणः कुरुसंसदि ४१
युगंधरे पयः पीत्वा प्रोष्य चाप्यच्युतस्थले
तद्वद्भूतिलये स्नात्वा कथं स्वर्गं गमिष्यति ४२
पञ्च नद्यो वहन्त्येता यत्र निःसृत्य पर्वतात्
आरट्टा नाम बाह्लीका न तेष्वार्यो द्व्यहं वसेत् ४३
बहिश्च नाम ह्लीकश्च विपाशायां पिशाचकौ
तयोरपत्यं बाह्लीका नैषा सृष्टिः प्रजापतेः ४४
कारस्करान्महिषकान्कलिङ्गान्कीकटाटवीन्
कर्कोटकान्वीरकांश्चदुर्धर्मांश्च विवर्जयेत् ४५
इति तीर्थानुसर्तारं राक्षसी काचिदब्रवीत्
एकरात्रा शमीगेहे महोलूखलमेखला ४६
आरट्टा नाम ते देशा बाह्लीका नाम ते जनाः
वसातिसिन्धुसौवीरा इति प्रायो विकुत्सिताः ४७
उत शल्य विजानीहि हन्त भूयो ब्रवीमि ते
उच्यमानं मया सम्यक्तदेकाग्रमनाः शृणु ४८
ब्राह्मणः शिल्पिनो गेहमभ्यगच्छत्पुरातिथिः
आचारं तत्र संप्रेक्ष्य प्रीतः शिल्पिमथाब्रवीत् ४९
मया हिमवतः शृङ्गमेकेनाध्युषितं चिरम्
दृष्टाश्च बहवो देशा नानाधर्मसमाकुलाः ५०
न च केन च धर्मेण विरुध्यन्ते प्रजा इमाः
सर्वे हि तेऽब्रुवन्धर्म यथोक्तं वेदपारगैः ५१
अटता तु सदा देशान्नानाधर्मसमाकुलान्
आगच्छता महाराज बाह्लीकेषु निशामितम् ५२

तत्रैव ब्राह्मणो भूत्वा ततो भवति क्षत्रियः
वैश्यः शूद्रश्च बाह्लीकस्ततो भवति नापितः ५३
नापितश्च ततो भूत्वा पुनर्भवति ब्राह्मणः
द्विजो भूत्वा च तत्रैव पुनर्दासोऽपि जायते ५४
भवत्येकः कुले विप्रः शिष्टान्ये कामचारिणः
गान्धारा मद्रकाश्चैव बाह्लीकाः केऽप्यचेतसः ५५
एतन्मया श्रुतं तत्र धर्मसंकरकारकम्
कृत्स्नामटित्वा पृथिवीं बाह्लीकेषु विपर्ययः ५६
उत शल्य विजानीहि हन्त भूयो ब्रवीमि ते
यदप्यन्योऽब्रवीद्वाक्यं बाह्लीकानां विकुत्सितम् ५७
सती पुरा हृता काचिदारट्टा किल दस्युभिः
अधर्मतश्चोपयाता सा तानभ्यशपत्ततः ५८
बालां वन्धुमतीं यन्मामधर्मेणोपगच्छथ
तस्मान्नार्यो भविष्यन्ति बन्धक्यो वै कुलेषु वः
न चैवास्मात्प्रमोक्ष्यध्वं घोरात्पापान्नराधमाः ५९
कुरवः सहपाञ्चालाः शाल्वा मत्स्याः सनैमिषाः
कोसलाः काशयोऽङ्गाश्च कलिङ्गा मगधास्तथा ६०
चेदयश्च महाभागा धर्मं जानन्ति शाश्वतम्
नानादेशेषु सन्तश्च प्रायो बाह्या लयादृते ६१
आ मत्स्येभ्यः कुरुपाञ्चालदेश्या आ नैमिषाच्चेदयो ये विशिष्टाः
धर्मं पुराणमुपजीवन्ति सन्तो मद्रानृते पञ्चनदांश्च जिह्मान् ६२
एवं विद्वन्धर्मकथांश्च राजंस्तूष्णींभूतो जडवच्छल्य भूयाः
त्वं तस्य गोप्ता च जनस्य राजा षड्भागहर्ता शुभदुष्कृतस्य ६३
अथ वा दुष्कृतस्य त्वं हर्ता तेषामरक्षिता
रक्षिता पुण्यभाग्राजा प्रजानां त्वं त्वपुण्यभाक् ६४
पूज्यमाने पुरा धर्मे सर्वदेशेषु शाश्वते
धर्मं पाञ्चनदं दृष्ट्वा धिगित्याह पितामहः ६५
व्रात्यानां दाशमीयानां कृतेऽप्यशुभकर्मणाम्
इति पाञ्चनदं धर्ममवमेने पितामहः
स्वधर्मस्थेषु वर्णेषु सोऽप्येतं नाभिपूजयेत् ६६

उत शल्य विजानीहि हन्त भूयो ब्रवीमि ते
कल्माषपादः सरसि निमज्जन्राक्षसोऽब्रवीत् ६७
क्षत्रियस्य मलं भैक्षं ब्राह्मणस्यानृतं मलम्
मलं पृथिव्या बाह्लीकाः स्त्रीणां मद्रस्त्रियो मलम् ६८
निमज्जमानमुद्धृत्य कश्चिद्राजा निशाचरम्
अपृच्छत्तेन चाख्यातं प्रोक्तवान्यन्निबोध तत् ६९
मानुषाणां मलं म्लेच्छा म्लेच्छानां मौष्टिका मलम्
मौष्टिकानां मलं शण्डः शण्डानां राजयाजकाः ७०
राजयाजकयाज्यानां मद्रकाणांच यन्मलम्
तद्भवेद्वै तव मलं यद्यस्मान्न विमुञ्चसि ७१
इति रक्षोपसृष्टेषु विषवीर्यहतेषु च
राक्षसं भेषजं प्रोक्तं ससिद्धं वचनोत्तरम् ७२
ब्राह्मं पाञ्चालाः कौरवेयाः स्वधर्मः सत्यं मत्स्याः शूरसेनाश्च यज्ञः
प्राच्या दासा वृषला दाक्षिणात्याःस्तेना बाह्लीकाः सङ्करा वै सुराष्ट्राः ७३
कृतघ्नता परवित्तापहारः सुरापानं गुरुदारावमर्शः
येषां धर्मस्तान्प्रति नास्त्यधर्म आरट्टाकान्पाञ्चनदान्धिगस्तु ७४
आ पाञ्चलेभ्यः कुरवो नैमिषाश्च मत्स्याश्चैवाप्यथ जानन्ति धर्मम्
कलिङ्गकाश्चाङ्गका मागधाश्च शिष्टान्धर्मानुपजीवन्ति वृद्धाः ७५
प्राचीं दिशं श्रिता देवा जातवेदःपुरोगमाः
दक्षिणां पितरो गुप्तां यमेन शुभकर्मणा ७६
प्रतीचीं वरुणः पाति पालयन्नसुरान्बली
उदीचीं भगवान्सोमो ब्रह्मण्यो ब्राह्मणैः सह ७७
रक्षः पिशाचान्हिमवान्गुह्यकान्गन्धमादनः
ध्रुवः सर्वाणि भूतानि विष्णुर्लोकाञ्जनार्दनः ७८
इङ्गितज्ञाश्च मगधाः प्रेक्षितज्ञाश्च कोसलाः
अर्धोक्ताः कुरुपाञ्चालाः शाल्वाः कृत्स्नानुशासनाः
पार्वतीयाश्च विषमा यथैव गिरयस्तथा ७९
सर्वज्ञा यवना राजञ्शूराश्चैव विशेषतः
म्लेच्छाः स्वसंज्ञानियता नानुक्त इतरो जनः ८०
प्रतिरब्धास्तु बाह्लीका न च केचन मद्रकाः

स त्वमेतादृशः शल्य नोत्तरं वक्तुमर्हसि ८१
एतज्ज्ञात्वा जोषमास्स्व प्रतीपं मा स्म वै कृथाः
स त्वां पूर्वमहं हत्वा हनिष्ये केशवार्जुनौ ८२
शल्य उवाच
आतुराणां परित्यागः स्वदारसुतविक्रयः
अङ्गेषु वर्तते कर्ण येषामधिपतिर्भवान् ८३
रथातिरथसंख्यायां यत्त्वा भीष्मस्तदाब्रवीत्
तान्विदित्वात्मनो दोषान्निर्मन्युर्भव मा क्रुधः ८४
सर्वत्र ब्राह्मणाः सन्ति सन्ति सर्वत्र क्षत्रियाः
वैश्याः शूद्रास्तथा कर्ण स्त्रियः साध्व्यश्च सुव्रताः ८५
रमन्ते चोपहासेन पुरुषाः पुरुषैः सह
अन्योन्यमवतक्षन्तो देशे देशे समैथुनाः ८६
परवाच्येषु निपुणः सर्वो भवति सर्वदा
आत्मवाच्यं न जानीते जानन्नपि विमुह्यति ८७
सञ्जय उवाच
कर्णोऽपि नोत्तरं प्राह शल्योऽप्यभिमुखः परान्
पुनः प्रहस्य राधेय पुनर्याहीत्यचोदयत् ८८
इति श्रीमहाभारते कर्णपर्वणि त्रिंशोऽध्यायः ३०

एकत्रिंशोऽध्यायः

सञ्जय उवाच
ततः परानीकभिदं व्यूहमप्रतिमं परैः
समीक्ष्य कर्णः पार्थानां धृष्टद्युम्नाभिरक्षितम् १
प्रययौ रथघोषेण सिंहनादरवेण च
वादित्राणां च निनदैः कम्पयन्निव मेदिनीम् २
वेपमान इव क्रोधाद्युद्धशौण्डः परन्तपः
प्रतिव्यूह्य महातेजा यथावद्भरतर्षभ ३
व्यधमत्पाण्डवीं सेनामासुरीं मघवानिव
युधिष्ठिरं चाभिभवन्नपसव्यं चकार ह ४
धृतराष्ट्र उवाच

कथं सञ्जय राधेयः प्रत्यव्यूहत पाण्डवान्
धृष्टद्युम्नमुखान्वीरान्भीमसेनाभिरक्षितान् ५
के च प्रपक्षौ पक्षौ वा मम सैन्यस्य सञ्जय
प्रविभज्य यथान्यायं कथं वा समवस्थिताः ६
कथं पाण्डुसुताश्चापि प्रत्यव्यूहन्त मामकान्
कथं चैतन्महायुद्धं प्रावर्तत सुदारुणम् ७
क्व च बीभत्सुरभवद्यत्कर्णोऽयाद्युधिष्ठिरम्
को ह्यर्जुनस्य सांनिध्ये शक्तोऽभ्येतुं युधिष्ठिरम् ८
सर्वभूतानि यो ह्येकः खाण्डवे जितवान्पुरा
कस्तमन्यत्र राधेयात्प्रतियुध्येज्जिजीविषुः ९
सञ्जय उवाच
शृणु व्यूहस्य रचनामर्जुनश्च यथा गतः
परिदाय नृपं तेभ्यः संग्रामश्चाभवद्यथा १०
कृपः शारद्वतो राजन्मागधश्च तरस्विनः
सात्वतः कृतवर्मा च दक्षिणं पक्षमाश्रिताः ११
तेषां प्रपक्षे शकुनिरुलूकश्च महारथः
सादिभिर्विमलप्रासैस्तवानीकमरक्षताम् १२
गान्धारिभिरसंभ्रान्तैः पार्वतीयैश्च दुर्जयैः
शलभानामिव व्रातैः पिशाचैरिव दुर्दृशैः १३
चतुस्त्रिंशत्सहस्राणि रथानामनिवर्तिनाम्
संशप्तका युद्धशौण्डा वामं पार्श्वमपालयन् १४
समुच्छ्रितास्तव सुतैः कृष्णार्जुनजिघांसवः
तेषां प्रपक्षः काम्बोजाः शकाश्च यवनैः सह १५
निदेशात्सूतपुत्रस्य सरथाः साश्वपत्तयः
आह्वयन्तोऽर्जुनं तस्थुः केशवं च महाबलम् १६
मध्येसेनामुखं कर्णो व्यवातिष्ठत दंशितः
चित्रवर्माङ्गदः स्रग्वी पालयन्ध्वजिनीमुखम् १७
रक्ष्यमाणः सुसंरब्धैः पुत्रैः शस्त्रभृतां वरः
वाहिनीप्रमुखं वीरः सम्प्रकर्षन्नशोभत १८
अयोरत्निर्महाबाहुः सूर्यवैश्वानरद्युतिः

महाद्विपस्कन्धगतः पिङ्गलः प्रियदर्शनः
दुःशासनो वृतः सैन्यैः स्थितो व्यूहस्य पृष्ठतः १९
तमन्वयान्महाराज स्वयं दुर्योधनो नृपः
चित्राश्वैश्चित्रसंनाहैः सोदर्यैरभिरक्षितः २०
रक्ष्यमाणो महावीर्यैः सहितैर्मद्रकेकयैः
अशोभत महाराज देवैरिव शतक्रतुः २१
अश्वत्थामा कुरूणां च ये प्रवीरा महारथाः
नित्यमत्ताश्च मातङ्गाः शूरैर्म्लेच्छैरधिष्ठिताः
अन्वयुस्तद्रथानीकं क्षरन्त इव तोयदाः २२
ते ध्वजैर्वैजयन्तीभिर्ज्वलद्भिः परमायुधैः
सादिभिश्चास्थिता रेजुर्द्रुमवन्त इवाचलाः २३
तेषां पदातिनागानां पादरक्षाः सहस्रशः
पट्टिशासिधराः शूरा बभूवुरनिवर्तिनः २४
सादिभिः स्यन्दनैर्नागैरधिकं समलंकृतैः
स व्यूहराजो विबभौ देवासुरचमूपमः २५
बार्हस्पत्यः सुविहितो नायकेन विपश्चिता
नृत्यतीव महाव्यूहः परेषामादधद्भयम् २६
तस्य पक्षप्रपक्षेभ्यो निष्पतन्ति युयुत्सवः
पत्त्यश्वरथमातङ्गाः प्रावृषीव बलाहकाः २७
ततः सेनामुखे कर्णं दृष्ट्वा राजा युधिष्ठिरः
धनञ्जयममित्रघ्नमेकवीरमुवाच ह २८
पश्यार्जुन महाव्यूहं कर्णेन विहितं रणे
युक्तं पक्षैः प्रपक्षैश्च सेनानीकं प्रकाशते २९
तदेतद्वै समालोक्य प्रत्यमित्रं महद्बलम्
यथा नाभिभवत्यस्मांस्तथा नीतिर्विधीयताम् ३०
एवमुक्तोऽजुनो राज्ञा प्राञ्जलिर्नृपमब्रवीत्
यथा भवानाह तथा तत्सर्वं न तदन्यथा ३१
यस्त्वस्य विहितो घातस्तं करिष्यामि भारत
प्रधानवध एवास्य विनाशस्तं करोम्यहम् ३२
युधिष्ठिर उवाच

तस्मात्त्वमेव राधेयं भीमसेनः सुयोधनम्
वृषसेनं च नकुलः सहदेवोऽपि सौबलम् ३३
दुःशासनं शतानीको हार्दिक्यं शिनिपुंगवः
धृष्टद्युम्नस्तथा द्रौणिं स्वयं यास्याम्यहं कृपम् ३४
द्रौपदेया धार्तराष्ट्राञ्शिष्टान्सह शिखण्डिना
ते ते च तांस्तानहितानस्माकं घ्नन्तु मामकाः ३५
सञ्जय उवाच
इत्युक्तो धर्मराजेन तथेत्युक्त्वा धनञ्जयः
व्यादिदेश स्वसैन्यानि स्वयं चागाच्चमूमुखम् ३६
अथ तं रथमायान्तं दृष्ट्वात्यद्भुतदर्शनम्
उवाचाधिरथिं शल्यः पुनस्तं युद्धदुर्मदम् ३७
अयं स रथ आयाति श्वेताश्वः कृष्णसारथिः
निघ्नन्नमित्रान्कौन्तेयो यं यं त्वं परिपृच्छसि ३८
श्रूयते तुमुलः शब्दो रथनेमिस्वनो महान्
एष रेणुः समुद्भूतो दिवमावृत्य तिष्ठति ३९
चक्रनेमिप्रणुन्ना च कम्पते कर्ण मेदिनी
प्रवात्येष महावायुरभितस्तव वाहिनीम्
क्रव्यादा व्याहरन्त्येते मृगाः कुर्वन्ति भैरवम् ४०
पश्य कर्ण महाघोरं भयदं लोमहर्षणम्
कबन्धं मेघसंकाशं भानुमावृत्य संस्थितम् ४१
पश्य यूथैर्बहुविधैर्मृगाणां सर्वतोदिशम्
बलिभिर्दृप्तशार्दूलैरादित्योऽभिनिरीक्ष्यते ४२
पश्य कङ्कांश्च गृध्रांश्च समवेतान्सहस्रशः
स्थितानभिमुखान्घोरानन्योन्यमभिभाषतः ४३
सिताश्चाश्वाः समायुक्तास्तव कर्ण महारथे
प्रदराः प्रज्वलन्त्येते ध्वजश्चैव प्रकम्पते ४४
उदीर्यतो हयान्पश्य महाकायान्महाजवान्
प्लवमानान्दर्शनीयानाकाशे गरुडानिव ४५
ध्रुवमेषु निमित्तेषु भूमिमावृत्य पार्थिवाः
स्वप्स्यन्ति निहताः कर्ण शतशोऽथ सहस्रशः ४६

शङ्खानां तुमुलः शब्दः श्रूयते लोमहर्षणः
आनकानां च राधेय मृदङ्गानां च सर्वशः ४७
बाणशब्दान्बहुविधान्नराश्वरथनिस्वनान्
ज्यातलत्रेषुशब्दांश्च शृणु कर्ण महात्मनाम् ४८
हेमरूप्यप्रमृष्टानां वाससां शिल्पिनिर्मिताः
नानावर्णा रथे भान्ति श्वसनेन प्रकम्पिताः ४९
सहेमचन्द्रतारार्काः पताकाः किङ्किणीयुताः
पश्य कर्णार्जुनस्यैताः सौदामिन्य इवाम्बुदे ५०
ध्वजाः कणकणायन्ते वातेनाभिसमीरिताः
सपताका रथाश्चापि पाञ्चालानां महात्मनाम् ५१
नागाश्वरथपत्त्यौघांस्तावकान्समभिघ्नतः
ध्वजाग्रं दृश्यते त्वस्य ज्याशब्दश्चापि श्रूयते ५२
अद्य द्रष्टासि तं वीरं श्वेताश्वं कृष्णसारथिम्
निघ्नन्तं शात्रवान्संख्ये यं कर्ण परिपृच्छसि ५३
अद्य तौ पुरुषव्याघ्रौ लोहिताक्षौ परन्तपौ
वासुदेवार्जुनौ कर्ण द्रष्टास्येकरथस्थितौ ५४
सारथिर्यस्य वार्ष्णेयो गाण्डीवं यस्य कार्मुकम्
तं चेद्धन्तासि राधेय त्वं नो राजा भविष्यसि ५५
एष संशप्तकाहूतस्तानेवाभिमुखो गतः
करोति कदनं चैषां संग्रामे द्विषतां बली
इति ब्रुवाणं मद्रेशं कर्णः प्राहातिमन्युमान् ५६
पश्य संशप्तकैः क्रुद्धैः सर्वतः समभिद्रुतः
एष सूर्य इवाम्भोदैश्छन्नः पार्थो न दृश्यते
एतदन्तोऽजुनः शल्य निमग्नः शोकसागरे ५७
शल्य उवाच
वरुणं कोऽम्भसा हन्यादिन्धनेन च पावकम्
को वानिलं निगृह्णीयात्पिबेद्वा को महार्णवम् ५८
ईदृग्रूपमहं मन्ये पार्थस्य युधि निग्रहम्
न हि शक्योऽजुनो जेतुं सेन्द्रैः सर्वैः सुरासुरैः ५९
अथैवं परितोषस्ते वाचोक्त्वा सुमना भव

न स शक्यो युधा जेतुमन्यं कुरु मनोरथम् ६०
बाहुभ्यामुद्धरेद्भूमिं दहेत्क्रुद्ध इमाः प्रजाः
पातयेत्त्रिदिवाद्देवान्योऽजुनं समरे जयेत् ६१
पश्य कुन्तीसुतं वीरं भीममक्लिष्टकारिणम्
प्रभासन्तं महाबाहुं स्थितं मेरुमिवाचलम् ६२
अमर्षी नित्यसंरब्धश्चिरं वैरमनुस्मरन्
एष भीमो जयप्रेप्सुर्युधि तिष्ठति वीर्यवान् ६३
एष धर्मभृतां श्रेष्ठो धर्मराजो युधिष्ठिरः
तिष्ठत्यसुकरः संख्ये परैः परपुरञ्जयः ६४
एतौ च पुरुषव्याघ्रावश्विनाविव सोदरौ
नकुलः सहदेवश्च तिष्ठतो युधि दुर्जयौ ६५
दृश्यन्त एते कार्ष्णेयाः पञ्च पञ्चाचला इव
व्यवस्थिता योत्स्यमानाः सर्वेऽजुनसमा युधि ६६
एते द्रुपदपुत्राश्च धृष्टद्युम्नपुरोगमाः
हीनाः सत्यजिता वीरास्तिष्ठन्ति परमौजसः ६७
इति संवदतोरेव तयोः पुरुषसिंहयोः
ते सेने समसज्जेतां गङ्गायमुनवद्भृशम् ६८
इति श्रीमहाभारते कर्णपर्वणि एकत्रिंशोऽध्यायः ३१

द्वात्रिंशोऽध्यायः

धृतराष्ट्र उवाच
तथा व्यूढेष्वनीकेषु संसक्तेषु च सञ्जय
संशप्तकान्कथं पार्थो गतः कर्णश्च पाण्डवान् १
एतद्विस्तरतो युद्धं प्रब्रूहि कुशलो ह्यसि
न हि तृप्यामि वीराणां शृण्वानो विक्रमान्रणे २
सञ्जय उवाच
तत्स्थाने समवस्थाप्य प्रत्यमित्रं महाबलम्
अव्यूहतार्जुनो व्यूहं पुत्रस्य तव दुर्नये ३
तत्सादिनागकलिलं पदातिरथसंकुलम्
धृष्टद्युम्नमुखैर्व्यूढमशोभत महद्बलम् ४

पारावतसवर्णाश्वश्चन्द्रादित्यसमद्युतिः
पार्षतः प्रबभौ धन्वी कालो विग्रहवानिव ५
पार्षतं त्वभि संतस्थुर्द्रौपदेया युयुत्सवः
सानुगा भीमवपुषश्चन्द्रं तारागणा इव ६
अथ व्यूढेष्वनीकेषु प्रेक्ष्य संशप्तकान्रणे
क्रुद्धोऽजुनोऽभिदुद्राव व्याक्षिपन्गाण्डिवं धनुः ७
अथ संशप्तकाः पार्थमभ्यधावन्वधैषिणः
विजये कृतसंकल्पा मृत्युं कृत्वा निवर्तनम् ८
तदश्वसंघबहुलं मत्तनागरथाकुलम्
पत्तिमच्छूरवीरौघैर्द्रुतमर्जुनमाद्रवत् ९
स संप्रहारस्तुमुलस्तेषमासीत्किरीटिना
तस्यैवं नः श्रुतो यादृङ्निवातकवचैः सह १०
रथानश्वान्ध्वजान्नागान्पत्तीन्रथपतीनपि
इषून्धनूंषि खड्गांश्च चक्राणि च परश्वधान् ११
सायुधानुद्यतान्बाहूनुद्यतान्यायुधानि च
चिच्छेद द्विषतां पार्थः शिरांसि च सहस्रशः १२
तस्मिन्सैन्ये महावर्ते पातालावर्तसंनिभे
निमग्नं तं रथं मत्वा नेदुः संशप्तका मुदा १३
स पुरस्तादरीन्हत्वा पश्चार्धेनोत्तरेण च
दक्षिणेन च बीभत्सुः क्रुद्धो रुद्रः पशूनिव १४
अथ पाञ्चालचेदीनां सृञ्जयानां च मारिष
त्वदीयैः सह संग्राम आसीत्परमदारुणः १५
कृपश्च कृतवर्मा च शकुनिश्चापि सौबलः
हृष्टसेनाः सुसंरब्धा रथानीकैः प्रहारिणः १६
कोसलैः काशिमत्स्यैश्च कारूषैः केकयैरपि
शूरसेनैः शूरवीरैर्युयुधुर्युद्धदुर्मदाः १७
तेषामन्तकरं युद्धं देहपाप्मप्रणाशनम्
शूद्रविट्क्षत्रवीराणां धर्म्यं स्वर्ग्यं यशस्करम् १८
दुर्योधनोऽपि सहितो भ्रातृभिर्भरतर्षभ
गुप्तः कुरुप्रवीरैश्च मद्राणां च महारथैः १९

पाण्डवैः सहपाञ्चालैश्चेदिभिः सात्यकेन च
युध्यमानं रणे कर्णं कुरुवीरोऽभ्यपालयत् २०
कर्णोऽपि निशितैर्बाणैर्विनिहत्य महाचमूम्
प्रमृद्य च रथश्रेष्ठान्युधिष्ठिरमपीडयत् २१
विपत्रायुध देहासून्कृत्वा शत्रून्सहस्रशः
युक्त्वा स्वर्गयशोभ्यां च स्वेभ्यो मुदमुदावहत् २२
धृतराष्ट्र उवाच
यत्तत्प्रविश्य पार्थानां सेनां कुर्वञ्जनक्षयम्
कर्णो राजानमभ्यर्च्छत्तन्ममाचक्ष्व सञ्जय २३
के च प्रवीराः पार्थानां युधि कर्णमवारयन्
कांश्च प्रमथ्याधिरथिर्युधिष्ठिरमपीडयत् २४
सञ्जय उवाच
धृष्टद्युम्नमुखान्पार्थान्दृष्ट्वा कर्णो व्यवस्थितान्
समभ्यधावत्त्वरितः पाञ्चालाञ्शत्रुकर्शनः २५
तं तूर्णमभिधावन्तं पाञ्चाला जितकाशिनः
प्रत्युद्ययुर्महाराज हंसा इव महार्णवम् २६
ततः शङ्खसहस्राणां निस्वनो हृदयंगमः
प्रादुरासीदुभयतो भेरीशब्दश्च दारुणः २७
नानावादित्रनादश्च द्विपाश्वरथनिस्वनः
सिंहनादश्च वीराणामभवद्दारुणस्तदा २८
साद्रिद्रुमार्णवा भूमिः सवाताम्बुदमम्बरम्
सार्केन्दुग्रहनक्षत्रा द्यौश्च व्यक्तं व्यघूर्णत २९
अति भूतानि तं शब्दं मेनिरेऽति च विव्यथुः
यानि चाप्लवसत्त्वानि प्रायस्तानि मृतानि च ३०
अथ कर्णो भृशं क्रुद्धः शीघ्रमस्त्रमुदीरयन्
जघान पाण्डवीं सेनामासुरीं मघवानिव ३१
स पाण्डवरथांस्तूर्णं प्रविश्य विसृजञ्शरान्
प्रभद्रकाणां प्रवरानहनत्सप्तसप्ततिम् ३२
ततः सुपुङ्खैर्निशितै रथश्रेष्ठो रथेषुभिः
अवधीत्पञ्चविंशत्या पाञ्चालान्पञ्चविंशतिम् ३३

सुवर्णपुङ्खैर्नाराचैः परकायविदारणैः
चेदिकानवधीद्वीरः शतशोऽथ सहस्रशः ३४
तं तथा समरे कर्म कुर्वाणमतिमानुषम्
परिवव्रुर्महाराज पाञ्चालानां रथव्रजाः ३५
ततः संधाय विशिखान्पञ्च भारत दुःसहान्
पाञ्चालानवधीत्पञ्च कर्णो वैकर्तनो वृषः ३६
भानुदेवं चित्रसेनं सेनाबिन्दुं च भारत
तपनं शूरसेनं च पाञ्चालानवधीद्रणे ३७
पाञ्चालेषु च शूरेषु वध्यमानेषु सायकैः
हाहाकारो महानासीत्पाञ्चालानां महाहवे ३८
तेषां संकीर्यमाणानां हाहाकारकृता दिशः
पुनरेव च तान्कर्णो जघानाशु पतत्रिभिः ३९
चक्ररक्षौ तु कर्णस्य पुत्रौ मारिष दुर्जयौ
सुषेणः सत्यसेनश्च त्यक्त्वा प्राणानयुध्यताम् ४०
पृष्ठगोपस्तु कर्णस्य ज्येष्ठः पुत्रो महारथः
वृषसेनः स्वयं कर्णं पृष्ठतः पर्यपालयत् ४१
धृष्टद्युम्नः सात्यकिश्च द्रौपदेया वृकोदरः
जनमेजयः शिखण्डी च प्रवीराश्च प्रभद्रकाः ४२
चेदिकेकयपाञ्चाला यमौ मत्स्याश्च दंशिताः
समभ्यधावन्राधेयं जिघांसन्तः प्रहारिणः ४३
त एनं विविधैः शस्त्रैः शरधाराभिरेव च
अभ्यवर्षन्विमृद्नन्तः प्रावृषीवाम्बुदा गिरिम् ४४
पितरं तु परीप्सन्तः कर्णपुत्राः प्रहारिणः
त्वदीयाश्चापरे राजन्वीरा वीरानवारयन् ४५
सुषेणो भीमसेनस्य छित्वा भल्लेन कार्मुकम्
नाराचैः सप्तभिर्विद्ध्वा हृदि भीमं ननाद ह ४६
अथान्यद्धनुरादाय सुदृढं भीमविक्रमः
सज्यं वृकोदरः कृत्वा सुषेणस्याच्छिनद्धनुः ४७
विव्याध चैनं नवभिः क्रुद्धो नृत्यन्निवेषुभिः
कर्णं च तूर्णं विव्याध त्रिसप्तत्या शितैः शरैः ४८

सत्यसेनं च दशभिः साश्वसूतध्वजायुधम्
पश्यतां सुहृदां मध्ये कर्णपुत्रमपातयत् ४९
क्षुरप्रणुन्नं तत्तस्य शिरश्चन्द्रनिभाननम्
शुभदर्शनमेवासीन्नालभ्रष्टमिवाम्बुजम् ५०
हत्वा कर्णसुतं भीमस्तावकान्पुनरार्दयत्
कृपहार्दिक्ययोश्छित्त्वा चापे तावप्यथार्दयत् ५१
दुःशासनं त्रिभिर्विद्ध्वा शकुनिं षड्भिरायसैः
उलूकं च पतत्रिं च चकार विरथावुभौ ५२
हे सुषेण हतोऽसीति ब्रुवन्नादत्त सायकम्
तमस्य कर्णश्चिच्छेद त्रिभिश्चैनमताडयत् ५३
अथान्यमपि जग्राह सुपर्वाणं सुतेजनम्
सुषेणायासृजद्भीमस्तमप्यस्याच्छिनद्वृषः ५४
पुनः कर्णस्त्रिसप्तत्या भीमसेनं रथेषुभिः
पुत्रं परीप्सन्विव्याध क्रूरं क्रूरैर्जिघांसया ५५
सुषेणस्तु धनुर्गृह्य भारसाधनमुत्तमम्
नकुलं पञ्चभिर्बाणैर्बाह्वोरुरसि चार्दयत् ५६
नकुलस्तं तु विंशत्या विद्ध्वा भारसहैर्दृढैः
ननाद बलवन्नादं कर्णस्य भयमादधत् ५७
तं सुषेणो महाराज विद्ध्वा दशभिराशुगैः
चिच्छेद च धनुः शीघ्रं क्षुरप्रेण महारथः ५८
अथान्यद्धनुरादाय नकुलः क्रोधमूर्च्छितः
सुषेणं बहुभिर्बाणैर्वारयामास संयुगे ५९
स तु बाणैर्दिशो राजन्नाच्छाद्य परवीरहा
आजघ्ने सारथिं चास्य सुषेणं च ततस्त्रिभिः
चिच्छेद चास्य सुदृढं धनुर्भल्लैस्त्रिभिस्त्रिधा ६०
अथान्यद्धनुरादाय सुषेणः क्रोधमूर्छितः
अविध्यन्नकुलं षष्ट्या सहदेवं च सप्तभिः ६१
तद्युद्धं सुमहद्घोरमासीद्देवासुरोपमम्
निघ्नतां सायकैस्तूर्णमन्योन्यस्य वधं प्रति ६२
सात्यकिर्वृषसेनस्य हत्वा सूतं त्रिभिः शरैः

धनुश्चिच्छेद भल्लेन जघानाश्वांश्च सप्तभिः
ध्वजमेकेषुणोन्मथ्य त्रिभिस्तं हृद्यताडयत् ६३
अथावसन्नः स्वरथे मुहूर्तात्पुनरुत्थितः
अथो जिघांसुः शैनेयं खड्गचर्मभृदभ्ययात् ६४
तस्य चाप्लवतः शीघ्रं वृषसेनस्य सात्यकिः
वराहकर्णैर्दशभिरविध्यदसिचर्मणी ६५
दुःशासनस्तु तं दृष्ट्वा विरथं व्यायुधं कृतम्
आरोप्य स्वरथे तूर्णमपोवाह रथान्तरम् ६६
अथान्यं रथमास्थाय वृषसेनो महारथः
कर्णस्य युधि दुर्धर्षः पुनः पृष्ठमपालयत् ६७
दुःशासनं तु शैनेयो नवैर्नवभिराशुगैः
विसूताश्वरथं कृत्वा ललाटे त्रिभिरार्पयत् ६८
स त्वन्यं रथमास्थाय विधिवत्कल्पितं पुनः
युयुधे पाण्डुभिः सार्धं कर्णस्याप्याययन्बलम् ६९
धृष्टद्युम्नस्ततः कर्णमविध्यद्दशभिः शरैः
द्रौपदेयास्त्रिसप्तत्या युयुधानस्तु सप्तभिः ७०
भीमसेनश्चतुःषष्ट्या सहदेवश्च पंचभिः
नकुलस्त्रिंशता बाणैः शतानीकश्च सप्तभिः
शिखण्डी दशभिर्वीरो धर्मराजः शतेन तु ७१
एते चान्ये च राजेन्द्र प्रवीरा जयगृद्धिनः
अभ्यर्दयन्महेष्वासं सूतपुत्रं महामृधे ७२
तान्सूतपुत्रो विशिखैर्दशभिर्दशभिः शितैः
रथे चारु चरन्वीरः प्रत्यविध्यदरिंदमः ७३
तत्रास्त्रवीर्यं कर्णस्य लाघवं च महात्मनः
अपश्याम महाराज तदद्भुतमिवाभवत् ७४
न ह्याददानं ददृशुः संदधानं च सायकान्
विमुञ्चन्तं च संरम्भाद्ददृशुस्ते महारथम् ७५
द्यौर्वियद्भूर्दिशश्चाशु प्रणुन्ना निशितैः शरैः
अरुणाभ्रावृताकारं तस्मिन्देशे बभौ वियत् ७६
नृत्यन्निव हि राधेयश्चापहस्तः प्रतापवान्

यैर्विद्धः प्रत्यविध्यत्तानेकैकं त्रिगुणैः शरैः ७७
दशभिर्दशभिश्चैनान्पुनर्विद्ध्वा ननाद ह
साश्वसूतध्वजच्छत्रास्ततस्ते विवरं ददुः ७८
तान्प्रमृद्नन्महेष्वासान्राधेयः शरवृष्टिभिः
राजानीकमसंबाधं प्राविशच्छत्रुकर्शनः ७९
स रथांस्त्रिशतान्हत्वा चेदीनामनिवर्तिनाम्
राधेयो निशितैर्बाणैस्ततोऽभ्यार्च्छद्युधिष्ठिरम् ८०
ततस्ते पाण्डवा राजञ्शिखण्डीच ससात्यकिः
राधेयात्परिरक्षन्तो राजानं पर्यवारयन् ८१
तथैव तावकाः सर्वे कर्णं दुर्वारणं रणे
यत्ताः सेनामहेष्वासाः पर्यरक्षन्त सर्वशः ८२
नानावादित्रघोषाश्च प्रादुरासन्विशां पते
सिंहनादश्च संजज्ञे शूराणामनिवर्तिनाम् ८३
ततः पुनः समाजग्मुरभीताः कुरुपाण्डवाः
युधिष्ठिरमुखाः पार्थाः सूतपुत्रमुखा वयम् ८४
इति श्रीमहाभारते कर्णपर्वणि द्वात्रिंशोऽध्यायः ३२

त्रयस्त्रिंशोऽध्यायः

सञ्जय उवाच
विदार्य कर्णस्तां सेनां धर्मराजमुपाद्रवत्
रथहस्त्यश्वपत्तीनां सहस्रैः परिवारितः १
नानायुधसहस्राणि प्रेषितान्यरिभिर्वृषः
छित्त्वा बाणशतैरुग्रैस्तानविध्यदसंभ्रमः २
निचकर्त शिरांस्येषां बाहूनूरूंश्च सर्वशः
ते हता वसुधां पेतुर्भग्नाश्चान्ये विदुद्रुवुः ३
द्रविडान्ध्रनिषादास्तु पुनः सात्यकिचोदिताः
अभ्यर्दयञ्जिघांसन्तः पत्तयः कर्णमाहवे ४
ते विबाहुशिरस्त्राणाः प्रहताः कर्णसायकैः
पेतुः पृथिव्यां युगपच्छिन्नं शालवनं यथा ५
एवं योधशतान्याजौ सहस्राण्ययुतानि च

हतानीयुर्महीं देहैर्यशसापूरयन्दिशः ६
अथ वैकर्तनं कर्णं रणे क्रुद्धमिवान्तकम्
रुरुधुः पाण्डुपाञ्चाला व्याधिं मन्त्रौषधैरिव ७
स तान्प्रमृद्याभ्यपतत्पुनरेव युधिष्ठिरम्
मन्त्रौषधिक्रियातीतो व्याधिरत्युल्बणो यथा ८
स राजगृद्धिभी रुद्धः पाण्डुपाञ्चालकेकयैः
नाशकत्तानतिक्रान्तुं मृत्युर्ब्रह्मविदो यथा ९
ततो युधिष्ठिरः कर्णमदूरस्थं निवारितम्
अब्रवीत्परवीरघ्नः क्रोधसंरक्तलोचनः १०
कर्ण कर्ण वृथादृष्टे सूतपुत्र वचः शृणु
सदा स्पर्धसि संग्रामे फल्गुनेन यशस्विना
तथास्मान्बाधसे नित्यं धार्तराष्ट्रमते स्थितः ११
यद्बलं यच्च ते वीर्यं प्रद्वेषो यश्च पाण्डुषु
तत्सर्वं दर्शयस्वाद्य पौरुषं महदास्थितः
युद्धश्रद्धां च तेऽद्याहं विनेष्यामि महाहवे १२
एवमुक्त्वा महाराज कर्णं पाण्डुसुतस्तदा
सुवर्णपुङ्खैर्दशभिर्विव्याधायस्मयैः शितैः १३
तं सूतपुत्रो नवभिः प्रत्यविध्यदरिन्दमः
वत्सदन्तैर्महेष्वासः प्रहसन्निव भारत १४
ततः क्षुराभ्यां पाञ्चाल्यौ चक्ररक्षौ महात्मनः
जघान समरे शूरः शरैः संनतपर्वभिः १५
तावुभौ धर्मराजस्य प्रवीरौ परिपार्श्वतः
रथाभ्याशे चकाशेते चन्द्रस्येव पुनर्वसू १६
युधिष्ठिरः पुनः कर्णमविध्यत्त्रिंशता शरैः
सुषेणं सत्यसेनं च त्रिभिस्त्रिभिरताडयत् १७
शल्यं नवत्या विव्याध त्रिसप्तत्या च सूतजम्
तांश्चास्य गोप्तृन्विव्याध त्रिभिस्त्रिभिरजिह्मगैः १८
ततः प्रहस्याधिरथिर्विधुन्वानः स कार्मुकम्
भित्त्वा भल्लेन राजानं विद्ध्वा षष्ट्यानदन्मुदा १९
ततः प्रवीराः पाण्डूनामभ्यधावन्युधिष्ठिरम्

सूतपुत्रात्परीप्सन्तः कर्णमभ्यर्दयञ्शरैः २०
सात्यकिश्चेकितानश्च युयुत्सुः पाण्ड्य एव च
धृष्टद्युम्नः शिखण्डी च द्रौपदेयाः प्रभद्रकाः २१
यमौ च भीमसेनश्च शिशुपालस्य चात्मजः
कारूषा मत्स्यशेषाश्च केकयाः काशिकोसलाः
एते च त्वरिता वीरा वसुषेणमवारयन् २२
जनमेजयश्च पाञ्चाल्यः कर्णं विव्याध सायकैः
वराहकर्णैर्नाराचैर्नालीकैर्निशितैः शरैः
वत्सदन्तैर्विपाठैश्च क्षुरप्रैश्चटकामुखैः २३
नानाप्रहरणैश्चोग्रै रथहस्त्यश्वसादिनः
सर्वतोऽभ्याद्रवन्कर्णं परिवार्य जिघांसया २४
स पाण्डवानां प्रवरैः सर्वतः समभिद्रुतः
उदैरयद्ब्राह्ममस्त्रं शरैः संपूरयन्दिशः २५
ततः शरमहाज्वालो वीर्योष्मा कर्णपावकः
निर्दहन्पाण्डववनं चारुः पर्यचरद्रणे २६
स संवार्य महास्त्राणि महेष्वासो महात्मनाम्
प्रहस्य पुरुषेन्द्रस्य शरैश्चिच्छेद कार्मुकम् २७
ततः संधाय नवतिं निमेषान्नतपर्वणाम्
विभेद कवचं राज्ञो रणे कर्णः शितैः शरैः २८
तद्वर्म हेमविकृतं रराज निपतत्तदा
सविद्युदभ्रं सवितुः शिष्टं वातहतं यथा २९
तदङ्गं पुरुषेन्द्रस्य भ्रष्टवर्म व्यरोचत
रत्नैरलंकृतं दिव्यैर्व्यभ्रं निशि यथा नभः ३०
स विवर्मा शरैः पार्थो रुधिरेण समुक्षितः
क्रुद्धः सर्वायसीं शक्तिं चिक्षेपाधिरथिं प्रति ३१
तां ज्वलन्तीमिवाकाशे शरैश्चिच्छेद सप्तभिः
सा छिन्ना भूमिमपतन्महेष्वासस्य सायकैः ३२
ततो बाह्वोर्ललाटे च हृदि चैव युधिष्ठिरः
चतुर्भिस्तोमरैः कर्णं ताडयित्वा मुदानदत् ३३
उद्भिन्नरुधिरः कर्णः क्रुद्धः सर्प इव श्वसन्

ध्वजं चिच्छेद भल्लेन त्रिभिर्विव्याध पाराडवम्
इषुधीचास्यचिच्छेद रथं च तिलशोऽच्छिनत् ३४
एवं पार्थो व्यपायात्स निहतप्रार्ष्टिसारथिः
अशक्नुवन्प्रमुखतः स्थातुं कर्णस्य दुर्मनाः ३५
तमभिद्रुत्य राधेयः स्कन्धं संस्पृश्य पाणिना
अब्रवीत्प्रहसन्राजन्कुत्सयन्निव पाराडवम् ३६
कथं नाम कुले जातः क्षत्रधर्मे व्यवस्थितः
प्रजह्यात्समरे शत्रून्प्राणान्रक्षन्महाहवे ३७
न भवान्क्षत्रधर्मेषु कुशलोऽसीति मे मतिः
ब्राह्मे बले भवान्युक्तः स्वाध्याये यज्ञकर्मणि ३८
मा स्म युध्यस्व कौन्तेय मा च वीरान्समासदः
मा चैनानप्रियं ब्रूहि मा च व्रज महारणम् ३९
एवमुक्त्वा ततः पार्थं विसृज्य च महाबलः
न्यहनत्पाराडवीं सेनां वज्रहस्त इवासुरीम्
ततः प्रायाद्द्रुतं राजन्व्रीडन्निव जनेश्वरः ४०
अथ प्रयान्तं राजानमन्वयुस्ते तदाच्युतम्
चेदिपाराडवपाञ्चालाः सात्यकिश्च महारथः
द्रौपदेयास्तथाशूरामाद्रीपुत्रौ च पाराडवौ ४१
ततो युधिष्ठिरानीकं दृष्ट्वा कर्णः पराङ्मुखम्
कुरुभिः सहितो वीरैः पृष्ठगैः पृष्ठमन्वयात् ४२
शङ्खभेरीनिनादैश्च कार्मुकाणां च निस्वनैः
बभूव धार्तराष्ट्राणां सिंहनादरवस्तदा ४३
युधिष्ठिरस्तु कौरव्य रथमारुह्य सत्वरः
श्रुतकीर्तेर्महाराज दृष्टवान्कर्णविक्रमम् ४४
काल्यमानं बलं दृष्ट्वा धर्मराजो युधिष्ठिरः
तान्योधानब्रवीत्क्रुद्धो हतैनं वै सहस्रशः ४५
ततो राज्ञाभ्यनुज्ञाताःपाराडवानां महारथाः
भीमसेनमुखाः सर्वे पुत्रांस्ते प्रत्युपाद्रवन् ४६
अभवत्तुमुलः शब्दो योधानां तत्र भारत
हस्त्यश्वरथपत्तीनां शस्त्राणां च ततस्ततः ४७

उत्तिष्ठत प्रहरत प्रैताभिपततेति च
इति ब्रुवाणा अन्योन्यं जघ्नुर्योधा रणाजिरे ४८
अभ्रच्छायेव तत्रासीच्छरवृष्टिभिरम्बरे
समावृत्तैर्नरवरैर्निघ्नद्भिरितरेतरम् ४९
विपताकाध्वजच्छत्रा व्यश्वसूतायुधा रणे
व्यङ्गाङ्गावयवाः पेतुः क्षितौ क्षीणा हतेश्वराः ५०
प्रवराणीव शैलानां शिखराणि द्विपोत्तमाः
सारोहा निहताः पेतुर्वज्रभिन्ना इवाद्रयः ५१
छिन्नभिन्नविपर्यस्तैर्वर्मालंकारविग्रहैः
सारोहास्तुरगाः पेतुर्हतवीराः सहस्रशः ५२
विप्रविद्धायुधाङ्गाश्च द्विरदाश्वरथैर्हताः
प्रतिवीरैश्च संमर्दे पत्तिसंघाः सहस्रशः ५३
विशालायतताम्राक्षैः पद्मेन्दुसदृशाननैः
शिरोभिर्युद्धशौण्डानां सर्वतः संस्तृता मही ५४
तथा तु वितते व्योम्नि निस्वनं शुश्रुवुर्जनाः
विमानैरप्सरः संघैर्गीतवादित्रनिस्वनैः ५५
हतान्कृत्तानभिमुखान्वीरान्वीरैः सहस्रशः
आरोप्यारोप्य गच्छन्ति विमानेष्वप्सरोगणाः ५६
तद्दृष्ट्वा महदाश्चर्यं प्रत्यक्षं स्वर्गलिप्सया
प्रहृष्टमनसः शूराः क्षिप्रं जग्मुः परस्परम् ५७
रथिनो रथिभिः सार्धं चित्रं युयुधुराहवे
पत्तयः पत्तिभिर्नागा नागैः सह हयैर्हयाः ५८
एवं प्रवृत्ते संग्रामे गजवाजिजनक्षये
सैन्ये च रजसा व्याप्ते स्वे स्वाञ्जघ्नुः परे परान् ५९
कचाकचि बभौ युद्धं दन्तादन्ति नखानखि
मुष्टियुद्धं नियुद्धं च देहपाप्मविनाशनम् ६०
तथा वर्तति स्रंगामे गजवाजिजनक्षये
नराश्वगजदेहेभ्यः प्रसृता लोहितापगा
नराश्वगजदेहान्सा व्युवाह पतितान्बहून् ६१
नराश्वगजसंबाधे नराश्वगजसादिनाम्

लोहितोदा महाघोरा नदी लोहितकर्दमा
नराश्वगजदेहान्सा वहन्ती भीरुभीषणी ६२
तस्याः परमपारं च व्रजन्ति विजयैषिणः
गाधेन च प्लवन्तश्च निमज्ज्योन्मज्ज्य चापरे ६३
ते तु लोहितदिग्धाङ्गा रक्तवर्मायुधाम्बराः
सस्नुस्तस्यां पपुश्चासृङ्म्लुश्च भरतर्षभ ६४
रथानश्वान्नरान्नागानायुधाभरणानि च
वसनान्यथ वर्माणि हन्यमानान्हतानपि
भूमिं खं द्यां दिशश्चैव प्रायः पश्याम लोहितम् ६५
लोहितस्य तु गन्धेन स्पर्शेन च रसेन च
रूपेण चातिरक्तेन शब्देन च विसर्पता
विषादः सुमहानासीत्प्रायः सैन्यस्य भारत ६६
तत्तु विप्रहतं सैन्यं भीमसेनमुखैस्तव
भूयः समाद्रवन्वीराः सात्यकिप्रमुखा रथाः ६७
तेषामापततां वेगमविषह्य महात्मनाम्
पुत्राणां ते महत्सैन्यमासीद्राजन्पराङ्मुखम् ६८
तत्प्रकीर्णरथाश्वेभं नरवाजिसमाकुलम्
विध्वस्तचर्मकवचं प्रविद्धायुधकार्मुकम् ६९
व्यद्रवत्तावकं सैन्यं लोड्यमानं समन्ततः
सिंहार्दितं महारण्ये यथा गजकुलं तथा ७०
इति श्रीमहाभारते कर्णपर्वणि त्रयस्त्रिंशोऽध्यायः ३३

चतुस्त्रिंशोऽध्यायः

सञ्जय उवाच
तानभिद्रवतो दृष्ट्वा पाण्डवांस्तावकं बलम्
क्रोशतस्तव पुत्रस्य न स्म राजन्यवर्तत १
ततः पक्षात्प्रपक्षाच्च प्रपक्षैश्चापि दक्षिणात्
उदस्तशस्त्राः कुरवो भीममभ्यद्रवन्रणे २
कर्णोऽपि दृष्ट्वा द्रवतो धार्तराष्ट्रान्पराङ्मुखान्
हंसवर्णान्हयाग्र्यांस्तान्प्रैषीद्यत्र वृकोदरः ३

ते प्रेषिता महाराज शल्येनाहवशोभिना
भीमसेनरथं प्राप्य समसज्जन्त वाजिनः ४
दृष्ट्वा कर्णं समायान्तं भीमः क्रोधसमन्वितः
मतिं दध्रे विनाशाय कर्णस्य भरतर्षभ ५
सोऽब्रवीत्सात्यकिं वीरं धृष्टद्युम्नं च पार्षतम्
एनं रक्षत राजानं धर्मात्मानं युधिष्ठिरम्
संशयान्महतो मुक्तं कथंचित्प्रेक्षतो मम ६
अग्रतो मे कृतो राजा छिन्नसर्वपरिच्छदः
दुर्योधनस्य प्रीत्यर्थं राधेयेन दुरात्मना ७
अन्तमद्य करिष्यामि तस्य दुःखस्य पार्षत
हन्ता वास्मि रणे कर्णं स वा मां निहनिष्यति
संग्रामेण सुघोरेण सत्यमेतद्ब्रवीमि वः ८
राजानमद्य भवतां न्यासभूतं ददामि वै
अस्य संरक्षणे सर्वे यतध्वं विगतज्वराः ९
एवमुक्त्वा महाबाहुः प्रायादाधिरथिं प्रति
सिंहनादेन महता सर्वाः संनादयन्दिशः १०
दृष्ट्वा त्वरितमायान्तं भीमं युद्धाभिनन्दिनम्
सूतपुत्रमथोवाच मद्राणामीश्वरो विभुः ११
पश्य कर्ण महाबाहुं क्रुद्धं पाण्डवनन्दनम्
दीर्घकालार्जितं क्रोधं मोक्तुकामं त्वयि ध्रुवम् १२
ईदृशं नास्य रूपं मे दृष्टपूर्वं कदाचन
अभिमन्यौ हते कर्ण राक्षसे वा घटोत्कचे १३
त्रैलोक्यस्य समस्तस्य शक्तः क्रुद्धो निवारणे
बिभर्ति यादृशं रूपं कालाग्निसदृशं शुभम् १४
इति ब्रुवति राधेयं मद्राणामीश्वरे नृप
अभ्यवर्तत वै कर्णं क्रोधदीप्तो वृकोदरः १५
तथागतं तु संप्रेक्ष्य भीमं युद्धाभिनन्दिनम्
अब्रवीद्वचनं शल्यं राधेयः प्रहसन्निव १६
यदुक्तं वचनं मेऽद्य त्वया मद्रजनेश्वर
भीमसेनं प्रति विभो तत्सत्यं नात्र संशयः १७

एष शूरश्च वीरश्च क्रोधनश्च वृकोदरः
निरपेक्षः शरीरे च प्राणतश्च बलाधिकः १८
अज्ञातवासं वसता विराटनगरे तदा
द्रौपद्याः प्रियकामेन केवलं बाहुसंश्रयात्
गूढभावं समाश्रित्य कीचकः सगणो हतः १९
सोऽद्य संग्रामशिरसि संनद्धः क्रोधमूर्च्छितः
किंकरोद्यतदण्डेन मृत्युनापि व्रजेद्रणम् २०
चिरकालाभिलषितो ममायं तु मनोरथः
अर्जुनं समरे हन्यां मां वा हन्याद्धनञ्जयः
स मे कदाचिदद्यैव भवेद्भीमसमागमात् २१
निहते भीमसेने तु यदि वा विरथीकृते
अभियास्यति मां पार्थस्तन्मे साधु भविष्यति
अत्र यन्मन्यसे प्राप्तं तच्छीघ्रं संप्रधारय २२
एतच्छ्रुत्वा तु वचनं राधेयस्य महात्मनः
उवाच वचनं शल्यः सूतपुत्रं तथागतम् २३
अभियासि महाबाहो भीमसेनं महाबलम्
निरस्य भीमसेनं तु ततः प्राप्स्यसि फल्गुनम् २४
यस्ते कामोऽभिलषितश्चिरात्प्रभृति हृद्गतः
स वै संपत्स्यते कर्ण सत्यमेतद्ब्रवीमि ते २५
एवमुक्ते ततः कर्णः शल्यं पुनरभाषत
हन्ताहमर्जुनं संख्ये मां वा हन्ता धनञ्जयः
युद्धे मनः समाधाय याहि याहीत्यचोदयत् २६
ततः प्रायाद्रथेनाशु शल्यस्तत्र विशां पते
यत्र भीमो महेष्वासो व्यद्रावयत वाहिनीम् २७
ततस्तूर्यनिनादश्च भेरीणां च महास्वनः
उदतिष्ठत राजेन्द्र कर्णभीमसमागमे २८
भीमसेनोऽथ संक्रुद्धस्तव सैन्यं दुरासदम्
नाराचैर्विमलैस्तीक्ष्णैर्दिशः प्राद्रावयद्बली २९
स संनिपातस्तुमुलो भीमरूपो विशां पते
आसीद्रौद्रो महाराज कर्णपाण्डवयोर्मृधे

ततो मुहूर्ताद्राजेन्द्र पाराडवः कर्णमाद्रवत् ३०
तमापतन्तं संप्रेद्दय कर्णो वैकर्तनो वृषः
ग्राजघानोरसि क्रुद्धो नाराचेन स्तनान्तरे
पुनश्चैनममेयात्मा शरवर्षैरवाकिरत् ३१
स विद्धः सूतपुत्रेण छादयामास पत्रिभिः
विव्याध निशितैः कर्णं नवभिर्नतपर्वभिः ३२
तस्य कर्णो धनुर्मध्ये द्विधा चिच्छेद पत्रिणा
ग्रथ तं छिन्नधन्वानमभ्यविध्यत्स्तनान्तरे
नाराचेन सुतीद्दणेन सर्वावरणभेदिना ३३
सोऽन्यत्कार्मुकमादाय सूतपुत्रं वृकोदरः
राजन्मर्मसु मर्मज्ञो विद्ध्वा सुनिशितैः शरैः
ननाद बलवन्नादं कम्पयन्निव रोदसी ३४
तं कर्णः पञ्चविंशत्या नाराचानां समार्दयत्
मदोत्कटं वने दृप्तमुल्काभिरिव कुञ्जरम् ३५
ततः सायकभिन्नाङ्गः पाराडवः क्रोधमूर्च्छितः
संरम्भामर्षताम्राद्मः सूतपुत्रवधेच्छया ३६
स कार्मुके महावेगं भारसाधनमुत्तमम्
गिरीणामपि भेत्तारं सायकं समयोजयत् ३७
विकृष्य बलवच्चापमाकर्णादतिमारुतिः
तं मुमोच महेष्वासः क्रुद्धः कर्णजिघांसया ३८
स विसृष्टो बलवता बाणो वज्राशनिस्वनः
ग्रदारयद्रणे कर्णं वज्रवेग इवाचलम् ३९
स भीमसेनाभिहतो सूतपुत्रः कुरूद्वह
निषसाद रथोपस्थे विसंज्ञः पृतनापतिः ४०
ततो मद्राधिपो दृष्ट्वा विसंज्ञं सूतनन्दनम्
ग्रपोवाह रथेनाजौ कर्णमाहवशोभिनम् ४१
ततः पराजिते कर्णे धार्तराष्ट्रीं महाचमूम्
व्यद्रावयद्भीमसेनो यथेन्द्रो दानवीं चमूम् ४२
इति श्रीमहाभारते कर्णपर्वणि चतुस्त्रिंशत्तमोऽध्यायः ३४

पञ्चत्रिंशोऽध्यायः

धृतराष्ट्र उवाच
सुदुष्करमिदं कर्म कृतं भीमेन सञ्जय
येन कर्णो महाबाहू रथोपस्थे निपातितः १
कर्णो ह्येको रणे हन्ता सृञ्जयान्पाण्डवैः सह
इति दुर्योधनः सूत प्राब्रवीन्मां मुहुर्मुहुः २
पराजितं तु राधेयं दृष्ट्वा भीमेन संयुगे
ततः परं किमकरोत्पुत्रो दुर्योधनो मम ३
सञ्जय उवाच
विभ्रान्तं प्रेक्ष्य राधेयं सूतपुत्रं महाहवे
महत्या सेनया राजन्सोदर्यान्समभाषत ४
शीघ्रं गच्छत भद्रं वो राधेयं परिरक्षत
भीमसेनभयागाधे मज्जन्तं व्यसनार्णवे ५
ते तु राज्ञा समादिष्टा भीमसेनजिघांसवः
अभ्यवर्तन्त संक्रुद्धाः पतंगा इव पावकम् ६
श्रुतायुर्दुर्धरः क्राथो विवित्सुर्विकटः समः
निषङ्गी कवची पाशी तथा नन्दोपनन्दकौ ७
दुष्प्रधर्षः सुबाहुश्च वातवेगसुवर्चसौ
धनुर्ग्राहो दुर्मदश्च तथा सत्त्वसमः सहः ८
एते रथैः परिवृता वीर्यवन्तो महाबलाः
भीमसेनं समासाद्य समन्तात्पर्यवारयन्
ते व्यमुञ्चञ्शरव्रातान्नानालिङ्गान्समन्ततः ९
स तैरभ्यर्द्यमानस्तु भीमसेनो महाबलः
तेषामापततां क्षिप्रं सुतानां ते नराधिप
रथैः पञ्चाशता सार्धं पञ्चाशन्न्यहनद्रथान् १०
विवित्सोस्तु ततः क्रुद्धो भल्लेनापाहरच्छिरः
सकुण्डलशिरस्त्राणं पूर्णचन्द्रोपमं तदा
भीमेन च महाराज स पपात हतो भुवि ११
तं दृष्ट्वा निहतं शूरं भ्रातरः सर्वतः प्रभो
अभ्यद्रवन्त समरे भीमं भीमपराक्रमम् १२

ततोऽपराभ्यां भल्लाभ्यां पुत्रयोस्ते महाहवे
जहार समरे प्राणान्भीमो भीमपराक्रमः १३
तौ धरामन्वपद्येतां वातरुग्णाविव द्रुमौ
विकटश्च समश्चोभौ देवगर्भसमौ नृप १४
ततस्तु त्वरितो भीमः क्राथं निन्ये यमक्षयम्
नाराचेन सुतीक्ष्णेन स हतो न्यपतद्भुवि १५
हाहाकारस्ततस्तीव्रः संबभूव जनेश्वरः
वध्यमानेषु ते राजंस्तदा पुत्रेषु धन्विषु १६
तेषां संलुलिते सैन्ये भीमसेनो महाबलः
नन्दोपनन्दौ समरे प्रापयद्यमसादनम् १७
ततस्ते प्राद्रवन्भीताः पुत्रास्ते विह्वलीकृताः
भीमसेनं रणेदृष्ट्वा कालान्तकयमोपमम् १८
पुत्रांस्ते निहतान्दृष्ट्वा सूतपुत्रो महामनाः
हंसवर्णान्हयान्भूयः प्राहिणोद्यत्र पाण्डवः १९
ते प्रेषिता महाराज मद्रराजेन वाजिनः
भीमसेनरथं प्राप्य समसज्जन्त वेगिताः २०
स संनिपातस्तुमुलो घोररूपो विशां पते
आसीद्रौद्रो महाराज कर्णपाण्डवयोर्मृधे २१
दृष्ट्वा मम महाराज तौ समेतौ महारथौ
आसीद्बुद्धिः कथं नूनमेतदद्य भविष्यति २२
ततो मुहूर्ताद्राजेन्द्र नातिकृच्छ्राद्धसन्निव
विरथं भीमकर्माणं भीमं कर्णश्चकार ह २३
विरथो भरतश्रेष्ठः प्रहसन्ननिलोपमः
गदाहस्तो महाबाहुरपतत्स्यन्दनोत्तमात् २४
नागान्सप्तशतान्राजन्नीषादन्तान्प्रहारिणः
व्यधमत्सहसा भीमः क्रुद्धरूपः परंतपः २५
दन्तवेष्टेषु नेत्रेषु कुम्भेषु स कटेषु च
मर्मस्वपि च मर्मज्ञो निनदन्व्यधमद्भृशम् २६
ततस्ते प्राद्रवन्भीताः प्रतीपं प्रहिताः पुनः
महामात्रैस्तमावव्रुर्मेघा इव दिवाकरम् २७

तान्स सप्तशतान्नागान्सारोहायुधकेतनान्
भूमिष्ठो गदया जघ्ने शरन्मेघानिवानिलः २८
ततः सुबलपुत्रस्य नागानतिबलान्पुनः
पोथयामास कौन्तेयो द्वापञ्चाशतमाहवे २९
तथा रथशतं साग्रं पत्तींश्च शतशोऽपरान्
न्यहनत्पाण्डवो युद्धे तापयंस्तव वाहिनीम् ३०
प्रताप्यमानं सूर्येण भीमेन च महात्मना
तव सैन्यं संचुकोच चर्म वह्निगतं यथा ३१
ते भीमभयसंत्रस्तास्तावका भरतर्षभ
विहाय समरे भीमं दुद्रुवुर्वै दिशो दश ३२
रथाः पञ्चशताश्चान्ये ह्लादिनश्चर्मवर्मिणः
भीममभ्यद्रवंस्तूर्णं शरपूगैः समन्ततः ३३
तान्ससूतरथान्सर्वान्सपताकाध्वजायुधान्
पोथयामास गदया भीमो विष्णुरिवासुरान् ३४
ततः शकुनिनिर्दिष्टाः सादिनः शूरसंमताः
त्रिसाहस्रा ययुर्भीमं शक्त्यृष्टिप्रासपाणयः ३५
तान्प्रत्युद्गम्य यवनानश्वारोहान्वरारिहा
विचरन्विविधान्मार्गान्घातयामास पोथयन् ३६
तेषामासीन्महाञ्शब्दस्ताडितानां च सर्वशः
असिभिश्छिद्यमानानां नडानामिव भारत ३७
एवं सुबलपुत्रस्य त्रिसाहस्रान्हयोत्तमान्
हत्वान्यं रथमास्थाय क्रुद्धो राधेयमभ्ययात् ३८
कर्णोऽपि समरे राजन्धर्मपुत्रमरिंदमम्
शरैः प्रच्छादयामास सारथिं चाप्यपातयत् ३९
ततः संप्रद्रुतं संख्ये रथं दृष्ट्वा महारथः
अन्वधावत्किरन्बाणैः कङ्कपत्रैरजिह्मगैः ४०
राजानमभि धावन्तं शरैरावृत्य रोदसी
क्रुद्धः प्रच्छादयामास शरजालेन मारुतिः ४१
संनिवृत्तस्ततस्तूर्णं राधेयः शत्रुकर्शनः
भीमं प्रच्छादयामास समन्तान्निशितैः शरैः ४२

भीमसेनरथव्यग्रं कर्णं भारत सात्यकिः
अभ्यर्दयदमेयात्मा पार्ष्णिग्रहणकारणात्
अभ्यवर्तत कर्णस्तमर्दितोऽपि शरैर्भृशम् ४३
तावन्योन्यं समासाद्य वृषभौ सर्वधन्विनाम्
विसृजन्तौ शरांश्चित्रान्विभ्राजेतां मनस्विनौ ४४
ताभ्यां वियति राजेन्द्र विततं भीमदर्शनम्
क्रौञ्चपृष्ठारुणं रौद्रं बाणजालं व्यदृश्यत ४५
नैव सूर्यप्रभां खं वा न दिशः प्रदिशः कुतः
प्राज्ञासिष्म वयं ताभ्यां शरैर्मुक्तैः सहस्रशः ४६
मध्याह्ने तपतो राजन्भास्करस्य महाप्रभाः
हृताः सर्वाः शरौघैस्तैः कर्णमाधवयोस्तदा ४७
सौबलं कृतवर्माणं द्रौणिमाधिरथिं कृपम्
संसक्तान्पाण्डवैर्दृष्ट्वा निवृत्ताः कुरवः पुनः ४८
तेषामापततां शब्दस्तीव्र आसीद्विशां पते
उद्धूतानां यथा वृष्ट्या सागराणां भयावहः ४९
ते सेने भृशसंविग्ने दृष्ट्वान्योन्यं महारणे
हर्षेण महता युक्ते परिगृह्य परस्परम् ५०
ततः प्रववृते युद्धं मध्यं प्राप्ते दिवाकरे
यादृशं न कदाचिद्धि दृष्टपूर्वं न च श्रुतम् ५१
बलौघस्तु समासाद्य बलौघं सहसा रणे
उपासर्पत वेगेन जलौघ इव सागरम् ५२
आसीन्निनादः सुमहान्बलौघानां परस्परम्
गर्जतां सागरौघाणां यथा स्यान्निस्वनो महान् ५३
ते तु सेने समासाद्य वेगवत्यौ परस्परम्
एकीभावमनुप्राप्ते नद्याविव समागमे ५४
ततः प्रववृते युद्धं घोररूपं विशां पते
कुरूणां पाण्डवानां च लिप्सतां सुमहद्यशः ५५
कुरूणां गर्जतां तत्र अविच्छेदकृता गिरः
श्रूयन्ते विविधा राजन्नामान्युद्दिश्य भारत ५६
यस्य यद्धि रणे न्यङ्गं पितृतो मातृतोऽपि वा

कर्मतः शीलतो वापि स तच्छ्रावयते युधि ५७
तान्दृष्ट्वा समरे शूरांस्तर्जयानान्परस्परम्
अभवन्मे मती राजन्नैषामस्तीति जीवितम् ५८
तेषां दृष्ट्वा तु क्रुद्धानां वपूंष्यमिततेजसाम्
अभवन्मे भयं तीव्रं कथमेतद्भविष्यति ५९
ततस्ते पाण्डवा राजन्कौरवाश्च महारथाः
ततक्षुः सायकैस्तीक्ष्णैर्निघ्नन्तो हि परस्परम् ६०
इति श्रीमहाभारते कर्णपर्वणि पञ्चत्रिंशोऽध्यायः ३५

षट्त्रिंशोऽध्यायः

सञ्जय उवाच
क्षत्रियास्ते महाराज परस्परवधैषिणः
अन्योन्यं समरे जघ्नुः कृतवैराः परस्परम् १
रथौघाश्च हयौघाश्च नरौघाश्च समन्ततः
गजौघाश्च महाराज संसक्ताः स्म परस्परम् २
गदानां परिघाणां च कणपानां च सर्पताम्
प्रासानां भिण्डिपालानां भुशुण्डीनां च सर्वशः ३
संपातं चान्वपश्याम संग्रामे भृशदारुणे
शलभा इव संपेतुः समन्ताच्छरवृष्टयः ४
नागा नागान्समासाद्य व्यधमन्त परस्परम्
हया हयांश्च समरे रथिनो रथिनस्तथा
पत्तयः पत्तिसंघैश्च हयसंघैर्हयास्तथा ५
पत्तयो रथमातङ्गान्रथा हस्त्यश्वमेव च
नागाश्च समरे त्र्यङ्गं ममृदुः शीघ्रगा नृप ६
पततां तत्र शूराणां क्रोशतां च परस्परम्
घोरमायोधनं जज्ञे पशूनां वैशसं यथा ७
रुधिरेण समास्तीर्णा भाति भारत मेदिनी
शक्रगोपगणाकीर्णा प्रावृषीव यथा धरा ८
यथा वा वाससी शुक्ले महारजनरञ्जिते
बिभृयाद्युवतिः श्यामा तद्वदासीद्वसुंधरा

मांसशोणितचित्रेव शातकौम्भमयीव च ९
छिन्नानां चोत्तमाङ्गानां बाहूनां चोरुभिः सह
कुण्डलानां प्रविद्धानां भूषणानां च भारत १०
निष्काणामधिसूत्राणां शरीराणां च धन्विनाम्
वर्मणां सपताकानां संघास्तत्रापतन्भुवि ११
गजान्गजाः समासाद्य विषाणाग्रैरदारयन्
विषाणाभिहतास्ते च भ्राजन्ते द्विरदा यथा १२
रुधिरेणावसिक्ताङ्गा गैरिकप्रस्रवा इव
यथा भ्राजन्ति स्यन्दन्तः पर्वता धातुमण्डिताः १३
तोमरान्गजिभिर्मुक्तान्प्रतीपानास्थितान्बहून्
हस्तैर्विचेरुस्ते नागा बभञ्जुश्चापरे तथा १४
नाराचैश्छिन्नवर्माणो भ्राजन्ते स्म गजोत्तमाः
हिमागमे महाराज व्यभ्रा इव महीधराः १५
शरैः कनकपुङ्खैस्तु चित्रा रेजुर्गजोत्तमाः
उल्काभिः संप्रदीप्ताग्राः पर्वता इव मारिष १६
केचिदभ्याहता नागा नागैर्नगनिभा भुवि
निपेतुः समरे तस्मिन्पक्षवन्त इवाद्रयः १७
अपरे प्राद्रवन्नागाः शल्यार्ता व्रणपीडिताः
प्रतिमानैश्च कुम्भैश्च पेतुरुर्व्यां महाहवे १८
निषेदुः सिंहवच्चान्ये नदन्तो भैरवान्रवान्
मम्लुश्च बहवो राजंश्चुकूजुश्चापरे तथा १९
हयाश्च निहता बाणैः स्वर्णभाण्डपरिच्छदाः
निषेदुश्चैव मम्लुश्च बभ्रमुश्च दिशो दश २०
अपरे कृष्यमाणाश्च विवेष्टन्तो महीतले
भावान्बहुविधांश्चक्रुस्ताडिताः शरतोमरैः २१
नरास्तु निहता भूमौ कूजन्तस्तत्र मारिष
दृष्ट्वा च बान्धवानन्ये पितॄनन्ये पितामहान् २२
धावमानान्परांश्चैव दृष्ट्वान्ये तत्र भारत
गोत्रनामानि ख्यातानि शशंसुरितरेतरम् २३
तेषां छिन्ना महाराज भुजाः कनकभूषणाः

उद्वेष्टन्ते विवेष्टन्ते पतन्ते चोत्पतन्ति च २४
निपतन्ति तथा भूमौ स्फुरन्ति च सहस्रशः
वेगांश्चान्ये रणे चक्रुः स्फुरन्त इव पन्नगाः २५
ते भुजा भोगिभोगाभाश्चन्दनाक्ता विशां पते
लोहितार्द्रा भृशं रेजुस्तपनीयध्वजा इव २६
वर्तमाने तथा घोरे संकुले सर्वतोदिशम्
अविज्ञाताः स्म युध्यन्ते विनिघ्नन्तः परस्परम् २७
भौमेन रजसा कीर्णे शस्त्रसंपातसंकुले
नैव स्वे न परे राजन्व्यज्ञायन्त तमोवृते २८
तथा तदभवद्युद्धं घोररूपं भयानकम्
शोणितोदा महानद्यः प्रसस्रुस्तत्र चासकृत् २९
शीर्षपाषाणसंछन्नाः केशशैवलशाद्वलाः
अस्थिसंघातसंकीर्णा धनुःशरवरोत्तमाः ३०
मांसकर्दमपङ्काश्च शोणितौघाः सुदारुणाः
नदीः प्रवर्तयामासुर्यमराष्ट्रविवर्धिनीः ३१
ता नद्यो घोररूपाश्च नयन्त्यो यमसादनम्
अवगाढा मज्जयन्त्यः क्षत्रस्याजनयन्भयम् ३२
क्रव्यादानां नरव्याघ्र नर्दतां तत्र तत्र ह
घोरमायोधनं जज्ञे प्रेतराजपुरोपमम् ३३
उत्थितान्यगणेयानि कबन्धानि समन्ततः
नृत्यन्त वै भूतगणाः संतृप्ता मांसशोणितैः ३४
पीत्वा च शोणितं तत्र वसां पीत्वा च भारत
मेदोमज्जावसातृप्तास्तृप्ता मांसस्य चैव हि
धावमानाश्च दृश्यन्ते काकगृध्रबलास्तथा ३५
शूरास्तु समरे राजन्भयं त्यक्त्वा सुदुस्त्यजम्
योधव्रतसमाख्याताश्चक्रुः कर्माण्यभीतवत् ३६
शरशक्तिसमाकीर्णे क्रव्यादगणसंकुले
व्यचरन्त गणैः शूराः ख्यापयन्तः स्वपौरुषम् ३७
अन्योन्यं श्रावयन्ति स्म नामगोत्राणि भारत
पितृनामानि च रणे गोत्रनामानि चाभितः ३८

श्रावयन्तो हि बहवस्तत्र योधा विशां पते
अन्योन्यमवमृद्नन्तः शक्तितोमरपट्टिशैः ३९
वर्तमाने तथा युद्धे घोररूपे सुदारुणे
व्यषीदत्कौरवी सेना भिन्ना नौरिव सागरे ४०
इति श्रीमहाभारते कर्णपर्वणि षट्त्रिंशोऽध्यायः ३६

सप्तत्रिंशोऽध्यायः

सञ्जय उवाच
वर्तमाने तदा युद्धे क्षत्रियाणां निमज्जने
गाण्डीवस्य महान्घोषः शुश्रुवे युधि मारिष १
संशप्तकानां कदनमकरोद्यत्र पाण्डवः
कोसलानां तथा राजन्नारायणबलस्य च २
संशप्तकास्तु समरे शरवृष्टिं समन्ततः
अपातयन्पार्थमूर्ध्नि जयगृद्धाः प्रमन्यवः ३
तां वृष्टिं सहसा राजंस्तरसा धारयन्प्रभुः
व्यगाहत रणे पार्थो विनिघ्नन्रथिनां वरः ४
निगृह्य तु रथानीकं कङ्कपत्रैः शिलाशितैः
आससाद रणे पार्थः सुशर्माणं महारथम् ५
स तस्य शरवर्षाणि ववर्ष रथिनां वरः
तथा संशप्तकाश्चैव पार्थस्य समरे स्थिताः ६
सुशर्मा तु ततः पार्थं विद्ध्वा नवभिराशुगैः
जनार्दनं त्रिभिर्बाणैरभ्यहन्दक्षिणे भुजे
ततोऽपरेण भल्लेन केतुं विव्याध मारिष ७
स वानरवरो राजन्विश्वकर्मकृतो महान्
ननाद सुमहन्नादं भीषयन्वै ननर्द च ८
कपेस्तु निनदं श्रुत्वा संत्रस्ता तव वाहिनी
भयं विपुलमादाय निश्चेष्टा समपद्यत ९
ततः सा शुशुभे सेना निश्चेष्टावस्थिता नृप
नानापुष्पसमाकीर्णं यथा चैत्ररथं वनम् १०
प्रतिलभ्य ततः संज्ञां योधास्ते कुरुसत्तम

अर्जुनं सिषिचुर्बाणैः पर्वतं जलदा इव
परिवव्रुस्तदा सर्वे पाण्डवस्य महारथम् ११
ते हयान्रथचक्रे च रथेषाश्चापि भारत
निगृह्य बलवत्तूर्णं सिंहनादमथानदन् १२
अपरे जगृहुश्चैव केशवस्य महाभुजौ
पार्थमन्ये महाराज रथस्थं जगृहुर्मुदा १३
केशवस्तु तदा बाहू विधुन्वन्रणमूर्धनि
पातयामास तान्सर्वान्दुष्टहस्तीव हस्तिनः १४
ततः क्रुद्धो रणे पार्थः संवृतस्तैर्महारथैः
निगृहीतं रथं दृष्ट्वा केशवं चाप्यभिद्रुतम्
रथारूढांश्च सुबहून्पदातींश्चाप्यपातयत् १५
आसन्नांश्च ततो योधाञ्शरैरासन्नयोधिभिः
च्यावयामास समरे केशवं चेदमब्रवीत् १६
पश्य कृष्ण महाबाहो संशप्तकगणान्मया
कुर्वाणान्दारुणं कर्म वध्यमानान्सहस्रशः १७
रथबन्धमिमं घोरं पृथिव्यां नास्ति कश्चन
यः सहेत पुमाँल्लोके मदन्यो यदुपुंगव १८
इत्येवमुक्त्वा बीभत्सुर्देवदत्तमथाधमत्
पाञ्चजन्यं च कृष्णोऽपि पूरयन्निव रोदसी १९
तं तु शङ्खस्वनं श्रुत्वा संशप्तकवरूथिनी
संचचाल महाराज वित्रस्ता चाभवद्भृशम् २०
पदबन्धं ततश्चक्रे पाण्डवः परवीरहा
नागमस्त्रं महाराज संप्रोदीर्य मुहुर्मुहुः २१
यानुद्दिश्य रणे पार्थः पदबन्धं चकार ह
ते बद्धाः पदबन्धेन पाण्डवेन महात्मना
निश्चेष्टा अभवन्राजन्नश्मसारमया इव २२
निश्चेष्टांस्तु ततो योधानवधीत्पाण्डुनन्दनः
यथेन्द्रः समरे दैत्यांस्तारकस्य वधे पुरा २३
ते वध्यमानाः समरे मुमुचुस्तं रथोत्तमम्
आयुधानि च सर्वाणि विस्रष्टुमुपचक्रमुः २४

ततः सुशर्मा राजेन्द्र गृहीतां वीक्ष्य वाहिनीम्
सौपर्णमस्त्रं त्वरितः प्रादुश्चक्रे महारथः २५
ततः सुपर्णाः संपेतुर्भक्षयन्तो भुजंगमान्
ते वै विदुद्रुवुर्नागा दृष्ट्वा तान्खचरान्नृप २६
बभौ बलं तद्विमुक्तं पदबन्धाद्विशां पते
मेघवृन्दाद्यथा मुक्तो भास्करस्तापयन्प्रजाः २७
विप्रमुक्तास्तु ते योधाः फल्गुनस्य रथं प्रति
ससृजुर्बाणसंघांश्च शस्त्रसंघांश्च मारिष २८
तां महास्त्रमयीं वृष्टिं संछिद्य शरवृष्टिभिः
व्यवातिष्ठत्ततो योधान्वासविः परवीरहा २९
सुशर्मा तु ततो राजन्बाणेनानतपर्वणा
अर्जुनं हृदये विद्ध्वा विव्याधान्यैस्त्रिभिः शरैः
स गाढविद्धो व्यथितो रथोपस्थ उपाविशत् ३०
प्रतिलभ्य ततः संज्ञां श्वेताश्वः कृष्णसारथिः
एन्द्रमस्त्रममेयात्मा प्रादुश्चक्रे त्वरान्वितः
ततो बाणसहस्राणि समुत्पन्नानि मारिष ३१
सर्वदिक्षु व्यदृश्यन्त सूदयन्तो नृप द्विपान्
हयान्रथांश्च समरे शस्त्रैः शतसहस्रशः ३२
वध्यमाने ततः सैन्ये विपुला भीः समाविशत्
संशप्तकगणानां च गोपालानां च भारत
न हि कश्चित्पुमांस्तत्र योऽर्जुनं प्रत्ययुध्यत ३३
पश्यतां तत्र वीराणामहन्यत महद्बलम्
हन्यमानमपश्यंश्च निश्चेष्टाः स्म पराक्रमे ३४
अयुतं तत्र योधानां हत्वा पाण्डुसुतो रणे
व्यभ्राजत रणे राजन्विधूमोऽग्निरिव ज्वलन् ३५
चतुर्दश सहस्राणि यानि शिष्टानि भारत
रथानामयुतं चैव त्रिसाहस्राश्च दन्तिनः ३६
ततः संशप्तका भूयः परिवव्रुर्धनंजयम्
मर्तव्यमिति निश्चित्य जयं वापि निवर्तनम् ३७
तत्र युद्धं महच्चासीत्तावकानां विशां पते

शूरेण बलिना सार्धं पाण्डवेन किरीटिना ३८
इति श्रीमहाभारते कर्णपर्वणि सप्तत्रिंशोऽध्यायः ३७

अष्टत्रिंशोऽध्यायः

सञ्जय उवाच
कृतवर्मा कृपो द्रौणिः सूतपुत्रश्च मारिष
उलूकः सौबलश्चैव राजा च सह सोदरैः १
सीदमानां चमूं दृष्ट्वा पाण्डुपुत्रभयार्दिताम्
समुज्जिहीर्षुर्वेगेन भिन्नां नावमिवार्णवे २
ततो युद्धमतीवासीन्मुहूर्तमिव भारत
भीरूणां त्रासजननं शूराणां हर्षवर्धनम् ३
कृपेण शरवर्षाणि विप्रमुक्तानि संयुगे
सृञ्जयाः शातयामासुः शलभानां व्रजा इव ४
शिखण्डी तु ततः क्रुद्धो गौतमं त्वरितो ययौ
ववर्ष शरवर्षाणि समन्तादेव ब्राह्मणे ५
कृपस्तु शरवर्षं तद्विनिहत्य महास्त्रवित्
शिखण्डिनं रणे क्रुद्धो विव्याध दशभिः शरैः ६
ततः शिखण्डी कुपितः शरैः सप्तभिराहवे
कृपं विव्याध सुभृशं कङ्कपत्रैरजिह्मगैः ७
ततः कृपः शरैस्तीक्ष्णैः सोऽतिविद्धो महारथः
व्यश्वसूतरथं चक्रे पार्षतं तु द्विजोत्तमः ८
हताश्वात्तु ततो यानादवप्लुत्य महारथः
चर्मखड्गे च संगृह्य सत्वरं ब्राह्मणं ययौ ९
तमापतन्तं सहसा शरैः संनतपर्वभिः
छादयामास समरे तदद्भुतमिवाभवत् १०
तत्राद्भुतमपश्याम शिलानां प्लवनं यथा
निश्चेष्टो यद्रणे राजञ्शिखण्डी समतिष्ठत ११
कृपेण छादितं दृष्ट्वा नृपोत्तम शिखण्डिनम्
प्रत्युद्ययौ कृपं तूर्णं धृष्टद्युम्नो महारथः १२
धृष्टद्युम्नं ततो यान्तं शारद्वतरथं प्रति

प्रतिजग्राह वेगेन कृतवर्मा महारथः १३
युधिष्ठिरमथायान्तं शारद्वतरथं प्रति
सपुत्रं सहसेनं च द्रोणपुत्रो न्यवारयत् १४
नकुलं सहदेवं च त्वरमाणौ महारथौ
प्रतिजग्राह ते पुत्रः शरवर्षेण वारयन् १५
भीमसेनं करूषांश्च केकयान्सहसृञ्जयान्
कर्णो वैकर्तनो युद्धे वारयामास भारत १६
शिखण्डिनस्ततो बाणान्कृपः शारद्वतो युधि
प्राहिणोत्त्वरया युक्तो दिधक्षुरिव मारिष १७
ताञ्शरान्प्रेषितांस्तेन समन्ताद्धेमभूषणान्
चिच्छेद खड्गमाविध्य भ्रामयंश्च पुनः पुनः १८
शतचन्द्रं ततश्चर्म गौतमः पार्षतस्य ह
व्यधमत्सायकैस्तूर्णं तत उच्चुक्रुशुर्जनाः १९
स विचर्मा महराज खड्गपाणिरुपाद्रवत्
कृपस्य वशमापन्नो मृत्योरास्यमिवातुरः २०
शारद्वतशरैर्ग्रस्तं क्लिश्यमानं महाबलम्
चित्रकेतुसुतो राजन्सुकेतुस्त्वरितो ययौ २१
विकिरन्ब्राह्मणं युद्धे बहुभिर्निशितैः शरैः
अभ्यापतदमेयात्मा गौतमस्य रथं प्रति २२
दृष्ट्वाविषह्यं तं युद्धे ब्राह्मणं चरितव्रतम्
अपयातस्ततस्तूर्णं शिखण्डी राजसत्तम २३
सुकेतुस्तु ततो राजन्गौतमं नवभिः शरैः
विद्ध्वा विव्याध सप्तत्या पुनश्चैनं त्रिभिः शरैः २४
अथास्य सशरं चापं पुनश्चिच्छेद मारिष
सारथिं च शरेणास्य भृशं मर्मण्यताडयत् २५
गौतमस्तु ततः क्रुद्धो धनुर्गृह्य नवं दृढम्
सुकेतुं त्रिंशता बाणैः सर्वमर्मस्वताडयत् २६
स विह्वलितसर्वाङ्गः प्रचचाल रथोत्तमे
भूमिचाले यथा वृक्षश्चलत्याकम्पितो भृशम् २७
चलतस्तस्य कायात्तु शिरो ज्वलितकुण्डलम्

सोष्णीषं सशिरस्त्राणं क्षुरप्रेणान्वपातयत् २८
तच्छिरः प्रापतद्भूमौ श्येनाहृतमिवामिषम्
ततोऽस्य कायो वसुधां पश्चात्प्राप तदा च्युतः २९
तस्मिन्हते महाराज त्रस्तास्तस्य पदानुगाः
गौतमं समरे त्यक्त्वा दुद्रुवुस्ते दिशो दश ३०
धृष्टद्युम्नं तु समरे संनिवार्य महाबलः
कृतवर्माब्रवीद्धृष्टस्तिष्ठ तिष्ठेति पार्षतम् ३१
तदभूत्तुमुलं युद्धं वृष्णिपार्षतयो रणे
आमिषार्थे यथा युद्धं श्येनयोर्गृद्ध्योर्नृप ३२
धृष्टद्युम्नस्तु समरे हार्दिक्यं नवभिः शरैः
आजघानोरसि क्रुद्धः पीडयन्हृदिकात्मजम् ३३
कृतवर्मा तु समरे पार्षतेन दृढाहतः
पार्षतं सरथं साश्वं छादयामास सायकैः ३४
सरथच्छादितो राजन्धृष्टद्युम्नो न दृश्यते
मेघैरिव परिच्छन्नो भास्करो जलदागमे ३५
विधूय तं बाणगणं शरैः कनकभूषणैः
व्यरोचत रणे राजन्धृष्टद्युम्नः कृतव्रणः ३६
ततस्तु पार्षतः क्रुद्धः शस्त्रवृष्टिं सुदारुणाम्
कृतवर्माणमासाद्य व्यसृजत्पृतनापतिः ३७
तामापतन्तीं सहसा शस्त्रवृष्टिं निरन्तराम्
शरैरनेकसाहस्रैर्हार्दिक्यो व्यधमद्युधि ३८
दृष्ट्वा तु दारितां युद्धे शस्त्रवृष्टिं दुरुत्तराम्
कृतवर्माणमभ्येत्य वारयामास पार्षतः ३९
सारथिं चास्य तरसा प्राहिणोद्यमसादनम्
भल्लेन शितधारेण स हतः प्रापतद्रथात् ४०
धृष्टद्युम्नस्तु बलवाञ्जित्वा शत्रुं महारथम्
कौरवान्समरे तूर्णं वारयामास सायकैः ४१
ततस्ते तावका योधा धृष्टद्युम्नमुपाद्रवन्
सिंहनादरवं कृत्वा ततो युद्धमवर्तत ४२
इति श्रीमहाभारते कर्णपर्वणि अष्टत्रिंशोऽध्यायः ३८

एकोन चत्वारिंशोऽध्यायः

सञ्जय उवाच
द्रौणिर्युधिष्ठिरं दृष्ट्वा शैनेयेनाभिरक्षितम्
द्रौपदेयैस्तथा शूरैरभ्यवर्तत हृष्टवत् १
किरन्निषुगणान्घोरान्स्वर्णपुङ्खाञ्शिलाशितान्
दर्शयन्विविधान्मार्गाञ्शिक्षार्थं लघुहस्तवत् २
ततः खं पूरयामास शरैर्दिव्यास्त्रमन्त्रितैः
युधिष्ठिरं च समरे पर्यवारयदस्त्रवित् ३
द्रौणायनिशरच्छन्नं न प्राज्ञायत किंचन
बाणभूतमभूत्सर्वमायोधनशिरो हि तत् ४
बाणजालं दिविष्ठं तत्स्वर्णजालविभूषितम्
शुशुभे भरतश्रेष्ठ वितानमिव विष्ठितम् ५
तेन छन्ने रणे राजन्बाणजालेन भास्वता
अभ्रच्छायेव संजज्ञे बाणरुद्धे नभस्तले ६
तत्राश्चर्यमपश्याम बाणभूते तथाविधे
न स्म संपतते भूमौ दृष्ट्वा द्रौणेः पराक्रमम् ७
लाघवं द्रोणपुत्रस्य दृष्ट्वा तत्र महारथाः
व्यस्मयन्त महाराज न चैनं प्रतिवीक्षितुम्
शेकुस्ते सर्वराजानस्तपन्तमिव भास्करम् ८
सात्यकिर्यतमानस्तु धर्मराजश्च पाण्डवः
तथेतराणि सैन्यानि न स्म चक्रुः पराक्रमम् ९
वध्यमाने ततः सैन्ये द्रौपदेया महारथाः
सात्यकिर्धर्मराजश्च पाञ्चालाश्चापि संगताः
त्यक्त्वा मृत्युभयं घोरं द्रौणायनिमुपाद्रवन् १०
सात्यकिः पञ्चविंशत्या द्रौणिं विद्ध्वा शिलीमुखैः
पुनर्विव्याध नाराचैः सप्तभिः स्वर्णभूषितैः ११
युधिष्ठिरस्त्रिसप्तत्या प्रतिविन्ध्यश्च सप्तभिः
श्रुतकर्मा त्रिभिर्बाणैः श्रुतकीर्तिस्तु सप्तभिः १२
सुतसोमश्च नवभिः शतानीकश्च सप्तभिः
अन्ये च बहवः शूरा विव्यधुस्तं समन्ततः १३

सोऽतिक्रुद्धस्ततो राजन्नाशीविष इव श्वसन्
सात्यकिं पञ्चविंशत्या प्राविध्यत शिलाशितैः १४
श्रुतकीर्तिं च नवभिः सुतसोमं च पञ्चभिः
अष्टभिः श्रुतकर्माणं प्रतिविन्ध्यं त्रिभिः शरैः
शतानीकं च नवभिर्धर्मपुत्रं च सप्तभिः १५
अथेतरांस्ततः शूरान्द्वाभ्यां द्वाभ्यामताडयत्
श्रुतकीर्तेस्तथा चापं चिच्छेद निशितैः शरैः १६
अथान्यद्धनुरादाय श्रुतकीर्तिर्महारथः
द्रौणायनिं त्रिभिर्विद्ध्वा विव्याधान्यैः शितैः शरैः १७
ततो द्रौणिर्महाराज शरवर्षेण भारत
छादयामास तत्सैन्यं समन्ताच्च शरैर्नृपान् १८
ततः पुनरमेयात्मा धर्मराजस्य कार्मुकम्
द्रौणिश्चिच्छेद विहसन्विव्याध च शरैस्त्रिभिः १९
ततो धर्मसुतो राजन्प्रगृह्यान्यन्महद्धनुः
द्रौणिं विव्याध सप्तत्या बाह्वोरुरसि चार्दयत् २०
सात्यकिस्तु ततः क्रुद्धो द्रौणेः प्रहरतो रणे
अर्धचन्द्रेण तीक्ष्णेन धनुश्छित्त्वानदद्भृशम् २१
छिन्नधन्वा ततो द्रौणिः शक्त्या शक्तिमतां वरः
सारथिं पातयामास शैनेयस्य रथाद्द्रुतम् २२
अथान्यद्धनुरादाय द्रोणपुत्रः प्रतापवान्
शैनेयं शरवर्षेण छादयामास भारत २३
तस्याश्वाः प्रद्रुताः संख्ये पतिते रथसारथौ
तत्र तत्रैव धावन्तः समदृश्यन्त भारत २४
युधिष्ठिरपुरोगास्ते द्रौणिं शस्त्रभृतां वरम्
अभ्यवर्षन्त वेगेन विसृजन्तः शिताञ्शरान् २५
आगच्छमानांस्तान्दृष्ट्वा रौद्ररूपान्परंतपः
प्रहसन्प्रतिजग्राह द्रोणपुत्रो महारणे २६
ततः शरशतज्वालः सेनाकक्षं महारथः
द्रौणिर्ददाह समरे कक्षमग्निर्यथा वने २७
तद्बलं पाण्डुपुत्रस्य द्रोणपुत्रप्रतापितम्

चुक्षुभे भरतश्रेष्ठ तिमिनेव नदीमुखम् २८
दृष्ट्वा ते च महाराज द्रोणपुत्रपराक्रमम्
निहतान्मेनिरे सर्वान्पाण्डून्द्रोणसुतेन वै २९
युधिष्ठिरस्तु त्वरितो द्रौणिं श्लिष्य महारथम्
अब्रवीद्द्रोणपुत्रं तु रोषामर्षसमन्वितः ३०
नैव नाम तव प्रीतिर्नैव नाम कृतज्ञता
यतस्त्वं पुरुषव्याघ्र मामेवाद्य जिघांससि ३१
ब्राह्मणेन तपः कार्यं दानमध्ययनं तथा
क्षत्रियेण धनुर्नाम्यं स भवान्ब्राह्मणब्रुवः ३२
मिषतस्ते महाबाहो जेष्यामि युधि कौरवान्
कुरुष्व समरे कर्म ब्रह्मबन्धुरसि ध्रुवम् ३३
एवमुक्तो महाराज द्रोणपुत्रः स्मयन्निव
युक्तत्वं तच्च संचिन्त्य नोत्तरं किंचिदब्रवीत् ३४
अनुक्त्वा च ततः किंचिच्छरवर्षेण पाण्डवम्
छादयामास समरे क्रुद्धोऽन्तक इव प्रजाः ३५
संछाद्यमानस्तु तदा द्रोणपुत्रेण मारिष
पार्थोऽपयातः शीघ्रं वै विहाय महतीं चमूम् ३६
अपयाते ततस्तस्मिन्धर्मपुत्रे युधिष्ठिरे
द्रोणपुत्रः स्थितो राजन्प्रत्यादेशान्महात्मनः ३७
ततो युधिष्ठिरो राजा त्यक्त्वा द्रौणिं महाहवे
प्रययौ तावकं सैन्यं युक्तः क्रूराय कर्मणे ३८

इति श्रीमहाभारते कर्णपर्वणि एकोनचत्वारिंशोऽध्यायः ३९

चत्वारिंशोऽध्यायः

सञ्जय उवाच
भीमसेनं सपाञ्चाल्यं चेदिकेकयसंवृतम्
वैकर्तनः स्वयं रुद्ध्वा वारयामास सायकैः १
ततस्तु चेदिकारूषान्सृञ्जयांश्च महारथान्
कर्णो जघान संक्रुद्धो भीमसेनस्य पश्यतः २
भीमसेनस्ततः कर्णं विहाय रथसत्तमम्

प्रययौ कौरवं सैन्यं कक्षमग्निरिव ज्वलन् ३
सूतपुत्रोऽपि समरे पाञ्चालान्केकयांस्तथा
सृञ्जयांश्च महेष्वासान्निजघान सहस्रशः ४
संशप्तकेषु पार्थश्च कौरवेषु वृकोदरः
पञ्चालेषु तथा कर्णः क्षयं चक्रुर्महारथाः ५
ते क्षत्रिया दह्यमानास्त्रिभिस्तैः पावकोपमैः
जग्मुर्विनाशं समरे राजन्दुर्मन्त्रिते तव ६
ततो दुर्योधनः क्रुद्धो नकुलं नवभिः शरैः
विव्याध भरतश्रेष्ठ चतुरश्चास्य वाजिनः ७
ततः पुनरमेयात्मा तव पुत्रो जनाधिपः
क्षुरेण सहदेवस्य ध्वजं चिच्छेद काञ्चनम् ८
नकुलस्तु ततः क्रुद्धस्तव पुत्रं त्रिसप्तभिः
जघान समरे राजन्सहदेवश्च पञ्चभिः ९
तावुभौ भरतश्रेष्ठौ श्रेष्ठौ सर्वधनुष्मताम्
विव्याधोरसि संक्रुद्धः पञ्चभिः पञ्चभिः शरैः १०
ततोऽपराभ्यां भल्लाभ्यां धनुषी समकृन्तत
यमयोः प्रहसन्राजन्विव्याधैव च सप्तभिः ११
तावन्ये धनुषी श्रेष्ठे शक्रचापनिभे शुभे
प्रगृह्य रेजतुः शूरौ देवपुत्रसमौ युधि १२
ततस्तौ रभसौ युद्धे भ्रातरौ भ्रातरं नृप
शरैर्ववर्षतुर्घोरैर्महामेघौ यथाचलम् १३
ततः क्रुद्धो महाराज तव पुत्रो महारथः
पाण्डुपुत्रौ महेष्वासौ वारयामास पत्रिभिः १४
धनुर्मण्डलमेवास्य दृश्यते युधि भारत
सायकाश्चैव दृश्यन्ते निश्चरन्तः समन्ततः १५
तस्य सायकसंछन्नौ चकाशेतां च पाण्डवौ
मेघच्छन्नौ यथा व्योम्नि चन्द्रसूर्यौ हतप्रभौ १६
ते तु बाणा महाराज हेमपुङ्खाः शिलाशिताः
आच्छादयन्दिशः सर्वाः सूर्यस्येवांशवस्तदा १७
बाणभूते ततस्तस्मिन्संछन्ने च नभस्तले

यमाभ्यां ददृशे रूपं कालान्तकयमोपमम् १८
पराक्रमं तु तं दृष्ट्वा तव सूनोर्महारथाः
मृत्योरुपान्तिकं प्राप्तौ माद्रीपुत्रौ स्म मेनिरे १९
ततः सेनापती राजन्पाण्डवस्य महात्मनः
पार्षतः प्रययौ तत्र यत्र राजा सुयोधनः २०
माद्रीपुत्रौ ततः शूरौ व्यतिक्रम्य महारथौ
धृष्टद्युम्नस्तव सुतं ताडयामास सायकैः २१
तमविध्यदमेयात्मा तव पुत्रोऽत्यमर्षणः
पाञ्चाल्यं पञ्चविंशत्या प्रहस्य पुरुषर्षभ २२
ततः पुनरमेयात्मा पुत्रस्ते पृथिवीपते
विद्ध्वा ननाद पाञ्चाल्यं षष्ट्या पञ्चभिरेव च २३
अथास्य सशरं चापं हस्तावापं च मारिष
क्षुरप्रेण सुतीक्ष्णेन राजा चिच्छेद संयुगे २४
तदपास्य धनुश्छिन्नं पाञ्चाल्यः शत्रुकर्शनः
अन्यदादत्त वेगेन धनुर्भारसहं नवम् २५
प्रज्वलन्निव वेगेन संरम्भाद्रुधिरेक्षणः
अशोभत महेष्वासो धृष्टद्युम्नः कृतव्रणः २६
स पञ्चदश नाराचाञ्श्वसतः पन्नगानिव
जिघांसुर्भरतश्रेष्ठं धृष्टद्युम्नो व्यवासृजत् २७
ते वर्म हेमविकृतं भित्त्वा राज्ञः शिलाशिताः
विविशुर्वसुधां वेगात्कङ्कबर्हिणवाससः २८
सोऽतिविद्धो महाराज पुत्रस्तेऽतिव्यराजत
वसन्ते पुष्पशबलः सपुष्प इव किंशुकः २९
स छिन्नवर्मा नाराचैः प्रहारैर्जर्जरच्छविः
धृष्टद्युम्नस्य भल्लेन क्रुद्धश्चिच्छेद कार्मुकम् ३०
अथैनं छिन्नधन्वानं त्वरमाणो महीपतिः
सायकैर्दशभी राजन्भ्रुवोर्मध्ये समार्दयत् ३१
तस्य तेऽशोभयन्वक्त्रं कर्मारपरिमार्जिताः
प्रफुल्लं चम्पकं यद्वद्भ्रमरा मधुलिप्सवः ३२
तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महामनाः

अन्यदादत्त वेगेन धनुर्भल्लांश्च षोडश ३३
ततो दुर्योधनस्याश्वान्हत्वा सूतं च पञ्चभिः
धनुश्चिच्छेद भल्लेन जातरूपपरिष्कृतम् ३४
रथं सोपस्करं छत्रं शक्तिं खड्गं गदां ध्वजम्
भल्लैश्चिच्छेद नवभिः पुत्रस्य तव पार्षतः ३५
तपनीयाङ्गदं चित्रं नागं मणिमयं शुभम्
ध्वजं कुरुपतेश्छिन्नं ददृशुः सर्वपार्थिवाः ३६
दुर्योधनं तु विरथं छिन्नसर्वायुधं रणे
भ्रातरः पर्यरक्षन्त सोदर्या भरतर्षभ ३७
तमारोप्य रथे राजन्दण्डधारो जनाधिपम्
अपोवाह च संभ्रान्तो धृष्टद्युम्नस्य पश्यतः ३८
कर्णस्तु सात्यकिं जित्वा राजगृद्धी महाबलः
द्रोणहन्तारमुग्रेषुं ससाराभिमुखं रणे ३९
तं पृष्ठतोऽभ्ययात्तूर्णं शैनेयो वितुदञ्शरैः
वारणं जघनोपान्ते विषाणाभ्यामिव द्विपः ४०
स भारत महानासीद्योधानां सुमहात्मनाम्
कर्णपार्षतयोर्मध्ये त्वदीयानां महारणः ४१
न पाण्डवानां नास्माकं योधः कश्चित्पराङ्मुखः
प्रत्यदृश्यत यत्कर्णः पाञ्चालांस्त्वरितो ययौ ४२
तस्मिन्क्षणे नरश्रेष्ठ गजवाजिनरक्षयः
प्रादुरासीदुभयतो राजन्मध्यंगतेऽहनि ४३
पाञ्चालास्तु महाराज त्वरिता विजिगीषवः
सर्वतोऽभ्यद्रवन्कर्णं पतत्रिण इव द्रुमम् ४४
तेषामाधिरथिः क्रुद्धो यतमानान्मनस्विनः
विचिन्वन्नेव बाणाग्रैः समासादयदग्रतः ४५
व्याघ्रकेतुं सुशर्माणं शङ्कुं चोग्रं धनञ्जयम्
शुक्लं च रोचमानं च सिंहसेनं च दुर्जयम् ४६
ते वीरा रथवेगेन परिवव्रुर्नरोत्तमम्
सृजन्तं सायकान्क्रुद्धं कर्णमाहवशोभिनम् ४७
युध्यमानांस्तु ताञ्शूरान्मनुजेन्द्रः प्रतापवान्

अष्टाभिरष्टौ राधेयो न्यहनन्निशितैः शरैः ४८
अथापरान्महाराज सूतपुत्रः प्रतापवान्
जघान बहुसाहस्रान्योधान्युद्धविशारदः ४९
विष्णुं च विष्णुकर्माणं देवापिं भद्रमेव च
दण्डं च समरे राजंश्चित्रं चित्रायुधं हरिम् ५०
सिंहकेतुं रोचमानं शलभं च महारथम्
निजघान सुसंक्रुद्धश्चेदीनां च महारथान् ५१
तेषामाददतः प्राणानासीदाधिरथेर्वपुः
शोणिताभ्युक्षिताङ्गस्य रुद्रस्येवोर्जितं महत् ५२
तत्र भारत कर्णेन मातङ्गास्ताडिताः शरैः
सर्वतोऽभ्यद्रवन्भीताः कुर्वन्तो महदाकुलम् ५३
निपेतुरुर्व्यां समरे कर्णसायकपीडिताः
कुर्वन्तो विविधान्नादान्वज्रनुन्ना इवाचलाः ५४
गजवाजिमनुष्यैश्च निपतद्भिः समन्ततः
रथैश्चावगतैर्मार्गे पर्यस्तीर्यत मेदिनी ५५
नैव भीष्मो न च द्रोणो नाप्यन्ये युधि तावकाः
चक्रुः स्म तादृशं कर्म यादृशं वै कृतं रणे ५६
सूतपुत्रेण नागेषु रथेषु च हयेषु च
नरेषु च नरव्याघ्र कृतं स्म कदनं महत् ५७
मृगमध्ये यथा सिंहो दृश्यते निर्भयश्चरन्
पञ्चालानां तथा मध्ये कर्णोऽचरदभीतवत् ५८
यथा मृगगणांस्त्रस्तान्सिंहो द्रावयते दिशः
पाञ्चालानां रथव्रातान्कर्णो द्रावयते तथा ५९
सिंहास्यं च यथा प्राप्य न जीवन्ति मृगाः क्वचित्
तथा कर्णमनुप्राप्य न जीवन्ति महारथाः ६०
वैश्वानरं यथा दीप्तं दह्यन्त प्राप्य वै जनाः
कर्णाग्निना रणे तद्वद्दग्धा भारत सृञ्जयाः ६१
कर्णेन चेदिष्वेकेन पाञ्चालेषु च भारत
विश्राव्य नाम निहता बहवः शूरसंमताः ६२
मम चासीन्मनुष्येन्द्र दृष्ट्वा कर्णस्य विक्रमम्

नैकोऽप्याधिरथेर्जीवन्पाञ्चाल्यो मोद्यते युधि ६३
पाञ्चालान्विधमन्संख्ये सूतपुत्रः प्रतापवान्
अभ्यधावत संक्रुद्धो धर्मपुत्रं युधिष्ठिरम् ६४
धृष्टद्युम्नश्च राजानं द्रौपदेयाश्च मारिष
परिवव्रुरमित्रघ्नं शतशश्चापरे जनाः ६५
शिखण्डी सहदेवश्च नकुलो नाकुलिस्तथा
जनमेजयः शिनेर्नप्ता बहवश्च प्रभद्रकाः ६६
एते पुरोगमा भूत्वा धृष्टद्युम्नश्च संयुगे
कर्णमस्यन्तमिष्वस्त्रैर्विचेरुरमितौजसः ६७
तांस्तत्राधिरथिः संख्ये चेदिपाञ्चालपाण्डवान्
एको बहूनभ्यपतद्गरुत्मन्पान्नगानिव ६८
भीमसेनस्तु संक्रुद्धः कुरून्मद्रान्सकेकयान्
एकः संख्ये महेष्वासो योधयन्बह्वशोभत ६९
तत्र मर्मसु भीमेन नाराचैस्ताडिता गजाः
प्रपतन्तो हतारोहाः कम्पयन्ति स्म मेदिनीम् ७०
वाजिनश्च हतारोहाः पत्तयश्च गतासवः
शेरते युधि निर्भिन्ना वमन्तो रुधिरं बहु ७१
सहस्रशश्च रथिनः पतिताः पतितायुधाः
अक्षताः समदृश्यन्त भीमाद्भीता गतासवः ७२
रथिभिर्वाजिभिः सूतैःपत्तिभिश्च तथा गजैः
भीमसेनशरच्छिन्नैरास्तीर्णा वसुधाभवत् ७३
तत्स्तम्भितमिवातिष्ठद्भीमसेनबलार्दितम्
दुर्योधनबलं राजन्निरुत्साहं कृतव्रणम् ७४
निश्चेष्टं तुमुले दीनं बभौ तस्मिन्महारणे
प्रसन्नसलिलः काले यथा स्यात्सागरो नृप ७५
मन्युवीर्यबलोपेतं बलात्पर्यवरोपितम्
अभवत्तव पुत्रस्य तत्सैन्यमिषुभिस्तदा
रुधिरौघपरिक्लिन्नं रुधिरार्द्रं बभूव ह ७६
सूतपुत्रो रणे क्रुद्धः पाण्डवानामनीकिनीम्
भीमसेनः कुरूंश्चापि द्रावयन्बह्वशोभत ७७

वर्तमाने तथा रौद्रे संग्रामेऽद्भुतदर्शने
निहत्य पृतनामध्ये संशप्तकगणान्बहून् ७८
अर्जुनो जयतां श्रेष्ठो वासुदेवमथाब्रवीत्
प्रभग्नं बलमेतद्धि योत्स्यमानं जनार्दन ७९
एते धावन्ति सगणाः संशप्तकमहारथाः
अपारयन्तो मद्बाणान्सिंहशब्दान्मृगा इव ८०
दीर्यते च महत्सैन्यं सृञ्जयानां महारणे
हस्तिकक्ष्यो ह्यसौ कृष्ण केतुः कर्णस्य धीमतः
दृश्यते राजसैन्यस्य मध्ये विचरतो मुहुः ८१
न च कर्णं रणे शक्ता जेतुमन्ये महारथाः
जानीते हि भवान्कर्णं वीर्यवन्तं पराक्रमे ८२
तत्र याहि यतः कर्णो द्रावयत्येष नो बलम् ८३
वर्जयित्वा रणे याहि सूतपुत्रं महारथम्
श्रमो मा बाधते कृष्ण यथा वा तव रोचते ८४
एतच्छ्रुत्वा महाराज गोविन्दः प्रहसन्निव
अब्रवीदर्जुनं तूर्णं कौरवाञ्जहि पाण्डव ८५
ततस्तव महत्सैन्यं गोविन्दप्रेरिता हयाः
हंसवर्णाः प्रविविशुर्वहन्तः कृष्णपाण्डवौ ८६
केशवप्रहितैरश्वैः श्वेतैः काञ्चनभूषणैः
प्रविशद्भिस्तव बलं चतुर्दिशमभिद्यत ८७
तौ विदार्य महासेनां प्रविष्टौ केशवार्जुनौ
क्रुद्धौ संरम्भरक्ताक्षौ व्यभ्राजेतां महाद्युती ८८
युद्धशौण्डौ समाहूतावरिभिस्तौ रणाध्वरम्
यज्वभिर्विधिनाहूतौ मखे देवाविवाश्विनौ ८९
क्रुद्धौ तौ तु नरव्याघ्रौ वेगवन्तौ बभूवतुः
तलशब्देन रुषितौ यथा नागौ महाहवे ९०
विगाहन्स रथानीकमश्वसंघांश्च फल्गुनः
व्यचरत्पृतनामध्ये पाशहस्त इवान्तकः ९१
तं दृष्ट्वा युधि विक्रान्तं सेनायां तव भारत
संशप्तकगणान्भूयः पुत्रस्ते समचोदयत् ९२

ततो रथसहस्रेण द्विरदानां त्रिभिः शतैः
चतुर्दशसहस्रैश्च तुरगाणां महाहवे ९३
द्वाभ्यां शतसहस्राभ्यां पदातीनां च धन्विनाम्
शूराणां नामलब्धानां विदितानां समन्ततः
अभ्यवर्तन्त तौ वीरौ छादयन्तो महारथाः ९४
स छाद्यमानः समरे शरैः परबलार्दनः
दर्शयन्रौद्रमात्मानं पाशहस्त इवान्तकः
निघ्नन्संशप्तकान्पार्थः प्रेक्षणीयतरोऽभवत् ९५
ततो विद्युत्प्रभैर्बाणैः कार्तस्वरविभूषितैः
निरन्तरमिवाकाशमासीन्नुन्नैः किरीटिना ९६
किरीटिभुजनिर्मुक्तैः संपतद्भिर्महाशरैः
समाच्छन्नं बभौ सर्वं काद्रवेयैरिव प्रभो ९७
रुक्मपुङ्खान्प्रसन्नाग्राञ्शरान्संनतपर्वणः
अदर्शयदमेयात्मा दिक्षु सर्वासु पाण्डवः ९८
हत्वा दश सहस्राणि पार्थिवानां महारथः
संशप्तकानां कौन्तेयः प्रपक्षं त्वरितोऽभ्ययात् ९९
प्रपक्षं स समासाद्य पार्थः काम्बोजरक्षितम्
प्रममाथ बलाद्बाणैर्दानवानिव वासवः १००
प्रचिच्छेदाशु भल्लैश्च द्विषतामाततायिनाम्
शस्त्रपाणींस्तथा बाहूंस्तथापि च शिरांस्युत १०१
अङ्गाङ्गावयवैश्छिन्नैर्व्यायुधास्तेऽपतन्क्षितौ
विष्वग्वाताभिसंभग्ना बहुशाखा इव द्रुमाः १०२
हस्त्यश्वरथपत्तीनां व्रातान्निघ्नन्तमर्जुनम्
सुदक्षिणादवरजः शरवृष्ट्याभ्यवीवृषत् १०३
अस्यास्यतोऽधचन्द्राभ्यां स बाहू परिघोपमौ
पूर्णचन्द्राभवक्त्रं च क्षुरेणाभ्यहनच्छिरः १०४
स पपात ततो वाहात्स्वलोहितपरिस्रवः
मनः शिलागिरेः शृङ्गं वज्रेणेवावदारितम् १०५
सुदक्षिणादवरजं काम्बोजं ददृशुर्हतम्
प्रांशुं कमलपत्राक्षमत्यर्थं प्रियदर्शनम्

काञ्चनस्तम्भसंकाशं भिन्नं हेमगिरिं यथा १०६
ततोऽभवत्पुनर्युद्धं घोरमद्भुतदर्शनम्
नानावस्थाश्च योधानां बभूवुस्तत्र युध्यताम् १०७
एतेष्वावर्जितैरश्वैः काम्बोजैर्यवनैः शकैः
शोणिताक्तैस्तदा रक्तं सर्वमासीद्विशां पते १०८
रथै रथाश्वसूतैश्च हतारोहैश्च वाजिभिः
द्विरदैश्च हतारोहैर्महामात्रैर्हतद्विपैः
अन्योन्येन महाराज कृतो घोरो जनक्षयः १०९
तस्मिन्प्रपक्षे पक्षे च वध्यमाने महात्मना
अर्जुनं जयतां श्रेष्ठं त्वरितो द्रौणिराययौ ११०
विधुन्वानो महच्चापं कार्तस्वरविभूषितम्
आददानः शरान्घोरान्स्वरश्मीनिव भास्करः १११
तैः पतद्भिर्महाराज द्रौणिमुक्तैः समन्ततः
संछादितौ रथस्थौ तावुभौ कृष्णधनञ्जयौ ११२
ततः शरशतैस्तीक्ष्णैर्भारद्वाजः प्रतापवान्
निश्चेष्टौ तावुभौ चक्रे युद्धे माधवपाण्डवौ ११३
हाहाकृतमभूत्सर्वं जङ्गमं स्थावरं तथा
चराचरस्य गोप्तारौ दृष्ट्वा संछादितौ शरैः ११४
सिद्धचारणसंघाश्च संपेतुर्वै समन्ततः
चिन्तयन्तो भवेदद्य लोकानां स्वस्त्यपीत्यह ११५
न मया तादृशो राजन्दृष्टपूर्वः पराक्रमः
संजज्ञे यादृशो द्रौणेः कृष्णौ संछादयिष्यतः ११६
द्रौणेस्तु धनुषः शब्दमहितत्रासनं रणे
अश्रौषं बहुशो राजन्सिंहस्य नदतो यथा ११७
ज्या चास्य चरतो युद्धे सव्यदक्षिणमस्यतः
विद्युदम्बुदमध्यस्था भ्राजमानेव साभवत् ११८
स तथा क्षिप्रकारी च दृढहस्तश्च पाण्डवः
संमोहं परमं गत्वा प्रैक्षत द्रोणजं ततः ११९
स विक्रमं हृतं मेने आत्मनः सुमहात्मना
तथास्य समरे राजन्वपुरासीत्सुदुर्दृशम् १२०

द्रौणिपाण्डवयोरेवं वर्तमाने महारणे
वर्धमाने च राजेन्द्र द्रोणपुत्रे महाबले
हीयमाने च कौन्तेये कृष्णं रोषः समभ्ययात् १२१
स रोषान्निःश्वसन्राजन्निर्दहन्निव चक्षुषा
द्रौणिं ह्यपश्यत्संग्रामे फल्गुनं च मुहुर्मुहुः १२२
ततः क्रुद्धोऽब्रवीत्कृष्णः पार्थं सप्रणयं तदा
अत्यद्भुतमिदं पार्थ तव पश्यामि संयुगे
अतिशेते हि यत्र त्वा द्रोणपुत्रोऽद्य भारत १२३
कच्चित्ते गाण्डिवं हस्ते रथे तिष्ठसि चार्जुन
कच्चित्कुशलिनौ बाहू कच्चिद्वीर्यं तदेव ते १२४
एवमुक्तस्तु कृष्णेन क्षिप्त्वा भल्लांश्चतुर्दश
त्वरमाणस्त्वराकाले द्रौणेर्धनुरथाच्छिनत्
ध्वजं छत्रं पताकां च रथं शक्तिं गदां तथा १२५
जत्रुदेशे च सुभृशं वत्सदन्तैरताडयत्
स मूर्च्छां परमां गत्वा ध्वजयष्टिं समाश्रितः १२६
तं विसंज्ञं महाराज किरीटिभयपीडितम्
अपोवाह रणात्सूतो रक्षमाणो धनंजयात् १२७
एतस्मिन्नेव काले तु विजयः शत्रुतापनः
न्यवधीत्तावकं सैन्यं शतशोऽथ सहस्रशः
पश्यतस्तव पुत्रस्य तस्य वीरस्य भारत १२८
एवमेष क्षयो वृत्तस्तावकानां परैः सह
क्रूरो विशसनो घोरो राजन्दुर्मन्त्रिते तव १२९
संशप्तकांश्च कौन्तेयः कुरूंश्चापि वृकोदरः
वसुषेणं च पाञ्चालः कृत्स्नेन व्यधमद्रणे १३०
इति श्रीमहाभारते कर्णपर्वणि चत्वारिंशत्तमोऽध्यायः ४०

एक चत्वारिंशत्तमोऽध्यायः

सञ्जय उवाच
त्वरमाणः पुनः कृष्णः पार्थमभ्यवदच्छनैः
पश्य कौरव्य राजानमपयातांश्च पाण्डवान् १

कर्ण पश्य महारङ्गे ज्वलन्तमिव पावकम्
असौ भीमो महेष्वासः संनिवृत्तो रणं प्रति २
तमेतेऽनु निवर्तन्ते धृष्टद्युम्नपुरोगमाः
पाञ्चालानां सृञ्जयानां पाण्डवानां च यन्मुखम्
निवृत्तैश्च तथा पार्थैर्भग्नं शत्रुबलं महत् ३
कौरवान्द्रवतो ह्येष कर्णो धारयतेऽजुन
अन्तकप्रतिमो वेगे शक्रतुल्यपराक्रमः ४
असौ गच्छति कौरव्य द्रौणिरस्त्रभृतां वरः
तमेष प्रद्रुतः संख्ये धृष्टद्युम्नो महारथः ५
सर्वं व्याचष्ट दुर्धर्षो वासुदेवः किरीटिने
ततो राजन्प्रादुरासीन्महाघोरो महारणः ६
सिंहनादरवाश्चात्र प्रादुरासन्समागमे
उभयोः सेनयो राजन्मृत्युं कृत्वा निवर्तनम् ७

इति श्रीमहाभारते कर्णपर्वणि एकचत्वारिंशोऽध्यायः ४१

द्विचत्वारिंशोऽध्यायः

सञ्जय उवाच
ततः पुनः समाजग्मुरभीताः कुरुसृञ्जयाः
युधिष्ठिरमुखाः पार्था वैकर्तनमुखा वयम् १
ततः प्रववृते भीमः संग्रामो लोमहर्षणः
कर्णस्य पाण्डवानां च यमराष्ट्रविवर्धनः २
तस्मिन्प्रवृत्ते संग्रामे तुमुले शोणितोदके
संशप्तकेषु शूरेषु किंचिच्छिष्टेषु भारत ३
धृष्टद्युम्नो महाराज सहितः सर्वराजभिः
कर्णमेवाभिदुद्राव पाण्डवाश्च महारथाः ४
आगच्छमानांस्तान्संख्ये प्रहृष्टान्विजयैषिणः
दधारैको रणे कर्णो जलौघानिव पर्वतः ५
तमासाद्य तु ते कर्णं व्यशीर्यन्त महारथाः
यथाचलं समासाद्य जलौघाः सर्वतोदिशम्
तयोरासीन्महाराज संग्रामो लोमहर्षणः ६

धृष्टद्युम्नस्तु राधेयं शरेण नतपर्वणा
ताडयामास संक्रुद्धस्तिष्ठ तिष्ठेति चाब्रवीत् ७
विजयं तु धनुःश्रेष्ठं विधुन्वानो महारथः
पार्षतस्य धनुश्छित्त्वा शरानाशीविषोपमान्
ताडयामास संक्रुद्धः पार्षतं नवभिः शरैः ८
ते वर्म हेमविकृतं भित्त्वा तस्य महात्मनः
शोणिताक्ता व्यराजन्त शक्रगोपा इवानघ ९
तदपास्य धनुश्छिन्नं धृष्टद्युम्नो महारथः
अन्यद्धनुरुपादाय शरांश्चाशीविषोपमान्
कर्णं विव्याध सप्तत्या शरैः संनतपर्वभिः १०
तथैव राजन्कर्णोऽपि पार्षतं शत्रुतापनम्
द्रोणशत्रुं महेष्वासो विव्याध निशितैः शरैः ११
तस्य कर्णो महाराज शरं कनकभूषणम्
प्रेषयामास संक्रुद्धो मृत्युदण्डमिवापरम् १२
तमापतन्तं सहसा घोररूपं विशां पते
चिच्छेद सप्तधा राजञ्शैनेयः कृतहस्तवत् १३
दृष्ट्वा विनिहितं बाणं शरैः कर्णो विशां पते
सात्यकिं शरवर्षेण समन्तात्पर्यवारयत् १४
विव्याध चैनं समरे नाराचैस्तत्र सप्तभिः
तं प्रत्यविध्यच्छैनेयः शरैर्हेमविभूषितैः १५
ततो युद्धमतीवासीच्चक्षुः श्रोत्रभयावहम्
राजन्घोरं च चित्रं च प्रेक्षणीयं समन्ततः १६
सर्वेषां तत्र भूतानां लोमहर्षो व्यजायत
तद्दृष्ट्वा समरे कर्म कर्णशैनेययोर्नृप १७
एतस्मिन्नन्तरे द्रौणिरभ्ययात्सुमहाबलम्
पार्षतं शत्रुदमनं शत्रुवीर्यासुनाशनम् १८
अभ्यभाषत संक्रुद्धो द्रौणिर्दूरे धनंजये
तिष्ठ तिष्ठाद्य ब्रह्मघ्न न मे जीवन्विमोक्ष्यसे १९
इत्युक्त्वा सुभृशं वीरः शीघ्रकृन्निशितैः शरैः
पार्षतं छादयामास घोररूपैः सुतेजनैः

यतमानं परं शक्त्या यतमानो महारथः २०
यथा हि समरे द्रौणिः पार्षतं वीक्ष्य मारिष
तथा द्रौणिं रणे दृष्ट्वा पार्षतः परवीरहा
नातिहृष्टमना भूत्वा मन्यते मृत्युमात्मनः २१
द्रौणिस्तु दृष्ट्वा राजेन्द्र धृष्टद्युम्नं रणे स्थितम्
क्रोधेन निःश्वसन्वीरः पार्षतं समुपाद्रवत्
तावन्योन्यं तु दृष्ट्वैव संरम्भं जग्मतुः परम् २२
अथाब्रवीन्महाराज द्रोणपुत्रः प्रतापवान्
धृष्टद्युम्नं समीपस्थं त्वरमाणो विशां पते
पाञ्चालापसदाद्य त्वां प्रेषयिष्यामि मृत्यवे २३
पापं हि यत्त्वया कर्म घ्नता द्रोणं पुरा कृतम्
अद्य त्वा पत्स्यते तद्वै यथा ह्यकुशलं तथा २४
अरक्ष्यमाणः पार्थेन यदि तिष्ठसि संयुगे
नापक्रमसि वा मूढ सत्यमेतद्ब्रवीमि ते २५
एवमुक्तः प्रत्युवाच धृष्टद्युम्नः प्रतापवान्
प्रतिवाक्यं स एवासिर्मामको दास्यते तव
येनैव ते पितुर्दत्तं यतमानस्य संयुगे २६
यदि तावन्मया द्रोणो निहतो ब्राह्मणब्रुवः
त्वामिदानीं कथं युद्धे न हनिष्यामि विक्रमात् २७
एवमुक्त्वा महाराज सेनापतिरमर्षणः
निशितेनाथ बाणेन द्रौणिं विव्याध पार्षतः २८
ततो द्रौणिः सुसंक्रुद्धः सरैः संनतपर्वभिः
प्राच्छादयद्दिशो राजन्धृष्टद्युम्नस्य संयुगे २९
नैवान्तरिक्षं न दिशो नैव योधाः समन्ततः
दृश्यन्ते वै महाराज शरैश्छन्नाः सहस्रशः ३०
तथैव पार्षतो राजन्द्रौणिमाहवशोभिनम्
शरैः संछादयामास सूतपुत्रस्य पश्यतः ३१
राधेयोऽपि महाराज पाञ्चालान्सह पाण्डवैः
द्रौपदेयान्युधामन्युं सात्यकिं च महारथम्
एकः स वारयामास प्रेक्षणीयः समन्ततः ३२

धृष्टद्युम्नोऽपि समरे द्रौणेश्चिच्छेद कार्मुकम्
तदपास्य धनुश्छिन्नमन्यदादत्त कार्मुकम्
वेगवत्समरे घोरे शरांश्चाशीविषोपमान् ३३
स पार्षतस्य राजेन्द्र धनुः शक्तिं गदां ध्वजम्
हयान्सूतं रथं चैव निमेषाद्व्यधमच्छरैः ३४
स छिन्नधन्वा विरथो हताश्वो हतसारथिः
खड्गमादत्त विपुलं शतचन्द्रं च भानुमत् ३५
द्रौणिस्तदपि राजेन्द्रभल्लैः क्षिप्रं महारथः
चिच्छेद समरेवीरः क्षिप्रहस्तो दृढायुधः
रथादनवरूढस्य तदद्भुतमिवाभवत् ३६
धृष्टद्युम्नं हि विरथं हताश्वं छिन्नकार्मुकम्
शरैश्च बहुधा विद्धमस्त्रैश्च शकलीकृतम्
नातरद्भरतश्रेष्ठ यतमानो महारथः ३७
तस्यान्तमिषुभी राजन्यदा द्रौणिर्न जग्मिवान्
अथ त्यक्त्वा धनुर्वीरः पार्षतं त्वरितोऽन्वगात् ३८
आसीदाद्रवतो राजन्वेगस्तस्य महात्मनः
गरुडस्येव पततो जिघृक्षोः पन्नगोत्तमम् ३९
एतस्मिन्नेव काले तु माधवोऽजुनमब्रवीत्
पश्य पार्थ यथा द्रौणिः पार्षतस्य वधं प्रति
यत्नं करोति विपुलं हन्याच्चैनमसंशयम् ४०
तं मोचय महाबाहो पार्षतं शत्रुतापनम्
द्रौणेरास्यमनुप्राप्तं मृत्योरास्यगतं यथा ४१
एवमुक्त्वा महाराज वासुदेवः प्रतापवान्
प्रैषयत्तत्र तुरगान्यत्र द्रौणिर्व्यवस्थितः ४२
ते हयाश्चंद्रसंकाशाः केशवेन प्रचोदिताः
पिबन्त इव तद्व्योम जग्मुर्द्रौणिरथं प्रति ४३
दृष्ट्वायान्तौ महावीर्यावुभौ कृष्णधनञ्जयौ
धृष्टद्युम्नवधे राजंश्चक्रे यत्नं महाबलः ४४
विकृष्यमाणं दृष्ट्वैव धृष्टद्युम्नं जनेश्वर
शरांश्चिक्षेप वै पार्थो द्रौणिं प्रति महाबलः ४५

ते शरा हेमविकृता गाराडीवप्रेषिता भृशम्
द्रौणिमासाद्य विविशुर्वल्मीकमिव पन्नगाः ४६
स विद्धस्तैः शरैर्घोरैर्द्रोणपुत्रः प्रतापवान्
रथमारुरुहे वीरो धनंजय शरार्दितः
प्रगृह्य च धनुः श्रेष्ठं पार्थं विव्याध सायकैः ४७
एतस्मिन्नन्तरे वीरः सहदेवो जनाधिप
अपोवाह रथेनाजौ पार्षतं शत्रुतापनम् ४८
अर्जुनोऽपि महाराज द्रौणिं विव्याध पत्रिभिः
तं द्रोणपुत्रः संक्रुद्धो बाह्वोरुरसि चार्दयत् ४९
क्रोधितस्तु रणे पार्थो नाराचं कालसंमितम्
द्रोणपुत्राय चिक्षेप कालदराडमिवापरम्
स ब्राह्मणस्यांसदेशे निपपात महाद्युतिः ५०
स विह्वलो महाराज शरवेगेन संयुगे
निषसाद रथोपस्थे वैक्लव्यं च परं ययौ ५१
ततः कर्णो महाराज व्याक्षिपद्विजयं धनुः
अर्जुनं समरे क्रुद्धः प्रेक्षमाणो मुहुर्मुहुः
द्वैरथं चापि पार्थेन कामयानो महारणे ५२
तं तु हित्वा हतं वीरं सारथिः शत्रुकर्शनम्
अपोवाह रथेनाजौ त्वरमाणो रणाजिरात् ५३
अथोत्कृष्टं महाराज पाञ्चालैर्जितकाशिभिः
मोक्षितं पार्षतं दृष्ट्वा द्रोणपुत्रं च पीडितम् ५४
वादित्राणि च दिव्यानि प्रावाद्यन्त सहस्रशः
सिंहनादश्च संजज्ञे दृष्ट्वा घोरं महाद्भुतम् ५५
एवं कृत्वाब्रवीत्पार्थो वासुदेवं धनंजयः
याहि संशप्तकान्कृष्ण कार्यमेतत्परं मम ५६
ततः प्रयातो दाशार्हः श्रुत्वा पाराडवभाषितम्
रथेनातिपताकेन मनोमारुतरंहसा ५७

इति श्रीमहाभारते कर्णपर्वणि द्विचत्वारिंशोऽध्यायः ४२

त्रिचत्वारिंशोऽध्यायः

सञ्जय उवाच
एतस्मिन्नन्तरे कृष्णः पार्थं वचनमब्रवीत्
दर्शयन्निव कौन्तेयं धर्मराजं युधिष्ठिरम् १
एष पाण्डव ते भ्राता धार्तराष्ट्रैर्महाबलैः
जिघांसुभिर्महेष्वासैर्द्रुतं पार्थाऽनुसर्यते २
तथानुयान्ति संरब्धाः पञ्चाला युद्धदुर्मदाः
युधिष्ठिरं महात्मानं परीप्सन्तो महाजवाः ३
एष दुर्योधनः पार्थ रथानीकेन दंशितः
राजा सर्वस्य लोकस्य राजानमनुधावति ४
जिघांशुः पुरुषव्याघ्रं भ्रातृभिः सहितो बली
आशीविषसमस्पर्शैः सर्वयुद्धविशारदैः ५
एते जिघृक्षवो यान्ति द्विपाश्वरथपत्तयः
युधिष्ठिरं धार्तराष्ट्रा रत्नोत्तममिवार्थिनः ६
पश्य सात्वतभीमाभ्यां निरुद्धाधिष्ठितः प्रभुः
जिहीर्षवोऽमृतं दैत्याः शक्राग्निभ्यामिवावशाः ७
एते बहुत्वात्त्वरिताः पुनर्गच्छन्ति पाण्डवम्
समुद्रमिव वार्योघाः प्रावृट्काले महारथाः ८
नदन्तः सिंहनादांश्च धमन्तश्चापि वारिजान्
बलवन्तो महेष्वासा विधुन्वन्तो धनूंषि च ९
मृत्योर्मुखगतं मन्ये कुन्तीपुत्रं युधिष्ठिरम्
हुतमग्नौ च भद्रं ते दुर्योधनवशं गतम् १०
यथायुक्तमनीकं हि धार्तराष्ट्रस्य पाण्डव
नास्य शक्रोऽपि मुच्येत संप्राप्तो बाणगोचरम् ११
दुर्योधनस्य शूरस्य द्रौणेः शारद्वतस्य च
कर्णस्य चेषुवेगो वै पर्वतानपि दारयेत् १२
दुर्योधनस्य शूरस्य शरौघाञ्शीघ्रमस्यतः
संक्रुद्धस्यान्तकस्येव को वेगं संसहेद्रणे १३
कर्णेन च कृतो राजा विमुखः शत्रुतापनः
बलवाँल्लघुहस्तश्च कृती युद्धविशारदः १४

राधेयः पाण्डवश्रेष्ठं शक्तः पीडयितुं रणे
सहितो धृतराष्ट्रस्य पुत्रैः शूरो महात्मभिः १५
तस्यैवं युध्यमानस्य स्त्रंगामे संयतात्मनः
अन्यैरपि च पार्थस्य हृतं वर्म महारथैः १६
उपवासकृशो राजा भृशं भरतसत्तम
ब्राह्मे बले स्थितो ह्येष न क्षत्रेऽतिबले विभो १७
न जीवति महाराजो मन्ये पार्थ युधिष्ठिरः
यद्भीमसेनः सहते सिंहनादममर्षणः १८
नर्दतां धार्तराष्ट्राणां पुनः पुनररिंदम
धमतां च महाशङ्खान्संग्रामे जितकाशिनाम् १९
युधिष्ठिरं पाण्डवेयं हतेति भरतर्षभ
संचोदयत्यसौ कर्णो धार्तराष्ट्रान्महाबलान् २०
स्थूणाकर्णेन्द्रजालेन पार्थ पाशुपतेन च
प्रच्छादयन्तो राजानमनुयान्ति महारथाः
आतुरो मे मतो राजा संनिषेव्यश्च भारत २१
यथैनमनुवर्तन्ते पाञ्चालाः सह पाण्डवैः
त्वरमाणास्त्वराकाले सर्वशस्त्रभृतां वराः
मज्जन्तमिव पाताले बलिनोऽप्युज्जिहीर्षवः २२
न केतुर्दृश्यते राज्ञः कर्णेन निहतः शरैः
पश्यतोर्यमयोः पार्थ सात्यकेश्च शिखण्डिनः २३
धृष्टद्युम्नुस्य भीमस्य शतानीकस्य वा विभो
पाञ्चालानां च सर्वेषां चेदीनां चैव भारत २४
एष कर्णो रणे पार्थ पाण्डवानामनीकिनीम्
शरैर्विध्वंसयति वै नलिनीमिव कुञ्जरः २५
एते द्रवन्ति रथिनस्त्वदीयाः पाण्डुनन्दन
पश्य पश्य यथा पार्थ गच्छन्त्येते महारथाः २६
एते भारत मातङ्गाः कर्णेनाभिहता रणे
आर्तनादान्विकुर्वाणा विद्रवन्ति दिशो दश २७
रथानां द्रवतां वृन्दं पश्य पार्थ समन्ततः
द्राव्यमाणं रणे चैव कर्णेनामित्रकर्शिना २८

हस्तिकद्त्यां रणे पश्य चरन्तीं तत्र तत्र ह
रथस्थं सूतपुत्रस्य केतुं केतुमतां वर २९
असौ धावति राधेयो भीमसेनरथं प्रति
किरञ्शरशतानीव विनिघ्नंस्तव वाहिनीम् ३०
एतान्पश्य च पाञ्चालान्द्राव्यमाणान्महात्मना
शक्रेणेव यथा दैत्यान्हन्यमानान्महाहवे ३१
एष कर्णो रणे जित्वा पाञ्चालान्पाण्डुसृञ्जयान्
दिशो विप्रेक्षते सर्वास्त्वदर्थमिति मे मतिः ३२
पश्य पार्थ धनुः श्रेष्ठं विकर्षन्साधु शोभते
शत्रूञ्जित्वा यथा शक्रो देवसंघैः समावृतः ३३
एते नदन्ति कौरव्या दृष्ट्वा कर्णस्य विक्रमम्
त्रासयन्तो रणे पार्थान्सृञ्जयांश्च सहस्रशः ३४
एष सर्वात्मना पाण्डूंस्त्रासयित्वा महारणे
अभिभाषति राधेयः सर्वसैन्यानि मानदः ३५
अभिद्रवत गच्छध्वं द्रुतं द्रवत कौरवाः
यथा जीवन्न वः कश्चिन्मुच्यते युधि सृञ्जयः ३६
तथा कुरुत संयत्ता वयं यास्याम पृष्ठतः
एवमुक्त्वा ययावेष पृष्ठतो विकिरञ्शरैः ३७
पश्य कर्णं रणे पार्थ श्वेतश्छविविराजितम्
उदयं पर्वतं यद्वच्छोभयन्वै दिवाकरः ३८
पूर्णचन्द्रनिकाशेन मूर्ध्नि छत्रेण भारत
ध्रियमाणेन समरे तथा शतशलाकिना ३९
एष त्वां प्रेक्षते कर्णः सकटाक्षो विशां पते
उत्तमं यत्नमास्थाय ध्रुवमेष्यति संयुगे ४०
पश्य ह्येनं महाबाहो विधुन्वानं महद्धनुः
शरांश्चाशीविषाकारान्विसृजन्तं महाबलम् ४१
असौ निवृत्तो राधेयो दृश्यते वानरध्वज
वधाय चात्मनोऽभ्येति दीपस्य शलभो यथा ४२
कर्णमेकाकिनं दृष्ट्वा रथानीकेन भारत
रिरक्षिषुः सुसंयत्तो धार्तराष्ट्रोऽभिवर्तते ४३

सर्वैः सहैभिर्दुष्टात्मा वध्य एष प्रयत्नतः
त्वया यशश्च राज्यं च सुखं चोत्तममिच्छता ४४
आत्मानं च कृतात्मानं समीक्ष्य भरतर्षभ
कृतागसं च राधेयं धर्मात्मनि युधिष्ठिरे ४५
प्रतिपद्यस्व राधेयं प्राप्तकालमनन्तरम्
आर्यां युद्धे मतिं कृत्वा प्रत्येहि रथयूथपम् ४६
पञ्च ह्येतानि मुख्यानां रथानां रथसत्तम
शतान्यायान्ति वेगेन बलिनां भीमतेजसाम् ४७
पञ्च नागसहस्राणि द्विगुणा वाजिनस्तथा
अभिसंहत्य कौन्तेय पदातिप्रयुतानि च
अन्योन्यरक्षितं वीर बलं त्वामभिवर्तते ४८
सूतपुत्रे महेष्वासे दर्शयात्मानमात्मना
उत्तमं यत्नमास्थाय प्रत्येहि भरतर्षभ ४९
असौ कर्णः सुसंरब्धः पाञ्चालानभिधावति
केतुमस्य हि पश्यामि धृष्टद्युम्नरथं प्रति
समुच्छेत्स्यति पाञ्चालानिति मन्ये परंतप ५०
आचक्षे ते प्रियं पार्थ तदेवं भरतर्षभ
राजा जीवति कौरव्यो धर्मपुत्रो युधिष्ठिरः ५१
असौ भीमो महाबाहुः संनिवृत्तश्चमूमुखे
वृतः सृञ्जयसैन्येन सात्यकेन च भारत ५२
वध्यन्त एते समरे कौरवा निशितैः शरैः
भीमसेनेन कौन्तेय पाञ्चालैश्च महात्मभिः ५३
सेना हि धार्तराष्ट्रस्य विमुखा चाभवद्रणात्
विप्रधावति वेगेन भीमस्य निहता शरैः ५४
विपन्नसस्येव मही रुधिरेण समुक्षिता
भारती भरतश्रेष्ठ सेना कृपणदर्शना ५५
निवृत्तं पश्य कौन्तेय भीमसेनं युधां पतिम्
आशीविषमिव क्रुद्धं तस्माद्द्रवति वाहिनी ५६
पीतरक्तासितसितास्ताराचन्द्रार्कमण्डिताः
पताका विप्रकीर्यन्ते छत्राण्येतानि चार्जुन ५७

सौवर्णा राजताश्चैव तैजसाश्च पृथग्विधाः
केतवो विनिपात्यन्ते हस्त्यश्वं विप्रकीर्यते ५८
रथेभ्यः प्रपतन्त्येते रथिनो विगतासवः
नानावर्णैर्हता बाणैः पञ्चालैरपलायिभिः ५९
निर्मनुष्यान्गजानश्वान्रथांश्चैव धनञ्जय
समाद्रवन्ति पाञ्चाला धार्तराष्ट्रांस्तरस्विनः ६०
मृद्नन्ति च नरव्याघ्रा भीमसेनव्यपाश्रयात्
बलं परेषां दुर्धर्षं त्यक्त्वा प्राणानरिंदम ६१
एते नदन्ति पाञ्चाला धमन्त्यपि च वारिजान्
अभिद्रवन्ति च रणे निघ्नन्तः सायकैः परान् ६२
पश्य स्वर्गस्य माहात्म्यं पाञ्चाला हि परंतप
धार्तराष्ट्रान्विनिघ्नन्ति क्रुद्धाः सिंहा इव द्विपान् ६३
सर्वतश्चाभिपन्नैषा धार्तराष्ट्री महाचमूः
पाञ्चालैर्मानसादेत्य हंसैर्गङ्गेव वेगितैः ६४
सुभृशं च पराक्रान्ताः पाञ्चालानां निवारणे
कृपकर्णादयो वीरा ऋषभाणामिवर्षभाः ६५
सुनिमग्नांश्च भीमास्त्रैर्धार्तराष्ट्रान्महारथान्
धृष्टद्युम्नमुखा वीरा घ्नन्ति शत्रून्सहस्रशः
विषण्णभूयिष्ठरथा धार्तराष्ट्री महाचमूः ६६
पश्य भीमेन नाराचैश्छिन्ना नागाः पतन्त्यमी
वज्रिवज्राहतानीव शिखराणि महीभृताम् ६७
भीमसेनस्य निर्विद्धा बाणैः संनतपर्वभिः
स्वान्यनीकानि मृद्नन्तो द्रवन्त्येते महागजाः ६८
नाभिजानासि भीमस्य सिंहनादं दुरुत्सहम्
नदतोऽर्जुन संग्रामे वीरस्य जितकाशिनः ६९
एष नैषादिरभ्येति द्विपमुख्येन पाण्डवम्
जिघांसुस्तोमरैः क्रुद्धो दण्डपाणिरिवान्तकः ७०
सतोमरावस्य भुजौ छिन्नौ भीमेन गर्जतः
तीक्ष्णैरग्निशिखाप्रख्यैर्नाराचैर्दशभिर्हतः ७१
हत्वैनं पुनरायाति नागानन्यान्प्रहारिणः

पश्य नीलाम्बुदनिभान्महामात्रैरधिष्ठितान्
शक्तितोमरसंकाशैर्विनिघ्नन्तं वृकोदरम् ७२
सप्त सप्त च नागांस्तान्वैजयन्तीश्च सध्वजाः
निहत्य निशितैर्बाणैश्छिन्नाः पार्थाग्रजेन ते
दशभिर्दशभिश्चैको नाराचैर्निहतो गजः ७३
न चासौ धार्तराष्ट्राणां श्रूयते निनदस्तथा
पुरंदरसमे क्रुद्धे निवृत्ते भरतर्षभे ७४
अक्षौहिण्यस्तथा तिस्रो धार्तराष्ट्रस्य संहताः
क्रुद्धेन नरसिंहेन भीमसेनेन वारिताः ७५
सञ्जय उवाच
भीमसेनेन तत्कर्म कृतं दृष्ट्वा सुदुष्करम्
अर्जुनो व्यधमच्छिष्टानहितान्निशितैः शरैः ७६
ते वध्यमानाः समरे संशप्तकगणाः प्रभो
शक्रस्यातिथितां गत्वा विशोका ह्यभवन्मुदा ७७
पार्थश्च पुरुषव्याघ्रः शरैः संनतपर्वभिः
जघान धार्तराष्ट्रस्य चतुर्विधबलां चमूम् ७८
इति श्रीमहाभारते कर्णपर्वणि त्रिचत्वारिंशोऽध्यायः ४३

चतुश्चत्वारिंशोऽध्यायः

धृतराष्ट्र उवाच
निवृत्ते भीमसेने च पाण्डवे च युधिष्ठिरे
वध्यमाने बले चापि मामके पाण्डुसृञ्जयैः १
द्रवमाणे बलौघे च निराक्रन्दे मुहुर्मुहुः
किमकुर्वन्त कुरवस्तन्ममाचक्ष्व सञ्जय २
सञ्जय उवाच
दृष्ट्वा भीमं महाबाहुं सूतपुत्रः प्रतापवान्
क्रोधरक्तेक्षणो राजन्भीमसेनमुपाद्रवत् ३
तावकं च बलं दृष्ट्वा भीमसेनात्पराङ्मुखम्
यत्नेन महता राजन्पर्यवस्थापयद्बली ४
व्यवस्थाप्य महाबाहुस्तव पुत्रस्य वाहिनीम्

प्रत्युद्ययौ तदा कर्णः पाराडवान्युद्धदुर्मदान् ५
प्रत्युद्ययुस्तु राधेयं पाराडवानां महारथाः
धुन्वानाः कार्मुकाराग्याजौ विद्मिपन्तश्च सायकान् ६
भीमसेनः शिनेर्नप्ता शिखराडी जनमेजयः
धृष्टद्युम्नश्च बलवान्सर्वे चापि प्रभद्रकाः ७
पाञ्चालाश्च नरव्याघ्राः समन्तात्तव वाहिनीम्
ग्रभ्यद्रवन्त संक्रुद्धाः समरे जितकाशिनः ८
तथैव तावका राजन्पाराडवानामनीकिनीम्
ग्रभ्यद्रवन्त त्वरिता जिघांसन्तो महारथाः ९
रथनागाश्वकलिलं पत्तिध्वजसमाकुलम्
बभूव पुरुषव्याघ्र सैन्यमद्भुतदर्शनम् १०
शिखराडी च ययौ कर्णं धृष्टद्युम्नं सुतं तव
दुःशासनं महाराज महत्या सेनया वृतम् ११
नकुलो वृषसेनं च चित्रसेनं युधिष्ठिरः
उलूकं समरे राजन्सहदेवः समभ्ययात् १२
सात्यकिः शकुनिं चापि भीमसेनश्च कौरवान्
ग्रर्जुनं च रणे यत्तं द्रोणपुत्रो महारथः १३
युधामन्युं महेष्वासं गौतमोऽभ्यपतद्रणे
कृतवर्मा च बलवानुत्तमौजसमाद्रवत् १४
भीमसेनः कुरून्सर्वान्पुत्रांश्च तव मारिष
सहानीकान्महाबाहुरेक एवाभ्यवारयत् १५
शिखराडी च ततः कर्णं विचरन्तमभीतवत्
भीष्महन्ता महाराज वारयामास पत्रिभिः १६
प्रतिरब्धस्ततः कर्णो रोषात्प्रस्फुरिताधरः
शिखरािडनं त्रिभिर्बाणैर्भ्रुवोर्मध्ये व्यताडयत् १७
धारयंस्तु स तान्बाणाञ्शिखराडी बह्वशोभत
राजतः पर्वतो यद्वत्त्रिभिः शृङ्गैः समन्वितः १८
सोऽतिविद्धो महेष्वासः सूतपुत्रेण संयुगे
कर्णं विव्याध समरे नवत्या निशितैः शरैः १९
तस्य कर्णो हयान्हत्वा सारथिं च त्रिभिः शरैः

उन्ममाथ ध्वजं चास्य क्षुरप्रेण महारथः २०
हताश्वात्तु ततो यानादवप्लुत्य महारथः
शक्तिं चिक्षेप कर्णाय संक्रुद्धः शत्रुतापनः २१
तां छित्त्वा समरे कर्णस्त्रिभिर्भारत सायकैः
शिखण्डिनमथाविध्यन्नवभिर्निशितैः शरैः २२
कर्णचापच्युतान्बाणान्वर्जयंस्तु नरोत्तमः
अपयातस्ततस्तूर्णं शिखण्डी जयतां वरः २३
ततः कर्णो महाराज पाण्डुसैन्यान्यशातयत्
तूलराशिं समासाद्य यथा वायुर्महाजवः २४
धृष्टद्युम्नो महाराज तव पुत्रेण पीडितः
दुःशासनं त्रिभिर्बाणैरभ्यविध्यत्स्तनान्तरे २५
तस्य दुःशासनो बाहुं सव्यं विव्याध मारिष
शितेन रुक्मपुङ्खेन भल्लेन नतपर्वणा २६
धृष्टद्युम्नस्तु निर्विद्धः शरं घोरममर्षणः
दुःशासनाय संक्रुद्धः प्रेषयामास भारत २७
आपतन्तं महावेगं धृष्टद्युम्न समीरितम्
शरैश्चिच्छेद पुत्रस्ते त्रिभिरेव विशां पते २८
अथापरैः सप्तदशैर्भल्लैः कनकभूषणैः
धृष्टद्युम्नं समासाद्य बाह्वोरुरसि चार्दयत् २९
ततः स पार्षतः क्रुद्धो धनुश्चिच्छेद मारिष
क्षुरप्रेण सुतीक्ष्णेन तत उच्चुक्रुशुर्जनाः ३०
अथान्यद्धनुरादाय पुत्रस्ते भरतर्षभ
धृष्टद्युम्नं शरव्रातैः समन्तात्पर्यवारयत् ३१
तव पुत्रस्य ते दृष्ट्वा विक्रमं तं महात्मनः
व्यहसन्त रणे योधाः सिद्धाश्चाप्सरसां गणाः ३२
ततः प्रववृते युद्धं तावकानां परैः सह
घोरं प्राणभृतां काले घोररूपं परंतप ३३
नकुलं वृषसेनस्तु विद्ध्वा पञ्चभिरायसैः
पितुः समीपे तिष्ठन्तं त्रिभिरन्यैरविध्यत ३४
नकुलस्तु ततः क्रुद्धो वृषसेनं स्मयन्निव

नाराचेन सुतीक्ष्णेन विव्याध हृदये दृढम् ३५
सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्शनः
शत्रुं विव्याध विंशत्या स च तं पञ्चभिः शरैः ३६
ततः शरसहस्रेण तावुभौ पुरुषर्षभौ
अन्योन्यमाच्छादयतामथाभज्यत वाहिनी ३७
दृष्ट्वा तु प्रद्रुतां सेनां धार्तराष्ट्रस्य सूतजः
निवारयामास बलादनुपत्य विशां पते
निवृत्ते तु ततः कर्णे नकुलः कौरवान्ययौ ३८
कर्णपुत्रस्तु समरे हित्वा नकुलमेव तु
जुगोप चक्रं त्वरितं राधेयस्यैव मारिष ३९
उलूकस्तु रणे क्रुद्धः सहदेवेन वारितः
तस्याश्वांश्चतुरो हत्वा सहदेवः प्रतापवान्
सारथिं प्रेषयामास यमस्य सदनं प्रति ४०
उलूकस्तु ततो यानादवप्लुत्य विशां पते
त्रिगर्तानां बलं पूर्णं जगाम पितृनन्दनः ४१
सात्यकिः शकुनिं विद्ध्वा विंशत्या निशितैः शरैः
ध्वजं चिच्छेद भल्लेन सौबलस्य हसन्निव ४२
सौबलस्तस्य समरे क्रुद्धो राजन्प्रतापवान्
विदार्य कवचं भूयो ध्वजं चिच्छेद काञ्चनम् ४३
अथैनं निशितैर्बाणैः सात्यकिः प्रत्यविध्यत
सारथिं च महाराज त्रिभिरेव समार्दयत्
अथास्य वाहांस्त्वरितः शरैर्निन्ये यमक्षयम् ४४
ततोऽवप्लुत्य सहसा शकुनिर्भरतर्षभ
आरुरोह रथं तूर्णमुलूकस्य महारथः
अपोवाहाथ शीघ्रं स शैनेयाद्युद्धशालिनः ४५
सात्यकिस्तु रणे राजंस्तावकानामनीकिनीम्
अभिदुद्राव वेगेन ततोऽनीकमभिद्यत ४६
शैनेयशरनुन्नं तु ततः सैन्यं विशां पते
भेजे दश दिशस्तूर्णं न्यपतच्च गतासुवत् ४७
भीमसेनं तव सुतो वारयामास संयुगे

तं तु भीमो मुहूर्तेन व्यश्वसूतरथध्वजम्
चक्रे लोकेश्वरं तत्र तेनातुष्यन्त चारणाः ४८
ततोऽपायान्नृपस्तत्र भीमसेनस्य गोचरात्
कुरुसैन्यं ततः सर्वं भीमसेनमुपाद्रवत्
तत्र रावो महानासीद्भीममेकं जिघांसताम् ४९
युधामन्युः कृपं विद्ध्वा धनुरस्याशु चिच्छिदे
अथान्यद्धनुरादाय कृपः शस्त्रभृतां वरः ५०
युधामन्योर्ध्वजं सूतं छत्रं चापातयत्ततौ
ततोऽपायाद्रथेनैव युधामन्युर्महारथः ५१
उत्तमौजास्तु हार्दिक्यं शरैर्भीमपराक्रमम्
छादयामास सहसा मेघो वृष्ट्या यथाचलम् ५२
तद्युद्धं सुमहच्चासीद्घोररूपं परंतप
यादृशं न मया युद्धं दृष्टपूर्वं विशां पते ५३
कृतवर्मा ततो राजन्नुत्तमौजसमाहवे
हृदि विव्याध स तदा रथोपस्थ उपाविशत् ५४
सारथिस्तमपोवाह रथेन रथिनां वरम्
ततस्तु सत्वरं राजन्पाण्डुसैन्यमुपाद्रवत् ५५
इति श्रीमहाभारते कर्णपर्वणि चतुश्चत्वारिंशोऽध्यायः ४४

पञ्चचत्वारिंशोऽध्यायः

सञ्जय उवाच
द्रौणिस्तु रथवंशेन महता परिवारितः
आपतत्सहसा राजन्यत्र राजा व्यवस्थितः १
तमापतन्तं सहसा शूरः शौरिसहायवान्
दधार सहसा पार्थो वेलेव मकरालयम् २
ततः क्रुद्धो महाराज द्रोणपुत्रः प्रतापवान्
अर्जुनं वासुदेवं च छादयामास पत्रिभिः ३
अवच्छन्नौ ततः कृष्णौ दृष्ट्वा तत्र महारथाः
विस्मयं परमं गत्वा प्रैक्षन्त कुरवस्तदा ४
अर्जुनस्तु ततो दिव्यमस्त्रं चक्रे हसन्निव

तदस्त्रं ब्राह्मणो युद्धे वारयामास भारत ५
यद्यद्धि व्याक्षिपद्युद्धे पाण्डवोऽस्त्र जिघांसया
तत्तदस्त्रं महेष्वासो द्रोणपुत्रो व्यशातयत् ६
अस्त्रयुद्धे ततो राजन्वर्तमाने भयावहे
अपश्याम रणे द्रौणिं व्यात्ताननमिवान्तकम् ७
स दिशो विदिशश्चैव छादयित्वा विजिह्मगैः
वासुदेवं त्रिभिर्बाणैरविध्यद्दक्षिणे भुजे ८
ततोऽजुनो हयान्हत्वा सर्वांस्तस्य महात्मनः
चकार समरे भूमिं शोणितौघतरङ्गिणीम् ९
निहता रथिनः पेतुः पार्थचापच्युतैः शरैः
हयाश्च पर्यधावन्त मुक्तयोक्त्रास्ततस्ततः १०
तद्दृष्ट्वा कर्म पार्थस्य द्रौणिराहवशोभिनः
अवाकिरद्रणे कृष्णं समन्तान्निशितैःशरैः ११
ततोऽजुनं महाराज द्रौणिरायम्य पत्रिणा
वक्षोदेशे समासाद्य ताडयामास संयुगे १२
सोऽतिविद्धो रणे तेन द्रोणपुत्रेण भारत
आदत्त परिघं घोरं द्रौणेश्चैनमवाक्षिपत् १३
तमापतन्तं परिघं कार्तस्वरविभूषितम्
द्रौणिश्चिच्छ्द सहसा तत उच्चुक्रुशुर्जनाः १४
सोऽनेकधापतद्भूमौ भारद्वाजस्य सायकैः
विशीर्णः पर्वतो राजन्यथा स्यान्मातरिश्वना १५
ततोऽजुनो रणे द्रौणिं विव्याध दशभिः शरैः
सारथिं चास्य भल्लेन रथनीडादपाहरत् १६
स संगृह्य स्वयं वाहान्कृष्णौ प्राच्छादयच्छरैः
तत्राद्भुतमपश्याम द्रौणेराशु पराक्रमम् १७
अयच्छत्तुरगान्यच्च फल्गुनं चाप्ययोधयत्
तदस्य समरे राजन्सर्वे योधा अपूजयन् १८
यदा त्वग्रस्यत रणे द्रोणपुत्रेण फल्गुनः
ततो रश्मीन्रथाश्वानां क्षुरप्रैश्चिच्छिदे जयः १९
प्राद्रवंस्तुरगास्ते तु शरवेगप्रबाधिताः

ततोऽभून्निनदो भूयस्तव सैन्यस्य भारत २०
पाण्डवास्तु जयं लब्ध्वा तव सैन्यमुपाद्रवन्
समन्तान्निशितान्बाणान्विमुञ्चन्तो जयैषिणः २१
पाण्डवैस्तु महाराज धार्तराष्ट्री महाचमूः
पुनः पुनरथो वीरैरभज्यत जयोद्धतैः २२
पश्यतां ते महाराज पुत्राणां चित्रयोधिनाम्
शकुनेः सौबलेयस्य कर्णस्य च महात्मनः २३
वार्यमाणा महासेना पुत्रैस्तव जनेश्वर
नावतिष्ठत संग्रामे ताड्यमाना समन्ततः २४
ततो योधैर्महाराज पलायद्भिस्ततस्ततः
अभवद्व्याकुलं भीतैः पुत्राणां ते महद्बलम् २५
तिष्ठ तिष्ठेति सततं सूतपुत्रस्य जल्पतः
नावतिष्ठत सा सेना वध्यमाना महात्मभिः २६
अथोत्क्रुष्टं महाराज पाण्डवैर्जितकाशिभिः
धार्तराष्ट्रबलं दृष्ट्वा द्रवमाणं समन्ततः २७
ततो दुर्योधनः कर्णमब्रवीत्प्रणयादिव
पश्य कर्ण यथा सेना पाण्डवैरर्दिता भृशम् २८
त्वयि तिष्ठति संत्रासात्पलायति समन्ततः
एतज्ज्ञात्वा महाबाहो कुरु प्राप्तमरिंदम २९
सहस्राणि च योधानां त्वामेव पुरुषर्षभ
क्रोशन्ति समरे वीर द्राव्यमाणानि पाण्डवैः ३०
एतच्छ्रुत्वा तु राधेयो दुर्योधनवचो महत्
मद्रराजमिदं वाक्यमब्रवीत्सूतनन्दनः ३१
पश्य मे भुजयोर्वीर्यमस्त्राणां च जनेश्वर
अद्य हन्मि रणे सर्वान्पाञ्चालान्पाण्डुभिः सह
वाहयाश्वान्नरव्याघ्र भद्रेणैव जनेश्वर ३२
एवमुक्त्वा महाराज सूतपुत्रः प्रतापवान्
प्रगृह्य विजयं वीरो धनुःश्रेष्ठं पुरातनम्
सज्यं कृत्वा महाराज संमृज्य च पुनः पुनः ३३
संनिवार्य च योधान्स्वान्सत्येन शपथेन च

प्रायोजयदमेयात्मा भार्गवास्त्रं महाबलः ३४
ततो राजन्सहस्राणि प्रयुतान्यर्बुदानि च
कोटिशश्च शरास्तीक्ष्णा निरगच्छन्महामृधे ३५
ज्वलितैस्तैर्महाघोरैः कङ्कबर्हिणवाजितैः
संछन्ना पाण्डवी सेना न प्राज्ञायत किंचन ३६
हाहाकारो महानासीत्पाञ्चालानां विशां पते
पीडितानां बलवता भार्गवास्त्रेण संयुगे ३७
निपतद्भिर्गजै राजन्नरैश्चापि सहस्रशः
रथैश्चापि नरव्याघ्र हयैश्चापि समन्ततः ३८
प्राकम्पत मही राजन्निहतैस्तैस्ततस्ततः
व्याकुलं सर्वमभवत्पाण्डवानां महद्बलम् ३९
कर्णस्त्वेको युधां श्रेष्ठो विधूम इव पावकः
दहञ्शत्रून्नरव्याघ्र शुशुभे स परंतपः ४०
ते वध्यमानाः कर्णेन पाञ्चालाश्चेदिभिः सह
तत्र तत्र व्यमुह्यन्त वनदाहे यथा द्विपाः
चुक्रुशुस्ते नरव्याघ्र यथाप्राग्वा नरोत्तमाः ४१
तेषां तु क्रोशतां श्रुत्वा भीतानां रणमूर्धनि
धावतां च दिशो राजन्वित्रस्तानां समन्ततः
आर्तनादो महांस्तत्र प्रेतानामिव संप्लवे ४२
वध्यमानांस्तु तान्दृष्ट्वा सूतपुत्रेण मारिष
वित्रेसुः सर्वभूतानि तिर्यग्योनिगतान्यपि ४३
ते वध्यमानाः समरे सूतपुत्रेण सृञ्जयाः
अर्जुनं वासुदेवं च व्याक्रोशन्त मुहुर्मुहुः
प्रेतराजपुरे यद्वत्प्रेतराजं विचेतसः ४४
अथाब्रवीद्वासुदेवं कुन्तीपुत्रो धनंजयः
भार्गवास्त्रं महाघोरं दृष्ट्वा तत्र समीरितम् ४५
पश्य कृष्ण महाबाहो भार्गवास्त्रस्य विक्रमम्
नैतदस्त्रं हि समरे शक्यं हन्तुं कथंचन ४६
सूतपुत्रं च संरब्धं पश्य कृष्ण महारणे
अन्तकप्रतिमं वीरं कुर्वाणं कर्म दारुणम् ४७

सुतीक्ष्णं चोदयन्नश्वान्प्रेक्षते मां मुहुर्मुहुः
न च पश्यामि समरे कर्णस्य प्रपलायितम् ४८
जीवन्प्राप्नोति पुरुषः संख्ये जयपराजयौ
जितस्य तु हृषीकेश वध एव कुतो जयः ४९
ततो जनार्दनः प्रायाद्द्रष्टुमिच्छन्युधिष्ठिरम्
श्रमेण ग्राहयिष्यंश्च कर्णं युद्धेन मारिष ५०
अर्जुनं चाब्रवीत्कृष्णो भृशं राजा परिक्षतः
तमाश्वास्य कुरुश्रेष्ठ ततः कर्णं हनिष्यसि ५१
ततो धनंजयो द्रष्टुं राजानं बाणपीडितम्
रथेन प्रययौ क्षिप्रं संग्रामे केशवाज्ञया ५२
गच्छन्नेव तु कौन्तेयो धर्मराजदिदृक्षया
सैन्यमालोकयामास नापश्यत्तत्र चाग्रजम् ५३
युद्धं कृत्वा तु कौन्तेयो द्रोणपुत्रेण भारत
दुःसहं वज्रिणा संख्ये पराजिग्ये भृगोः सुतम् ५४
द्रौणिं पराजित्य ततोग्रधन्वा कृत्वा महद्दुष्करमार्यकर्म
आलोकयामास ततः स्वसैन्यं धनंजयः शत्रुभिरप्रधृष्यः ५५
स युध्यमानः पृतनामुखस्थाञ्शूराञ्शूरो हर्षयन्सव्यसाची
पूर्वापदानैः प्रथितैः प्रशंसन्स्थिरांश्चकारात्मरथाननीके ५६
अपश्यमानस्तु किरीटमाली युधि ज्येष्ठं भ्रातरमाजमीढम्
उवाच भीमं तरसाभ्युपेत्य राज्ञः प्रवृत्तिस्त्विह केति राजन् ५७
भीम उवाच
अपयात इतो राजा धर्मपुत्रो युधिष्ठिरः
कर्णबाणविभुग्नाङ्गो यदि जीवेत्कथंचन ५८
अर्जुन उवाच
तस्माद्भवाञ्शीघ्रमितः प्रयातु राज्ञः प्रवृत्त्यै कुरुसत्तमस्य
नूनं हि विद्धोऽतिभृशं पृषत्कैः कर्णेन राजा शिबिरं गतोऽसौ ५९
यः संप्रहारे निशि स्त्रंपवृत्ते द्रोणेन विद्धोऽतिभृशं तरस्वी
तस्थौ च तत्रापि जयप्रतीक्षो द्रोणेन यावन्न हतः किलासीत् ६०
स संशयं गमितः पाण्डवाग्र्यः संख्येऽद्य कर्णेन महानुभावः
ज्ञातुं प्रयाह्याशु तमद्य भीम स्थास्याम्यहं शत्रुगणान्निरुध्य ६१

भीम उवाच
त्वमेव जानीहि महानुभाव राज्ञः प्रवृत्तिं भरतर्षभस्य
अहं हि यद्यर्जुन यामि तत्र वक्ष्यन्ति मां भीत इति प्रवीराः ६२
ततोऽब्रवीदर्जुनो भीमसेनं संशप्तकाः प्रत्यनीकं स्थिता मे
एतानहत्वा न मया तु शक्यमितोऽपयातुं रिपुसंघगोष्ठात् ६३
अथाब्रवीदर्जुनं भीमसेनः स्ववीर्यमाश्रित्य कुरुप्रवीर
संशप्तकान्प्रतियोत्स्यामि संख्ये सर्वानहं याहि धनंजयेति ६४
तद्भीमसेनस्य वचो निशम्य सुदुर्वचं भ्रातुरमित्रमध्ये
द्रष्टुं कुरुश्रेष्ठमभिप्रयातुं प्रोवाच वृष्णिप्रवरं तदानीम् ६५
चोदयाश्वान्हृषीकेश विगाह्यैतं रथार्णवम्
अजातशत्रुं राजानं द्रष्टुमिच्छामि केशव ६६
ततो हयान्सर्वदाशार्हमुख्यः प्राचोदयद्भीममुवाच चेदम्
नैतच्चित्रं तव कर्माद्य वीर यास्यामहे जहि भीमारिसंघान् ६७
ततो ययौ हृषीकेशो यत्र राजा युधिष्ठिरः
शीघ्राच्छीघ्रतरं राजन्वाजिभिर्गरुडोपमैः ६८
प्रत्यनीके व्यवस्थाप्य भीमसेनमरिंदमम्
संदिश्य चैव राजेन्द्र युद्धं प्रति वृकोदरम् ६९
ततस्तु गत्वा पुरुषप्रवीरौ राजानमासाद्य शयानमेकम्
रथादुभौ प्रत्यवरुह्य तस्माद्ववन्दतुर्धर्मराजस्य पादौ ७०
तौ दृष्ट्वा पुरुषव्याघ्रौ क्षेमिणौ पुरुषर्षभ
मुदाभ्युपगतौ कृष्णावश्विनाविव वासवम् ७१
तावभ्यनन्दद्राजा हि विवस्वानश्विनाविव
हते महासुरे जम्भे शक्रविष्णू यथा गुरुः ७२
मन्यमानो हतं कर्णं धर्मराजो युधिष्ठिरः
हर्षगद्गदया वाचा प्रीतः प्राह परंतपौ ७३
इति श्रीमहाभारते कर्णपर्वणि पञ्चचत्वारिंशोऽध्यायः ४५

षट्चत्वारिंशोऽध्यायः

सञ्जय उवाच
महासत्त्वौ तु तौ दृष्ट्वा सहितौ केशवार्जुनौ

हतमाधिरथिं मेने संख्ये गाण्डीवधन्वना १
तावभ्यनन्दत्कौन्तेयः साम्ना परमवल्गुना
स्मितपूर्वममित्रघ्नः पूजयन्भरतर्षभ २
युधिष्ठिर उवाच
स्वागतं देवकीपुत्र स्वागतं ते धनंजय
प्रियं मे दर्शनं बाढं युवयोरच्युतार्जुनौ ३
अक्षताभ्यामरिष्टाभ्यां कथं युध्य महारथम्
आशीविषसमं युद्धे सर्वशस्त्रविशारदम् ४
अग्रगं धार्तराष्ट्राणां सर्वेषां शर्म वर्म च
रक्षितं वृषसेनेन सुषेणेन च धन्विना ५
अनुज्ञातं महावीर्यं रामेणास्त्रेषु दुर्जयम्
त्रातारं धार्तराष्ट्राणां गन्तारं वाहिनीमुखे ६
हन्तारमरिसैन्यानाममित्रगणमर्दनम्
दुर्योधनहिते युक्तमस्मद्युद्धाय चोद्यतम् ७
अप्रधृष्यं महायुद्धे देवैरपि सवासवैः
अनलानिलयोस्तुल्यं तेजसा च बलेन च ८
पातालमिव गम्भीरं सुहृदानन्दवर्धनम्
अन्तकाभममित्राणां कर्णं हत्वा महाहवे
दिष्ट्या युवामनुप्राप्तौ जित्वासुरमिवामरौ ९
तेन युद्धमदीनेन मया ह्यद्याच्युतार्जुनौ
कुपितेनान्तकेनेव प्रजाः सर्वा जिघांसता १०
तेन केतुश्च मे छिन्नो हतौ च पार्ष्णिसारथी
हतवाहः कृतश्चास्मि युयुधानस्य पश्यतः ११
धृष्टद्युम्नस्य यमयोर्वीरस्य च शिखण्डिनः
पश्यतां द्रौपदेयानां पञ्चालानां च सर्वशः १२
एताञ्जित्वा महावीर्यान्कर्णः शत्रुगणान्बहून्
जितवान्मां महाबाहो यतमानं महारणे १३
अनुसृत्य च मां युद्धे परुषाण्युक्तवान्बहु
तत्र तत्र युधां श्रेष्ठः परिभूय न संशयः १४
भीमसेनप्रभावात्तु यज्जीवामि धनंजय

बहुनात्र किमुक्तेन नाहं तत्सोढुमुत्सहे १५
त्रयोदशाहं वर्षाणि यस्माद्भीतो धनंजय
न स्म निद्रां लभे रात्रौ न चाहनि सुखं क्वचित् १६
तस्य द्वेषेण संयुक्तः परिदह्ये धनंजय
आत्मनो मरणं जानन्वाध्रीणस इव द्विपः १७
यस्यायमगमत्कालश्चिन्तयानस्य मे विभो
कथं शक्यो मया कर्णो युद्धे क्षपयितुं भवेत् १८
जाग्रत्स्वपंश्च कौन्तेय कर्णमेव सदा ह्यहम्
पश्यामि तत्र तत्रैव कर्णभूतमिदं जगत् १९
यत्र यत्र हि गच्छामि कर्णाद्भीतो धनंजय
तत्र तत्र हि पश्यामि कर्णमेवाग्रतः स्थितम् २०
सोऽह तेनैव वीरेण समरेष्वपलायिना
सहयः सरथः पार्थ जित्वा जीवन्विसर्जितः २१
को नु मे जीवितेनार्थो राज्येनार्थोऽथ वा पुनः
ममैवं धिक्कृतस्येह कर्णेनाहवशोभिना २२
न प्राप्त पूर्वं यद्भीष्मात्कृपाद्द्रोणाच्च संयुगे
तत्प्राप्तमद्य मे युद्धे सूतपुत्रान्महारथात् २३
तत्त्वा पृच्छामि कौन्तेय यथा ह्यकुशलस्तथा
तन्ममाचक्ष्व कार्त्स्न्येन यथा कर्णस्त्वया हतः २४
शक्रवीर्यसमो युद्धे यमतुल्यपराक्रमः
रामतुल्यस्तथास्त्रे यः स कथं वै निषूदितः २५
महारथः समाख्यातः सर्वयुद्धविशारदः
धनुर्धराणां प्रवरः सर्वेषामेकपूरुषः २६
पूजितो धृतराष्ट्रेण सपुत्रेण विशां पते
सदा त्वदर्थं राधेयः स कथं निहतस्त्वया २७
धृतराष्ट्रो हि योधेषु सर्वेष्वेव सदार्जुन
तव मृत्युं रणे कर्णं मन्यते पुरुषर्षभः २८
स त्वया पुरुषव्याघ्र कथं युद्धे निषूदितः
तन्ममाचक्ष्व बीभत्सो यथा कर्णो हतस्त्वया २९
सोत्सेधमस्य च शिरः पश्यतां सुहृदां हृतम्

त्वया पुरुषशार्दूल शार्दूलेन यथा रुरोः ३०
यः पर्युपासीत्प्रदिशो दिशश्च त्वां सूतपुत्रः समरे परीप्सन्
दित्सुः कर्णः समरे हस्तिपूगं स हीदानीं कङ्कपत्रैः सुतीक्ष्णैः ३१
त्वया रणे निहतः सूतपुत्रः कच्चिच्छेते भूमितले दुरात्मा
कच्चित्प्रियं मे परमं त्वयाद्य कृतं रणे सूतपुत्रं निहत्य ३२
यः सर्वतः पर्यपतत्त्वदर्थे मदान्वितो गर्वितः सूतपुत्रः
स शूरमानी समरे समेत्य कच्चित्त्वया निहतः संयुगेऽद्य ३३
रौक्मं रथं हस्तिवरैश्च युक्तं रथं दित्सुर्यः परेभ्यस्त्वदर्थे
सदा रणे स्पर्धते यः स पापः कच्चित्त्वया निहतस्तात युद्धे ३४
योऽसौ नित्यं शूरमदेन मत्तो विकत्थते संसदि कौरवाणाम्
प्रियोऽत्यर्थं तस्य सुयोधनस्य कच्चित्स पापो निहतस्त्वयाद्य ३५
कच्चित्समागम्य धनुःप्रमुक्तैस्त्वत्प्रेषितैर्लोहितार्थैर्विहंगैः
शेतेऽद्य पापः स विभिन्नगात्रः कच्चिद्भग्नो धार्तराष्ट्रस्य बाहुः ३६
योऽसौ सदा श्लाघते राजमध्ये दुर्योधनं हर्षयन्दर्पपूर्णः
अहं हन्ता फल्गुनस्येति मोहात्कच्चिद्धतस्तस्य न वै तथा रथः ३७
नाहं पादौ धावयिष्ये कदाचिद्यावत्स्थितः पार्थ इत्यल्पबुद्धिः
व्रतं तस्यैतत्सर्वदा शक्रसूनो कच्चित्त्वया निहतः सोऽद्य कर्णः ३८
योऽसौ कृष्णामब्रवीद्दुष्टबुद्धिः कर्णः सभायां कुरुवीरमध्ये
किं पाण्डवांस्त्वं न जहासि कृष्णे सुदुर्बलान्पतितान्हीनसत्त्वान् ३९
यत्तत्कर्णः प्रत्यजानात्त्वदर्थे नाहत्वाहं सह कृष्णेन पार्थम्
इहोपयातेति स पापबुद्धिः कच्चिच्छेते शरसंभिन्नगात्रः ४०
कच्चित् संग्रामे विदितो वा तदायं समागमः सृञ्जयकौरवाणाम्
यत्रावस्थामीदृशीं प्रापितोऽह कच्चित्त्वया सोऽद्य हतः समेत्य ४१
कच्चित्त्वया तस्य सुमन्दबुद्धेर्गाण्डीवमुक्तैर्विशिखैर्ज्वलद्भिः
सकुण्डलं भानुमदुत्तमाङ्गं कायात्प्रकृत्तं युधि सव्यसाचिन् ४२
यत्तन्मया बाणसमर्पितेन ध्यातोऽसि कर्णस्य वधाय वीर
तन्मे त्वया कच्चिदमोघमद्य ध्यातं कृतं कर्णनिपातनेन ४३
यद्दर्पपूर्णः स सुयोधनोऽस्मानवेक्षते कर्णसमाश्रयेण
कच्चित्त्वया सोऽद्य समाश्रयोऽस्य भग्नः पराक्रम्य सुयोधनस्य ४४
यो नः पुरा षण्ढतिलानवोचत्सभामध्ये पार्थिवानां समक्षम्

स दुर्मतिः कच्चिदुपेत्य संख्ये त्वया हतः सूतपुत्रोऽत्यमर्षी ४५
यः सूतपुत्रः प्रहसन्दुरात्मा पुराब्रवीन्निर्जितां सौबलेन
स्वयं प्रसह्यानय याज्ञसेनीमपीह कच्चित्स हतस्त्वयाद्य ४६
यः शस्त्रभृच्छ्रेष्ठ तमं पृथिव्यां पितामहं व्याक्षिपदल्पचेताः
संख्यायमानोऽधरथः स कच्चित्त्वया हतोऽद्याधिरथिर्दुरात्मा ४७
अमर्षणं निकृतिसमीरणेरितं हृदि श्रितं ज्वलनमिमं सदा मम
हतो मया सोऽद्य समेत्य पापधीरिति ब्रुवन्प्रशमय मेऽद्य फल्गुन ४८
इति श्रीमहाभारते कर्णपर्वणि षट्चत्वारिंशोऽध्यायः ४६

सप्त चत्वारिंशोऽध्यायः

सञ्जय उवाच
तद्धर्मशीलस्य वचो निशम्य राज्ञः क्रुद्धस्याधिरथो महात्मा
उवाच दुर्धर्षमदीनसत्त्वं युधिष्ठिरं जिष्णुरनन्तवीर्यः १
संशप्तकैर्युध्यमानस्य मेऽद्य सेनाग्रयायी कुरुसैन्यस्य राजन्
आशीविषाभान्खगमान्प्रमुञ्चन्द्रौणिः पुरस्तात्सहसा व्यतिष्ठत् २
दृष्ट्वा रथं मेघनिभं ममेममम्बष्ठसेना मरणे व्यतिष्ठत्
तेषामहं पञ्च शतानि हत्वा ततो द्रौणिमगमं पार्थिवाग्र्य ३
ततोऽपरान्बाणसंघाननेकानाकर्णपूर्णायतविप्रमुक्तान्
ससर्ज शिक्षास्त्रबलप्रयत्नैस्तथा यथा प्रावृषि कालमेघः ४
नैवाददानं न च संदधानं जानीमहे कतरेणास्यतीति
वामेन वा यदि वा दक्षिणेन स द्रोणपुत्रः समरे पर्यवर्तत् ५
अविध्यन्मां पञ्चभिर्द्रोणपुत्रः शितैः शरैः पञ्चभिर्वासुदेवम्
अहं तु तं त्रिंशता वज्रकल्पैः समार्दयं निमिषस्यान्तरेण ६
स विक्षरन्रुधिरं सर्वगात्रै रथानीकं सूतसूनोर्विवेश
मयाभिभूतः सैनिकानां प्रबर्हानसावपश्यन्रुधिरेण प्रदिग्धान् ७
ततोऽभिभूतं युधि वीक्ष्य सैन्यं विध्वस्तयोधं द्रुतवाजिनागम्
पञ्चाशता रथमुख्यैः समेतः कर्णस्त्वरन्मामुपायात्प्रमाथी ८
तान्सूदयित्वाहमपास्य कर्णं द्रष्टुं भवन्तं त्वरयाभियातः
सर्वे पाञ्चाला ह्युद्विजन्ते स्म कर्णाद्गन्धाद्गावः केसरिणो यथैव ९
महाझषस्येव मुखं प्रपन्नाः प्रभद्रकाः कर्णमभि द्रवन्ति

मृत्योरास्यं व्यात्तमिवान्वपद्यन्प्रभद्रकाः कर्णमासाद्य राजन् १०
आयाहि पश्याद्य युयुत्समानं मां सूतपुत्रं च वृतौ जयाय
षट्साहस्रा भारत राजपुत्राः स्वर्गाय लोकाय रथा निमग्नाः ११
समेत्याहं सूतपुत्रेण संख्ये वृत्रेण वज्रीव नरेन्द्रमुख्य
योत्स्ये भृशं भारत सूतपुत्रमस्मिन्संग्रामे यदि वै दृश्यतेऽद्य १२
कर्णं न चेदद्य निहन्मि राजन्सबान्धवं युध्यमानं प्रसह्य
प्रतिश्रुत्याकुर्वतां वै गतिर्या कष्टां गच्छेयं तामहं राजसिंह १३
आमन्त्रये त्वां ब्रूहि जयं रणे मे पुरा भीमं धार्तराष्ट्रा ग्रसन्ते
सौतिं हनिष्यामि नरेन्द्रसिंह सैन्यं तथा शत्रुगणांश्च सर्वान् १४
इति श्रीमहाभारते कर्णपर्वणि सप्तचत्वारिंशोऽध्यायः ४७

अष्टचत्वारिंशोऽध्यायः

सञ्जय उवाच
श्रुत्वा कर्णं कल्पमुदारवीर्यं क्रुद्धः पार्थः फल्गुनस्यामितौजाः
धनंजयं वाक्यमुवाच चेदं युधिष्ठिरं कर्णशराभितप्तः १
इदं यदि द्वैतवने ह्यवक्ष्यः कर्णं योद्धुं न प्रसहे नृपेति
वयं तदा प्राप्तकालानि सर्वे वृत्तान्युपैष्याम तदैव पार्थ २
मयि प्रतिश्रुत्य वधं हि तस्य बलस्य चाप्तस्य तथैव वीर
आनीय नः शत्रुमध्यं स कस्मात्समुत्क्षिप्य स्थण्डिले प्रत्यपिंष्ठाः ३
अन्वाशिष्म वयमर्जुन त्वयि यियासवो बहु कल्याणमिष्टम्
तन्नः सर्वं विफलं राजपुत्र फलार्थिनां निचुल इवातिपुष्पः ४
प्रच्छादितं बडिशमिवामिषेण प्रच्छादितो गवय इवापवाचा
अनर्थकं मे दर्शितवानसि त्वं राज्यार्थिनो राज्यरूपं विनाशम् ५
यत्तत्पृथां वागुवाचान्तरिक्षे सप्ताहजाते त्वयि मन्दबुद्धौ
जातः पुत्रो वासवविक्रमोऽय सर्वाञ्शूराञ्शात्रवाञ्जेष्यतीति ६
अयं जेता खाण्डवे देवसंघान्सर्वाणि भूतान्यपि चोत्तमौजाः
अयं जेता मद्रकलिङ्गकेकयानयं कुरून्हन्ति च राजमध्ये ७
अस्मात्परो न भविता धनुर्धरो न वै भूतः कश्चन जातु जेता
इच्छन्नार्यः सर्वभूतानि कुर्याद्वशे वशी सर्वसमाप्तविद्यः ८
कान्त्या शशाङ्कस्य जवेन वायोः स्थैर्येण मेरोः क्षमया पृथिव्याः

सूर्यस्य भासा धनदस्य लक्ष्म्या शौर्येण शक्रस्य बलेन विष्णोः ९
तुल्यो महात्मा तव कुन्ति पुत्रो जातोऽदितेर्विष्णुरिवारिहन्ता
स्वेषां जयाय द्विषतां वधाय ख्यातोऽमितौजाः कुलतन्तुकर्ता १०
इत्यन्तरिक्षे शतशृङ्गमूर्ध्नि तपस्विनां शृण्वतां वागुवाच
एवंविधं त्वां तच्च नाभूत्तवाद्य देवा हि नूनमनृतं वदन्ति ११
तथापरेषामृषिसत्तमानां श्रुत्वा गिरं पूजयतां सदैव
न संनतिं प्रैमि सुयोधनस्य न त्वा जानाम्याधिरथेर्भयार्तम् १२
त्वष्ट्रा कृतं वाहमकूजनाक्षं शुभं समास्थाय कपिध्वजं त्वम्
खड्गं गृहीत्वा हेमचित्रं समिद्धं धनुश्चेदं गाण्डिवं तालमात्रम्
स केशवेनोह्यमानः कथं नु कर्णाद्भीतो व्यपयातोऽसि पार्थ १३
धनुश्चैतत्केशवाय प्रदाय यन्ताभविष्यस्त्वं रणे चेद्दुरात्मन्
ततोऽहनिष्यत्केशवः कर्णमुग्रं मरुत्पतिर्वृत्रमिवात्तवज्रः १४
मासेऽपतिष्यः पञ्चमे त्वं प्रकृच्छ्रे न वा गर्भोऽप्यभविष्यः पृथायाः
तत्ते श्रमो राजपुत्राभविष्यन्न संग्रामादपयातुं दुरात्मन् १५
इति श्रीमहाभारते कर्णपर्वणि अष्टचत्वारिंशोऽध्यायः ४८

एकोनपञ्चाशोऽध्यायः

सञ्जय उवाच
युधिष्ठिरेणैवमुक्तः कौन्तेयः श्वेतवाहनः
असिं जग्राह संक्रुद्धो जिघांसुर्भरतर्षभम् १
तस्य कोपं समुद्वीक्ष्य चित्तज्ञः केशवस्तदा
उवाच किमिदं पार्थ गृहीतः खड्ग इत्युत २
नेह पश्यामि योद्धव्यं तव किंचिद्धनंजय
ते ध्वस्ता धार्तराष्ट्रा हि सर्वे भीमेन धीमता ३
अपयातोऽसि कौन्तेय राजा द्रष्टव्य इत्यपि
स राजा भवता दृष्टः कुशली च युधिष्ठिरः ४
तं दृष्ट्वा नृपशार्दूलं शार्दूलसमविक्रमम्
हर्षकाले तु स्त्रंपाप्ते कस्मात्त्वा मन्युराविशत् ५
न तं पश्यामि कौन्तेय यस्ते वध्यो भवेदिह
कस्माद्भवान्महाखड्गं परिगृह्णाति सत्वरम् ६

तत्त्वा पृच्छामि कौन्तेय किमिदं ते चिकीर्षितम्
परामृशसि यत्क्रुद्धः खड्गमद्भुतविक्रम ७
एवमुक्तस्तु कृष्णेन प्रेक्षमाणो युधिष्ठिरम्
अर्जुनः प्राह गोविन्दं क्रुद्धः सर्प इव श्वसन् ८
दद गाण्डीवमन्यस्मा इति मां योऽभिचोदयेत्
छिन्द्यामहं शिरस्तस्य इत्युपांशुव्रतं मम ९
तदुक्तोऽहमदीनात्मन्राज्ञामितपराक्रम
समक्षं तव गोविन्द न तत्क्षन्तुमिहोत्सहे १०
तस्मादेनं वधिष्यामि राजानं धर्मभीरुकम्
प्रतिज्ञां पालयिष्यामि हत्वेमं नरसत्तमम्
एतदर्थं मया खड्गो गृहीतो यदुनन्दन ११
सोऽह युधिष्ठिरं हत्वा सत्येऽप्यानृण्यतां गतः
विशोको विज्वरश्चापि भविष्यामि जनार्दन १२
किं वा त्वं मन्यसे प्राप्तमस्मिन्काले समुत्थिते
त्वमस्य जगतस्तात वेत्थ सर्वं गतागतम्
तत्तथा प्रकरिष्यामि यथा मां वक्ष्यते भवान् १३
कृष्ण उवाच
इदानीं पार्थ जानामि न वृद्धाः सेवितास्त्वया
अकाले पुरुषव्याघ्र संरम्भक्रिययानया
न हि धर्मविभागज्ञः कुर्यादेवं धनंजय १४
अकार्याणां च कार्याणां संयोगं यः करोति वै
कार्याणामक्रियाणां च स पार्थ पुरुषाधमः १५
अनुसृत्य तु ये धर्मं कवयः समुपस्थिताः
समासविस्तारविदां न तेषां वेत्थ निश्चयम् १६
अनिश्चयज्ञो हि नरः कार्याकार्यविनिश्चये
अवशो मुह्यते पार्थ यथा त्वं मूढ एव तु १७
न हि कार्यमकार्यं वा सुखंज्ञातुं कथंचन
श्रुतेन ज्ञायते सर्वं तच्च त्वं नावबुध्यसे १८
अविज्ञानाद्भवान्यच्च धर्मं रक्षति धर्मवित्
प्राणिनां हि वधं पार्थ धार्मिको नावबुध्यते १९

प्राणिनामवधस्तात सर्वज्यायान्मतो मम
अनृतं तु भवेद्वाच्यं न च हिंस्यात्कथंचन २०
स कथं भ्रातरं ज्येष्ठं राजानं धर्मकोविदम्
हन्याद्भवान्नरश्रेष्ठ प्राकृतोऽन्य पुमानिव २१
अयुध्यमानस्य वधस्तथाशस्त्रस्य भारत
पराङ्मुखस्य द्रवतः शरणं वाभिगच्छतः
कृताञ्जलेः प्रपन्नस्य न वधः पूज्यते बुधैः २२
त्वया चैव व्रतं पार्थ बालेनैव कृतं पुरा
तस्मादधर्मसंयुक्तं मौढ्यात्कर्म व्यवस्यसि २३
स गुरुं पार्थ कस्मात्त्वं हन्या धर्ममनुस्मरन्
असंप्रधार्य धर्माणां गतिं सूक्ष्मां दुरन्वयाम् २४
इदं धर्मरहस्यं च वक्ष्यामि भरतर्षभ
यद्ब्रूयात्तव भीष्मो वा धर्मज्ञो वा युधिष्ठिरः २५
विदुरो वा तथा क्षत्ता कुन्ती वापि यशस्विनी
तत्ते वक्ष्यामि तत्त्वेन तन्निबोध धनंजय २६
सत्यस्य वचनं साधु न सत्याद्विद्यते परम्
तत्त्वेनैतत्सुदुर्ज्ञेयं यस्य सत्यमनुष्ठितम् २७
भवेत्सत्यमवक्तव्यं वक्तव्यमनृतं भवेत्
सर्वस्वस्यापहारे तु वक्तव्यमनृतं भवेत् २८
प्राणात्यये विवाहे च वक्तव्यमनृतंभवेत्
यत्रानृतं भवेत्सत्यं सत्यं चाप्यनृतंभवेत् २९
तादृशं पश्यते बालो यस्य सत्यमनुष्ठितम्
सत्यानृते विनिश्चित्य ततो भवति धर्मवित् ३०
किमाश्चर्यं कृतप्रज्ञः पुरुषोऽपि सुदारुणः
सुमहत्प्राप्नुयात्पुण्यं बलाकोऽन्धवधादिव ३१
किमाश्चर्यं पुनर्मूढो धर्मकामोऽप्यपण्डितः
सुमहत्प्राप्नुयात्पापमापगामिव कौशिकः ३२
अर्जुन उवाच
आचक्ष्व भगवन्नेतद्यथा विद्यामहं तथा
बलाकान्धाभिसंबद्धं नदीनां कौशिकस्य च ३३

कृष्ण उवाच
मृगव्याधोऽभवत्कश्चिद्बलाको नाम भारत
यात्रार्थं पुत्रदारस्य मृगान्हन्ति न कामतः ३४
सोऽन्धौ च मातापितरौ बिभर्त्यन्यांश्च संश्रितान्
स्वधर्मनिरतो नित्यं सत्यवागनसूयकः ३५
स कदाचिन्मृगाँल्लिप्सुर्नान्वविन्दत्प्रयत्नवान्
अथापश्यत्स पीतोदं श्वापदं घ्राणचक्षुषम् ३६
अदृष्टपूर्वमपि तत्सत्त्वं तेन हतं तदा
अन्वेव च ततो व्योम्नः पुष्पवर्षमवापतत् ३७
अप्सरोगीतवादित्रैर्नादितं च मनोरमम्
विमानमागमत्स्वर्गान्मृगव्याधनिनीषया ३८
तद्भूतं सर्वभूतानामभावाय किलार्जुन
तपस्तप्त्वा वरं प्राप्तं कृतमन्धं स्वयंभुवा ३९
तद्धत्वा सर्वभूतानामभावकृतनिश्चयम्
ततो बलाकः स्वरगादेवं धर्मः सुदुर्विदः ४०
कौशिकोऽप्यभवद्विप्रस्तपस्वी न बहुश्रुतः
नदीनां संगमे ग्रामाददूरे स किलावसत् ४१
सत्यं मया सदा वाच्यमिति तस्याभवद्व्रतम्
सत्यवादीति विख्यातः स तदासीद्धनंजय ४२
अथ दस्युभयात्केचित्तदा तद्वनमाविशन्
दस्यवोऽपि गताः क्रूरा व्यमार्गन्त प्रयत्नतः ४३
अथ कौशिकमभ्येत्य प्राहुस्तं सत्यवादिनम्
कतमेन यथा याता भगवन्बहवो जनाः
सत्येन पृष्टः प्रब्रूहि यदि तान्वेत्थ शंस नः ४४
स पृष्टः कौशिकः सत्यं वचनं तानुवाच ह
बहुवृक्षलतागुल्ममेतद्वनमुपाश्रिताः
ततस्ते तान्समासाद्य क्रूरा जघ्नुरिति श्रुतिः ४५
तेनाधर्मेण महता वाग्दुरुक्तेन कौशिकः
गतः सुकष्टं नरकं सूक्ष्मधर्मेष्वकोविदः
अप्रभूतश्रुतो मूढो धर्माणामविभागवित् ४६

वृद्धानपृष्ट्वा संदेहं महच्छ्वभ्रमितोऽहति
तत्र ते लक्षणोद्देशः कश्चिदेव भविष्यति ४७
दुष्करं परमज्ञानं तर्केणात्र व्यवस्यति
श्रुतिर्धर्म इति ह्येके वदन्ति बहवो जनाः ४८
न त्वेतत्प्रतिसूयामि न हि सर्वं विधीयते
प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम् ४९
धारणाद्धर्ममित्याहुर्धर्मो धारयति प्रजाः
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ५०
येऽन्यायेन जिहीर्षन्तो जना इच्छन्ति कर्हिचित्
अकूजनेन चेन्मोक्षो नात्र कूजेत्कथंचन ५१
अवश्यं कूजितव्यं वा शङ्केरन्वाप्यकूजतः
श्रेयस्तत्रानृतं वक्तुं सत्यादिति विचारितम् ५२
प्राणात्यये विवाहे वा सर्वज्ञातिधनक्षये
नर्मण्यभिप्रवृत्ते वा प्रवक्तव्यं मृषा भवेत्
अधर्मं नात्र पश्यन्ति धर्मतत्त्वार्थदर्शिनः ५३
यः स्तेनैः सह संबन्धान्मुच्यते शपथैरपि
श्रेयस्तत्रानृतं वक्तुं तत्सत्यमविचारितम् ५४
न च तेभ्यो धनं देयं शक्ये सति कथंचन
पापेभ्यो हि धनं दत्तं दातारमपि पीडयेत्
तस्माद्धर्मार्थमनृतमुक्त्वा नानृतवाग्भवेत् ५५
एष ते लक्षणोद्देशः समुद्दिष्टो यथाविधि
एतच्छ्रुत्वा ब्रूहि पार्थ यदि वध्यो युधिष्ठिरः ५६
अर्जुन उवाच
यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयान्महामतिः
हितं चैव यथास्माकं तथैतद्वचनं तव ५७
भवान्मातृसमोऽस्माकं तथा पितृसमोऽपि च
गतिश्च परमा कृष्ण तेन ते वाक्यमद्भुतम् ५८
न हि ते त्रिषु लोकेषु विद्यतेऽविदितं क्वचित्
तस्माद्भवान्परं धर्मं वेद सर्वं यथातथम् ५९
अवध्यं पाण्डवं मन्ये धर्मराजं युधिष्ठिरम्

तस्मिन्समयसंयोगे ब्रूहि किंचिदनुग्रहम्
इदं चापरमत्रैव शृणु हृत्स्थं विवक्षितम् ६०
जानासि दाशार्ह मम व्रतं त्वं यो मां ब्रूयात्कश्चन मानुषेषु
अन्यस्मै त्वं गाण्डिवं देहि पार्थ यस्त्वत्तोऽस्त्रैर्भविता वा विशिष्टः ६१
हन्यामहं केशव तं प्रसह्य भीमो हन्यात्तूबरकेति चोक्तः
तन्मे राजा प्रोक्तवांस्ते समक्षं धनुर्देहीत्यसकृद्वृष्णिसिंह ६२
तं हत्वा चेत्केशव जीवलोके स्थाता कालंनाहमप्यल्पमात्रम्
सा च प्रतिज्ञा मम लोकप्रबुद्धा भवेत्सत्या धर्मभृतां वरिष्ठ
यथा जीवेत्पाण्डवोऽहं च कृष्ण तथा बुद्धिं दातुमद्यार्हसि त्वम् ६३
वासुदेव उवाच
राजा श्रान्तो जगतो विक्षतश्च कर्णेन संख्ये निशितैर्बाणसंघैः
तस्मात्पार्थ त्वां परुषाण्यवोचत्कर्णे द्यूतं ह्यद्य रणे निबद्धम् ६४
तस्मिन्हते कुरवो निर्जिताः स्युरेवंबुद्धिः पार्थिवे धर्मपुत्रः
यदावमानं लभते महान्तं तदा जीवन्मृत इत्युच्यते सः ६५
तन्मानितः पार्थिवोऽय सदैव त्वया सभीमेन तथा यमाभ्याम्
वृद्धैश्च लोके पुरुषप्रवीरैस्तस्यावमानं कलया त्वं प्रयुङ्क्ष्व ६६
त्वमित्यत्रभवन्तं त्वं ब्रूहि पार्थ युधिष्ठिरम्
त्वमित्युक्तो हि निहतो गुरुर्भवति भारत ६७
एवमाचर कौन्तेय धर्मराजे युधिष्ठिरे
अधर्मयुक्तं संयोगं कुरुष्वैवं कुरूद्वह ६८
अथर्वाङ्गिरसी ह्येषा श्रुतीनामुत्तमा श्रुतिः
अविचार्यैव कार्यैषा श्रेयःकामैर्नरैः सदा ६९
वधो ह्ययं पाण्डव धर्मराज्ञस्त्वत्तो युक्तो वेत्स्यते चैवमेषः
ततोऽस्य पादावभिवाद्य पश्चाच्छमं ब्रूयाः सान्त्वपूर्वं च पार्थम् ७०
भ्राता प्राज्ञस्तव कोपं न जातु कुर्याद्राजा कंचन पाण्डवेयः
मुक्तोऽनृताद्भ्रातृवधाच्च पार्थ हृष्टः कर्णं त्वं जहि सूतपुत्रम् ७१
सञ्जय उवाच
इत्येवमुक्तस्तु जनार्दनेन पार्थः प्रशस्याथ सुहृद्वधं तम्
ततोऽब्रवीदर्जुनो धर्मराजमनुक्त पूर्वं पुरुषं प्रसह्य ७२
मा त्वं राजन्व्याहर व्याहरत्सु न तिष्ठसे क्रोशमात्रे रणार्धे

भीमस्तु मामर्हति गर्हणाय यो युध्यते सर्वयोधप्रवीरः ७३
काले हि शत्रून्प्रतिपीड्य संख्ये हत्वा च शूरान्पृथिवीपतींस्तान्
यः कुञ्जराणामधिकं सहस्रं हत्वानदत्तुमुलं सिंहनादम् ७४
सुदुष्करं कर्म करोति वीरः कर्तुं यथा नार्हसि त्वं कदाचित्
रथादवप्लुत्य गदां परामृशंस्तया निहन्त्यश्वनरद्विपान्रणे ७५
वरासिना वाजिरथाश्वकुञ्जरांस्तथा रथाङ्गैर्धनुषा च हन्त्यरीन्
प्रमृद्य पद्भ्यामहितान्निहन्ति यः पुनश्च दोर्भ्यां शतमन्युविक्रमः ७६
महाबलो वैश्रवणान्तकोपमः प्रसह्य हन्ता द्विषतां यथार्हम्
स भीमसेनोऽर्हति गर्हणां मे न त्वं नित्यं रक्ष्यसे यः सुहृद्भिः ७७
महारथान्नागरान्हयांश्च पदातिमुख्यानपि च प्रमथ्य
एको भीमो धार्तराष्ट्रेषु मग्नः स मामुपालब्धुमरिंदमोऽर्हति ७८
कलिङ्गवङ्गाङ्गनिषादमागधान्सदामदान्नीलबलाहकोपमान्
निहन्ति यः शत्रुगणाननेकशः स माभिवक्तुं प्रभवत्यनागसम् ७९
सुयुक्तमास्थाय रथं हि काले धनुर्विकर्षञ्शरपूर्णमुष्टिः
सृजत्यसौ शरवर्षाणि वीरो महाहवे मेघ इवाम्बुधाराः ८०
बलं तु वाचि द्विजसत्तमानां क्षात्रं बुधा बाहुबलं वदन्ति
त्वं वाग्बलो भारत निष्ठुरश्च त्वमेव मां वेत्सि यथाविधोऽहम् ८१
यतामि नित्यं तव कर्तुमिष्टं दारैः सुतैर्जीवितेनात्मना च
एवं च मां वाग्विशिखैर्निहंसि त्वत्तः सुखं न वयं विद्म किञ्चित् ८२
अवामंस्था मां द्रौपदीतल्पसंस्थो महारथान्प्रतिहन्मि त्वदर्थे
तेनातिशङ्की भारत निष्ठुरोऽसि त्वत्तः सुखं नाभिजानामि किञ्चित् ८३
प्रोक्तःस्वयं सत्यसंधेन मृत्युस्तव प्रियार्थं नरदेव युद्धे
वीरः शिखण्डी द्रौपदोऽसौ महात्मा मयाभिगुप्तेन हतश्च तेन ८४
न चाभिनन्दामि तवाधिराज्यं यतस्त्वमक्षेष्वहिताय सक्तः
स्वयं कृत्वा पापमनार्यजुष्टमेभिर्युद्धे तर्तुमिच्छस्यरींस्तु ८५
अक्षेषु दोषा बहवो विधर्माः श्रुतास्त्वया सहदेवोऽब्रवीद्यान्
तान्नैषि संतर्तुमसाधुजुष्टान्येन स्म सर्वे निरयं प्रपन्नाः ८६
त्वं देविता त्वत्कृते राज्यनाशस्त्वत्संभवं व्यसनं नो नरेन्द्र
मास्मान्क्रूरैर्वाक्प्रतोदैस्तुद त्वं भूयो राजन्कोपयन्नल्पभाग्यान् ८७
एता वाचः परुषाः सव्यसाची स्थिरप्रज्ञं श्रावयित्वा ततक्ष

तदानुतेपे सुरराजपुत्रो विनिःश्वसंश्चाप्यसिमुद्बबर्ह ८८
तमाह कृष्णः किमिदं पुनर्भवान्विकोशमाकाशनिभं करोत्यसिम्
प्रब्रूहि सत्यं पुनरुत्तरं विधेर्वचः प्रवक्ष्याम्यहमर्थसिद्धये ८९
इत्येव पृष्टः पुरुषोत्तमेन सुदुःखितः केशवमाह वाक्यम्
अहं हनिष्ये स्वशरीरमेव प्रसह्य येनाहितमाचरं वै ९०
निशम्य तत्पार्थवचोऽब्रवीदिदं धनंजयं धर्मभृतां वरिष्ठः
प्रब्रूहि पार्थ स्वगुणानिहात्मनस्तथा स्वहार्दं भवतीह सद्यः ९१
तथास्तु कृष्णेत्यभिनन्द्य वाक्यं धनंजयः प्राह धनुर्विनाम्य
युधिष्ठिरं धर्मभृतां वरिष्ठं शृणुष्व राजन्निति शक्रसूनुः ९२
न मादृशोऽन्यो नरदेव विद्यते धनुर्धरो देवमृते पिनाकिनम्
अहं हि तेनानुमतो महात्मना क्षणेन हन्यां सचराचरं जगत् ९३
मया हि राजन्सदिगीश्वरा दिशो विजित्य सर्वा भवतः कृता वशे
स राजसूयश्च समाप्तदक्षिणः सभा च दिव्या भवतो ममौजसा ९४
पाणौ पृषत्का लिखिता ममेमे धनुश्च संख्ये विततं सबाणम्
पादौ च मे सशरौ सहध्वजौ न मादृशं युद्धगतं जयन्ति ९५
हता उदीच्या निहताः प्रतीच्याः प्राच्या निरस्ता दाक्षिणात्या विशस्ताः
संशप्तकानां किञ्चिदेवावशिष्टं सर्वस्य सैन्यस्य हतं मयार्धम् ९६
शेते मया निहता भारती च चमू राजन्देवचमूप्रकाशा
ये नास्त्रज्ञास्तानहं हन्मि शस्त्रैस्तस्माल्लोकं नेह करोमि भस्मसात् ९७
इत्येवमुक्त्वा पुनराह पार्थो युधिष्ठिरं धर्मभृतां वरिष्ठम्
अद्यापुत्रा तेन राधा भवित्री कुन्ती मया वा तदृतं विद्धि राजन्
प्रसीद राजन्क्षम यन्मयोक्तं काले भवान्वेत्स्यति तन्नमस्ते ९८
प्रसाद्य राजानममित्रसाहं स्थितोऽब्रवीच्चैनमभिप्रपन्नः
याम्येष भीमं समरात्प्रमोक्तुं सर्वात्मना सूतपुत्रं च हन्तुम् ९९
तव प्रियार्थं मम जीवितं हि ब्रवीमि सत्यं तदवेहि राजन्
इति प्रायादुपसंगृह्य पादौ समुत्थितो दीप्ततेजाः किरीटी
नेदं चिरात्क्षिप्रमिदं भविष्यत्यावर्ततेऽसावभियामि चैनम् १००
एतच्छ्रुत्वा पाण्डवो धर्मराजो भ्रातुर्वाक्यं परुषं फल्गुनस्य
उत्थाय तस्माच्छयनादुवाच पार्थं ततो दुःखपरीतचेताः १०१
कृतं मया पार्थ यथा न साधु येन प्राप्तं व्यसनं वः सुघोरम्

तस्माच्छिरश्छिन्द्धि ममेदमद्य कुलान्तकस्याधमपूरुषस्य १०२
पापस्य पापव्यसनान्वितस्य विमूढबुद्धेरलसस्य भीरोः
वृद्धावमन्तुः परुषस्य चैव किं ते चिरं मामनुवृत्य रूक्षम् १०३
गच्छाम्यहं वनमेवाद्य पापः सुखं भवान्वर्ततां मद्विहीनः
योग्यो राजा भीमसेनो महात्मा क्लीबस्य वा मम किं राज्यकृत्यम् १०४
न चास्मि शक्तः परुषाणि सोढुं पुनस्तवेमानि रुषान्वितस्य
भीमोऽस्तु राजा मम जीवितेन किं कार्यमद्यावमतस्य वीर १०५
इत्येवमुक्त्वा सहसोत्पपात राजा ततस्तच्छयनं विहाय
इयेष निर्गन्तुमथो वनाय तं वासुदेवः प्रणतोऽभ्युवाच १०६
राजन्विदितमेतत्ते यथा गाण्डीवधन्वनः
प्रतिज्ञा सत्यसंधस्य गाण्डीवं प्रति विश्रुता १०७
ब्रूयाद्य एवं गाण्डीवं देह्यन्यस्मै त्वमित्युत
स वध्योऽस्य पुमाँल्लोके त्वया चोक्तोऽयमीदृशम् १०८
अतः सत्यां प्रतिज्ञां तां पार्थेन परिरक्षता
मच्छन्दादवमानोऽय कृतस्तव महीपते
गुरूणामवमानो हि वध इत्यभिधीयते १०९
तस्मात्त्वं वै महाबाहो मम पार्थस्य चोभयोः
व्यतिक्रममिमं राजन् संक्षमस्वार्जुनं प्रति ११०
शरणं त्वां महाराज प्रपन्नौ स्व उभावपि
क्षन्तुमर्हसि मे राजन्प्रणतस्याभियाचतः १११
राधेयस्याद्य पापस्य भूमिः पास्यति शोणितम्
सत्यं ते प्रतिजानामि हतं विद्ध्यद्य सूतजम्
यस्येच्छसि वधंतस्य गतमेवाद्य जीवितम् ११२
इति कृष्णवचः श्रुत्वा धर्मराजो युधिष्ठिरः
ससंभ्रमं हृषीकेशमुत्थाप्य प्रणतं तदा
कृताञ्जलिमिदं वाक्यमुवाचानन्तरं वचः ११३
एवमेतद्यथात्थ त्वमस्त्येषोऽतिक्रमो मम
अनुनीतोऽस्मि गोविन्द तारितश्चाद्य माधव
मोक्षिता व्यसनाद्घोराद्वयमद्य त्वयाच्युत ११४
भवन्तं नाथमासाद्य आवां व्यसनसागरात्

घोरादद्य समुत्तीर्णावुभावज्ञानमोहितौ ११५
त्वद्बुद्धिप्लवमासाद्य दुःखशोकार्णवाद्वयम्
समुत्तीर्णाः सहामात्याः सनाथाः स्म त्वयाच्युत ११६
इति श्रीमहाभारते कर्णपर्वणि एकोनपञ्चाशोऽध्यायः ८९

पञ्चाशोऽध्यायः

सञ्जय उवाच
इति स्म कृष्णवचनात्प्रत्युच्चार्य युधिष्ठिरम्
बभूव विमनाः पार्थः किंचित्कृत्वेव पातकम् १
ततोऽब्रवीद्वासुदेवः प्रहसन्निव पाण्डवम्
कथं नाम भवेदेतद्यदि त्वं पार्थ धर्मजम्
असिना तीक्ष्णधारेण हन्या धर्मे व्यवस्थितम् २
त्वमित्युक्त्वैव राजानमेवं कश्मलमाविशः
हत्वा तु नृपतिं पार्थ अकरिष्यः किमुत्तरम्
एवं सुदुर्विदो धर्मो मन्दप्रज्ञैर्विशेषतः ३
स भवान्धर्मभीरुत्वाद्ध्रुवमैष्यन्महत्तमः
नरकं घोररूपं च भ्रातुर्ज्येष्ठस्य वै वधात् ४
स त्वं धर्मभृतां श्रेष्ठं राजानं धर्मसंहितम्
प्रसादय कुरुश्रेष्ठमेतदत्र मतं मम ५
प्रसाद्य भक्त्या राजानं प्रीतं चैव युधिष्ठिरम्
प्रयामस्त्वरिता योद्धुं सूतपुत्ररथं प्रति ६
हत्वा सुदुर्जयं कर्णं त्वमद्य निशितैः शरैः
विपुलां प्रीतिमाधत्स्व धर्मपुत्रस्य मानद ७
एतदत्र महाबाहो प्राप्तकालं मतं मम
एवंकृते कृतंचैव तवकार्यं भविष्यति ८
ततोऽजुनो महाराज लज्जया वै समन्वितः
धर्मराजस्य चरणौ प्रपेदे शिरसानघ ९
उवाच भरतश्रेष्ठ प्रसीदेति पुनः पुनः
क्षमस्व राजन्यत्प्रोक्तं धर्मकामेन भीरुणा १०
पादयोः पतितं दृष्ट्वा धर्मराजो युधिष्ठिरः

धनंजयममित्रघ्नं रुदन्तं भरतर्षभ ११
उत्थाप्य भ्रातरं राजा धर्मराजो धनंजयम्
समाश्लिष्य च सस्नेहं प्ररुरोद महीपतिः १२
रुदित्वा तु चिरं कालं भ्रातरौ सुमहाद्युती
कृतशौचौ नरव्याघ्रौ प्रीतिमन्तौ बभूवतुः १३
तत आश्लिष्य स प्रेम्णा मूर्ध्नि चाघ्राय पाण्डवम्
प्रीत्या परमया युक्तः प्रस्मयंश्चाब्रवीज्जयम् १४
कर्णेन मे महाबाहो सर्वसैन्यस्य पश्यतः
कवचं च ध्वजश्चैव धनुः शक्तिर्हया गदा
शरैः कृत्ता महेष्वास यतमानस्य संयुगे १५
सोऽह ज्ञात्वा रणे तस्य कर्म दृष्ट्वा च फल्गुन
व्यवसीदामि दुःखेन न च मे जीवितं प्रियम् १६
तमद्य यदि वै वीर न हनिष्यसि सूतजम्
प्राणानेव परित्यक्ष्ये जीवितार्थो हि को मम १७
एवमुक्तः प्रत्युवाच विजयो भरतर्षभ
सत्येन ते शपे राजन्प्रसादेन तवैव च
भीमेन च नरश्रेष्ठ यमाभ्यां च महीपते १८
यथाद्य समरे कर्णं हनिष्यामि हतोऽथ वा
महीतले पतिष्यामि सत्येनायुधमालभे १९
एवमाभाष्य राजानमब्रवीन्माधवं वचः
अद्य कर्णं रणे कृष्ण सूदयिष्ये न संशयः
तदनुध्याहि भद्रं ते वधं तस्य दुरात्मनः २०
एवमुक्तोऽब्रवीत्पार्थं केशवो राजसत्तम
शक्तोऽस्मि भरतश्रेष्ठ यत्नं कर्तुं यथाबलम् २१
एवं चापि हि मे कामो नित्यमेव महारथ
कथं भवान्रणे कर्णं निहन्यादिति मे मतिः २२
भूयश्चोवाच मतिमान्माधवो धर्मनन्दनम्
युधिष्ठिरेमं बीभत्सुं त्वं सान्त्वयितुमर्हसि
अनुज्ञातुं च कर्णस्य वधायाद्य दुरात्मनः २३
श्रुत्वा ह्ययमहं चैव त्वां कर्णशरपीडितम्

प्रवृत्तिं ज्ञातुमायातावविह पाण्डवनन्दन २४
दिष्ट्यासि राजन्निरुजो दिष्ट्या न ग्रहणं गतः
परिसान्त्वय बीभत्सुं जयमाशाधि चानघ २५
युधिष्ठिर उवाच
एह्येहि पार्थ बीभत्सो मां परिष्वज पाण्डव
वक्तव्यमुक्तोऽस्म्यहितं त्वया क्षान्तं च तन्मया २६
अहं त्वामनुजानामि जहि कर्णं धनंजय
मन्युं च मा कृथाः पार्थ यन्मयोक्तोऽसि दारुणम् २७
सञ्जय उवाच
ततो धनंजयो राजञ्शिरसा प्रणतस्तदा
पादौ जग्राह पाणिभ्यां भ्रातुर्ज्येष्ठस्य मारिष २८
समुत्थाप्य ततो राजा परिष्वज्य च पीडितम्
मूर्ध्न्युपाघ्राय चैवेनमिदं पुनरुवाच ह २९
धनंजय महाबाहो मानितोऽस्मि दृढं त्वया
माहात्म्यं विजयं चैव भूयः प्राप्नुहि शाश्वतम् ३०
अर्जुन उवाच
अद्य तं पापकर्माणं सानुबन्धं रणे शरैः
नयाम्यन्तं समासाद्य राधेयं बलगर्वितम् ३१
येन त्वं पीडितो बाणैर्दृढमायम्य कार्मुकम्
तस्याद्य कर्मणः कर्णः फलं प्राप्स्यति दारुणम् ३२
अद्य त्वामहमेष्यामि कर्णं हत्वा महीपते
सभाजयितुमाक्रन्दादिति सत्यं ब्रवीमि ते ३३
नाहत्वा विनिवर्तेऽहं कर्णमद्य रणाजिरात्
इति सत्येन ते पादौ स्पृशामि जगतीपते ३४
सञ्जय उवाच
प्रसाद्य धर्मराजानं प्रहृष्टेनान्तरात्मना
पार्थः प्रोवाच गोविन्दं सूतपुत्रवधोद्यतः ३५
कल्प्यतां च रथो भूयो युज्यन्तां च हयोत्तमाः
आयुधानि च सर्वाणि सज्ज्यन्तां वै महारथे ३६
उपावृत्ताश्च तुरगाः शिक्षिताश्चाश्वसादिनः

रथोपकरणैः सर्वैरुपायान्तु त्वरान्विताः ३७
एवमुक्ते महाराज फल्गुनेन महात्मना
उवाच दारुकं कृष्णः कुरु सर्वं यथाब्रवीत्
अर्जुनो भरतश्रेष्ठः श्रेष्ठःसर्वधनुष्मताम् ३८
आज्ञप्तस्त्वथ कृष्णेन दारुको राजसत्तम
योजयामास स रथं वैयाघ्रं शत्रुतापनम् ३९
युक्तं तु रथमास्थाय दारुकेण महात्मना
आपृच्छ्य धर्मराजानं ब्राह्मणान्स्वस्ति वाच्य च
समङ्गलस्वस्त्ययनमारुरोह रथोत्तमम् ४०
तस्य राजा महाप्राज्ञो धर्मराजो युधिष्ठिरः
आशिषोऽयुङ्क्त परमा युक्ताः कर्णवधं प्रति ४१
तं प्रयान्तं महेष्वासं दृष्ट्वा भूतानि भारत
निहतं मेनिरे कर्णं पाण्डवेन महात्मना ४२
बभूवुर्विमलाः सर्वा दिशो राजन्समन्ततः
चाषाश्च शतपत्राश्च क्रौञ्चाश्चैव जनेश्वर
प्रदक्षिणमकुर्वन्त तदा वै पाण्डुनन्दनम् ४३
बहवः पक्षिणो राजन्पुंनामानः शुभाः शिवाः
त्वरयन्तोऽजुनं युद्धे हृष्टरूपा ववाशिरे ४४
कङ्का गृध्रा वडाश्चैव वायसाश्च विशां पते
अग्रतस्तस्य गच्छन्ति भक्ष्यहेतोर्भयानकाः ४५
निमित्तानि च धन्यानि पार्थस्य प्रशशंसिरे
विनाशमरिसैन्यानां कर्णस्य च वधं तथा ४६
प्रयातस्याथ पार्थस्य महान्स्वेदो व्यजायत
चिन्ता च विपुला यज्ञे कथं न्वेतद्भविष्यति ४७
ततो गाण्डीवधन्वानमब्रवीन्मधुसूदनः
दृष्ट्वा पार्थं तदायस्तं चिन्तापरिगतं तदा ४८
गाण्डीवधन्वन्संग्रामे ये त्वया धनुषा जिताः
न तेषां मानुषो जेता त्वदन्य इह विद्यते ४९
दृष्टा हि बहवः शूराः शक्रतुल्यपराक्रमाः
त्वां प्राप्य समरे वीरं ते गताः परमां गतिम् ५०

को हि द्रोणं च भीष्मं च भगदत्तं च मारिष
विन्दानुविन्दावावन्त्यौ काम्बोजं च सुदक्षिणम् ५१
श्रुतायुषं महावीर्यमच्युतायुषमेव च
प्रत्युद्गम्य भवेत्क्षेमी यो न स्यात्त्वमिव क्षमी ५२
तव ह्यस्त्राणि दिव्यानि लाघवं बलमेव च
वेधः पातश्च लक्षश्च योगश्चैव तवार्जुन
असंमोहश्च युद्धेषु विज्ञानस्य च संनतिः ५३
भवान्देवासुरान्सर्वान्हन्यात्सहचराचरान्
पृथिव्यां हि रणे पार्थ न योद्धा त्वत्समः पुमान् ५४
धनुर्ग्रहा हि ये केचित्क्षत्रिया युद्धदुर्मदाः
आ देवात्त्वत्समं तेषां न पश्यामि शृणोमि वा ५५
ब्रह्मणा च प्रजाः सृष्टा गाण्डीवं च महाद्भुतम्
येन त्वं युध्यसे पार्थ तस्मान्नास्ति त्वया समः ५६
अवश्यं तु मया वाच्यं यत्पथ्यं तव पाण्डव
मावमंस्था महाबाहो कर्णमाहवशोभिनम् ५७
कर्णो हि बलवान्धृष्टः कृतास्त्रश्च महारथः
कृती च चित्रयोधी च देशे काले च कोविदः ५८
तेजसा वह्निसदृशो वायुवेगसमो जवे
अन्तकप्रतिमः क्रोधे सिंहसंहननो बली ५९
अयोरत्निर्महाबाहुर्व्यूढोरस्कः सुदुर्जयः
अतिमानी च शूरश्च प्रवीरः प्रियदर्शनः ६०
सर्वैर्योधगुणैर्युक्तो मित्राणामभयंकरः
सततं पाण्डवद्वेषी धार्तराष्ट्रहिते रतः ६१
सर्वैरवध्यो राधेयो देवैरपि सवासवैः
ऋते त्वामिति मे बुद्धिस्त्वमद्य जहि सूतजम् ६२
देवैरपि हि संयत्तैर्बिभ्रद्भिर्मांसशोणितम्
अशक्यः समरे जेतुं सर्वैरपि युयुत्सुभिः ६३
दुरात्मानं पापमतिं नृशंसं दुष्टप्रज्ञं पाण्डवेयेषु नित्यम्
हीनस्वार्थं पाण्डवेयैर्विरोधे हत्वा कर्णं धिष्ठितार्थो भवाद्य ६४
वीरं मन्यत आत्मानं येन पापः सुयोधनः

तमद्य मूलं पापानां जय सौतिं धनंजय ६५
इति श्रीमहाभारते कर्णपर्वणि पञ्चाशत्तमोऽध्यायः ५०

एक पञ्चाशोऽध्यायः

सञ्जय उवाच
ततः पुनरमेयात्मा केशवोऽजुनमब्रवीत्
कृतसंकल्पमायस्तं वधे कर्णस्य सर्वशः १
अद्य सप्तदशाहानि वर्तमानस्य भारत
विनाशस्यातिघोरस्य नरवारणवाजिनाम् २
भूत्वा हि विपुला सेना तावकानां परैः सह
अन्योन्यं समरे प्राप्य किंचिच्छेषा विशां पते ३
भूत्वा हि कौरवाः पार्थ प्रभूतगजवाजिनः
त्वां वै शत्रुं समासाद्य विनष्टा रणमूर्धनि ४
एते च सर्वे पञ्चालाः सृञ्जयाश्च सहान्वयाः
त्वां समासाद्य दुर्धर्षं पाण्डवाश्च व्यवस्थिताः ५
पाञ्चालैः पाण्डवैर्मत्स्यैः कारूषैश्चेदि केकयैः
त्वयागुप्तैरमित्रघ्न कृतः शत्रुगणक्षयः ६
को हि शक्तो रणे जेतुं कौरवांस्तात संगतान्
अन्यत्र पाण्डवान्युद्धे त्वया गुप्तान्महारथान् ७
त्वं हि शक्तो रणे जेतुं ससुरासुरमानुषान्
त्रीँल्लोकान्सममुद्युक्तान्किं पुनः कौरवं बलम् ८
भगदत्तं हि राजानं कोऽन्य शक्तस्त्वया विना
जेतुं पुरुषशार्दूल योऽपि स्याद्वासवोपमः ९
तथेमां विपुलां सेनां गुप्तां पार्थ त्वयानघ
न शेकुः पार्थिवाः सर्वे चक्षुर्भिरभिवीक्षितुम् १०
तथैव सततं पार्थ रक्षिताभ्यां त्वया रणे
धृष्टद्युम्नशिखण्डिभ्यां भीष्मद्रोणौ निपातितौ ११
को हि शक्तो रणे पार्थ पाञ्चालानां महारथौ
भीष्मद्रोणौ युधा जेतुं शक्रतुल्यपराक्रमौ १२
को हि शांतनवं संख्ये द्रोणं वैकर्तनं कृपम्

द्रौणिं च सौमदत्तिं च कृतवर्माणमेव च
सैन्धवं मद्रराजं च राजानं च सुयोधनम् १३
वीरान्कृतास्त्रान्समरे सर्वानेवानुवर्तिनः
अक्षौहिणीपतीनुग्रान्संरब्धान्युद्धदुर्मदान् १४
श्रेण्यश्च बहुलाः क्षीणाः प्रदीर्णाश्वरथद्विपाः
नानाजनपदाश्चोग्राः क्षत्रियाणाममर्षिणाम् १५
गोवासदासमीयानां वसातीनां च भारत
व्रात्यानां वाटधानानां भोजानां चापि मानिनाम् १६
उदीर्णाश्च महासेना ब्रह्मक्षत्रस्य भारत
त्वां समासाद्य निधनं गताः साश्वरथद्विपाः १७
उग्राश्च क्रूरकर्माणस्तुखारा यवनाः खशाः
दार्वाभिसारा दरदाः शंका रमठतङ्गणाः १८
अन्ध्रकाश्च पुलिन्दाश्च किराताश्चोग्रविक्रमाः
म्लेच्छाश्च पार्वतीयाश्च सागरानूपवासिनः
संरम्भिणो युद्धशौण्डा बलिनो दृब्धपाणयः १९
एते सुयोधनस्यार्थे संरब्धाः कुरुभिः सह
न शक्या युधि निर्जेतुं त्वदन्येन परंतप २०
धार्तराष्ट्रमुदग्रं हि व्यूढं दृष्ट्वा महाबलम्
यस्य त्वं न भवेस्त्राता प्रतीयात्को नु मानवः २१
तत्सागरमिवोद्धूतं रजसा संवृतं बलम्
विदार्य पाण्डवैः क्रुद्धैस्त्वया गुप्तैर्हतं विभो २२
मागधानामधिपतिर्जयत्सेनो महाबलः
अद्य सप्तैव चाहानि हतः संख्येऽभिमन्युना २३
ततो दश सहस्राणि गजानां भीमकर्मणाम्
जघान गदया भीमस्तस्य राज्ञः परिच्छदम्
ततोऽन्येऽपि हता नागा रथाश्च शतशो बलात् २४
तदेवं समरे तात वर्तमाने महाभये
भीमसेनं समासाद्य त्वां च पाण्डव कौरवाः
सवाजिरथनागाश्च मृत्युलोकमितो गताः २५
तथा सेनामुखे तत्र निहते पार्थ पाण्डवैः

भीष्मः प्रासृजदुग्राणि शरवर्षाणि मारिष २६
स चेदिकाशिपाञ्चालान्करूषान्मत्स्यकेकयान्
शरैः प्रच्छाद्य निधनमनयत्पुरुषास्त्रवित् २७
तस्य चापच्युतैर्बाणैः परदेहविदारणैः
पूर्णमाकाशमभवद्रुक्मपुङ्खैरजिह्मगैः २८
गत्या दशम्या ते गत्वा जघ्नुर्वाजिरथद्विपान्
हित्वा नव गतीर्दुष्टाः स बाणान्व्यायतोऽमुचत् २९
दिनानि दश भीष्मेण निघ्नता तावकं बलम्
शून्याः कृता रथोपस्था हताश्च गजवाजिनः ३०
दर्शयित्वात्मनो रूपं रुद्रोपेन्द्रसमं युधि
पाण्डवानामनीकानि प्रविगाह्य व्यशातयत् ३१
विनिघ्नन्पृथिवीपालांश्चेदिपाञ्चालकेकयान्
व्यदहत्पाण्डवीं सेनां नराश्वगजसंकुलाम् ३२
मज्जन्तमप्लवे मन्दमुज्जिहीर्षुः सुयोधनम्
तथा चरन्तं समरे तपन्तमिव भास्करम्
न शेकुः सृञ्जया द्रष्टुं तथैवान्ये महीक्षितः ३३
विचरन्तं तथा तं तु संग्रामे जितकाशिनम्
सर्वोद्योगेन सहसा पाण्डवाः समुपाद्रवन् ३४
स तु विद्राव्य समरे पाण्डवान्सृञ्जयानपि
एक एव रणे भीष्म एकवीरत्वमागतः ३५
तं शिखण्डी समासाद्य त्वया गुप्तो महारथम्
जघान पुरुषव्याघ्रं शरैः संनतपर्वभिः ३६
स एष पतितः शेते शरतल्पे पितामहः
त्वां प्राप्य पुरुषव्याघ्र गृध्रः प्राप्येव वायसम् ३७
द्रोणः पञ्च दिनान्युग्रो विधम्य रिपुवाहिनीः
कृत्वा व्यूहं महायुद्धे पातयित्वा महारथान् ३८
जयद्रथस्य समरे कृत्वा रक्षां महारथः
अन्तकप्रतिमश्चोग्रां रात्रिं युद्ध्वादहत्प्रजाः ३९
अद्येति द्वे दिने वीरो भारद्वाजः प्रतापवान्
धृष्टद्युम्नं समासाद्य स गतः परमां गतिम् ४०

यदि चैव परान्युद्धे सूतपुत्रमुखान्रथान्
नावारयिष्यः स्संगामे न स्म द्रोणो व्यनङ्क्ष्यत ४१
भवता तु बलं सर्वं धार्तराष्ट्रस्य वारितम्
ततो द्रोणो हतो युद्धे पार्षतेन धनंजय ४२
क इवान्यो रणे कुर्यात्त्वदन्यः क्षत्रियो युधि
यादृशं ते कृतं पार्थ जयद्रथवधं प्रति ४३
निवार्य सेनां महतीं हत्वा शूरांश्च पार्थिवान्
निहतः सैन्धवो राजा त्वयास्त्रबलतेजसा ४४
आश्चर्यं सिन्धुराजस्य वधं जानन्ति पार्थिवाः
अनाश्चर्यं हि तत्त्वत्तस्त्वं हि पार्थ महारथः ४५
त्वां हि प्राप्य रणे क्षत्रमेकाहादिति भारत
तप्यमानमसंयुक्तं न भवेदिति मे मतिः ४६
सैयं पार्थ चमूर्घोरा धार्तराष्ट्रस्य संयुगे
हता ससर्ववीरा हि भीष्मद्रोणौ यदा हतौ ४७
शीर्णप्रवरयोधाद्य हतवाजिनरद्विपा
हीना सूर्येन्दुनक्षत्रैर्द्यौरिवाभाति भारती ४८
विध्वस्ता हि रणे पार्थ सेनेयं भीमविक्रमात्
आसुरीव पुरा सेना शक्रस्येव पराक्रमैः ४९
तेषां हतावशिष्टास्तु पञ्च सन्ति महारथाः
अश्वत्थामा कृतवर्मा कर्णो मद्राधिपः कृपः ५०
तांस्त्वमद्य नरव्याघ्र हत्वा पञ्च महारथान्
हतामित्रः प्रयच्छोर्वीं राज्ञः सद्वीपपत्तनाम् ५१
साकाशजलपातालां सपर्वतमहावनाम्
प्राप्नोत्वमितवीर्यश्रीरद्य पार्थो वसुंधराम् ५२
एतां पुरा विष्णुरिव हत्वा दैतेयदानवान्
प्रयच्छ मेदिनीं राज्ञे शक्रायेव यथा हरिः ५३
अद्य मोदन्तु पाञ्चाला निहतेष्वरिषु त्वया
विष्णुना निहतेष्वेव दानवेयेषु देवताः ५४
यदि वा द्विपदां श्रेष्ठ द्रोणं मानयतो गुरुम्
अश्वत्थाम्नि कृपा तेऽस्ति कृपे चाचार्यगौरवात् ५५

अन्यन्तोपचितान्वा त्वं मानयन्भ्रातृबान्धवान्
कृतवर्माणमासाद्य न नेष्यसि यमक्षयम् ५६
भ्रातरं मातुरासाद्य शल्यं मद्रजनाधिपम्
यदि त्वमरविन्दाक्ष दयावान्न जिघांससि ५७
इमं पापमतिं क्षुद्रमत्यन्तं पाण्डवान्प्रति
कर्णमद्य नरश्रेष्ठ जह्याशु निशितैः शरैः ५८
एतत्ते सुकृतं कर्म नात्र किंचिन्न युज्यते
वयमप्यत्र जानीमो नात्र दोषोऽस्ति कश्चन ५९
दहने यत्सपुत्राया निशि मातुस्तवानघ
द्यूतार्थे यच्च युष्मासु प्रावर्तत सुयोधनः
तत्र सर्वत्र दुष्टात्मा कर्णो मूलमिहार्जुन ६०
कर्णाद्धि मन्यते त्राणं नित्यमेव सुयोधनः
ततो मामपि संरब्धो निग्रहीतुं प्रचक्रमे ६१
स्थिरा बुद्धिर्नरेन्द्रस्य धार्तराष्ट्रस्य मानद
कर्णः पार्थान्रणे सर्वान्विजेष्यति न संशयः ६२
कर्णमाश्रिय कौन्तेय धार्तराष्ट्रेण विग्रहः
रोचितो भवता सार्धं जानतापि बलं तव ६३
कर्णो हि भाषते नित्यमहं पार्थान्समागतान्
वासुदेवं सराजानं विजेष्यामि महारणे ६४
प्रोत्साहयन्दुरात्मानं धार्तराष्ट्रं सुदुर्मतिः
समितौ गर्जते कर्णस्तमद्य जहि भारत ६५
यच्च युष्मासु पापं वै धार्तराष्ट्रः प्रयुक्तवान्
तत्र सर्वत्र दुष्टात्मा कर्णः पापमतिर्मुखम् ६६
यच्च तद्धार्तराष्ट्राणां क्रूरैः षड्भिर्महारथैः
अपश्यं निहतं वीरं सौभद्रमृषभेक्षणम् ६७
द्रोणद्रौणिकृपान्वीरान्कम्पयन्तो महारथान्
निर्मनुष्यांश्च मातङ्गान्विरथांश्च महारथान् ६८
व्यश्वारोहांश्च तुरगान्पत्तीन्व्यायुधजीवितान्
कुर्वन्तमृषभस्कन्धं कुरुवृष्णियशस्करम् ६९
विधमन्तमनीकानि व्यथयन्तं महारथान्

मनुष्यवाजिमातङ्गान्प्रहिण्वन्तं यमक्षयम् ७०
शरैः सौभद्रमायस्तं दहन्तमिव वाहिनीम्
तन्मे दहति गात्राणि सखे सत्येन ते शपे ७१
यत्तत्रापि च दुष्टात्मा कर्णोऽभ्यद्रुह्यत प्रभो
अशक्नुवंश्चाभिमन्योः कर्णः स्थातुं रणेऽग्रतः ७२
सौभद्रशरनिर्भिन्नो विसंज्ञः शोणितोक्षितः
निःश्वसन्क्रोधसंदीप्तो विमुखः सायकार्दितः ७३
अपयानकृतोत्साहो निराशश्चापि जीविते
तस्थौ सुविह्वलः संख्ये प्रहारजनितश्रमः ७४
अथ द्रोणस्य समरे तत्कालसदृशं तदा
श्रुत्वा कर्णो वचः क्रूरं ततश्चिच्छेद कार्मुकम् ७५
ततश्छिन्नायुधं तेन रणे पञ्च महारथाः
स चैव निकृतिप्रज्ञः प्रावधीच्छरवृष्टिभिः ७६
यच्च कर्णोऽब्रवीत्कृष्णां सभायां परुषं वचः
प्रमुखे पाण्डवेयानां कुरूणां च नृशंसवत् ७७
विनष्टाः पाण्डवाः कृष्णे शाश्वतं नरकं गताः
पतिमन्यं पृथुश्रोणि वृणीष्व मितभाषिणि ७८
लेखाभ्रु धृतराष्ट्रस्य दासी भूत्वा निवेशनम्
प्रविशारालपक्ष्माक्षि न सन्ति पतयस्तव ७९
इत्युक्तवानधर्मज्ञस्तदा परमदुर्मतिः
पापः पापं वचः कर्णः शृण्वतस्तव भारत ८०
तस्य पापस्य तद्वाक्यं सुवर्णविकृताः शराः
शमयन्तु शिलाधौतास्त्वयास्ता जीवितच्छिदः ८१
यानि चान्यानि दुष्टात्मा पापानि कृतवांस्त्वयि
तान्यद्य जीवितं चास्य शमयन्तु शरास्तव ८२
गाण्डीवप्रहितान्घ्रानद्य गात्रैः स्पृशञ्शरान्
कर्णः स्मरतु दुष्टात्मा वचनं द्रोणभीष्मयोः ८३
सुवर्णपुङ्खा नाराचाः शत्रुघ्ना वैद्युतप्रभाः
त्वयास्तास्तस्य मर्माणि भित्त्वा पास्यन्ति शोणितम् ८४
उग्रास्त्वद्भुजनिर्मुक्ता मर्म भित्त्वा शिताः शराः

अद्य कर्णं महावेगाः प्रेषयन्तु यमक्षयम् ८५
अद्य हाहाकृता दीना विषण्णास्त्वच्छरार्दिताः
प्रपतन्तं रथात्कर्णं पश्यन्तु वसुधाधिपाः ८६
अद्य स्वशोणिते मग्नं शयानं पतितं भुवि
अपविद्धायुधं कर्णं पश्यन्तु सुहृदो निजाः ८७
हस्तिकक्ष्यो महानस्य भल्लेनोन्मथितस्त्वया
प्रकम्पमानः पततु भूमावाधिरथेर्ध्वजः ८८
त्वया शरशतैश्छिन्नं रथं हेमविभूषितम्
हतयोधं समुत्सृज्य भीतः शल्यः पलायताम् ८९
ततः सुयोधनो दृष्ट्वा हतमाधिरथिं त्वया
निराशो जीविते त्वद्य राज्ये चैव धनंजय ९०
एते द्रवन्ति पाञ्चाला वध्यमानाः शितैः शरैः
कर्णेन भरतश्रेष्ठ पाण्डवानुज्जिहीर्षवः ९१
पाञ्चालान्द्रौपदेयांश्च धृष्टद्युम्नशिखण्डिनौ
धृष्टद्युम्नतनूजांश्च शतानीकं च नाकुलिम् ९२
नकुलं सहदेवं च दुर्मुखं जनमेजयम्
सुवर्माणं सात्यकिं च विद्धि कर्णवशं गतान् ९३
अभ्याहतानां कर्णेन पाञ्चालानां महारणे
श्रूयते निनदो घोरस्त्वद्बन्धूनां परंतप ९४
न त्वेव भीताः पाञ्चालाः कथंचित्स्युः पराङ्मुखाः
न हि मृत्युं महेष्वासा गणयन्ति महारथाः ९५
य एकः पाण्डवीं सेनां शरौघैः समवेष्टयत्
तं समासाद्य पाञ्चाला भीष्मं नासन्पराङ्मुखाः ९६
तथा ज्वलन्तमस्त्राग्निं गुरुं सर्वधनुष्मताम्
निर्दहन्तं समारोहन्दुर्धर्षं द्रोणमोजसा ९७
ते नित्यमुदिता जेतुं युद्धे शत्रूनरिंदमाः
न जात्वाधिरथेर्भीताः पाञ्चालाः स्युः पराङ्मुखाः ९८
तेषामापततां शूरः पाञ्चालानां तरस्विनाम्
आदत्तेऽसूञ्शरैः कर्णः पतंगानामिवानलः ९९
तांस्तथाभिमुखान्वीरान्मित्रार्थे त्यक्तजीवितान्

क्षयं नयति राधेयः पाञ्चालाञ्शतशो रणे १००
अस्त्रं हि रामात्कर्णेन भार्गवादृषिसत्तमात्
यदुपात्तं पुरा घोरं तस्य रूपमुदीर्यते १०१
तापनं सर्वसैन्यानां घोररूपं सुदारुणम्
समावृत्य महासेनां ज्वलति स्वेन तेजसा १०२
एते चरन्ति संग्रामे कर्णचापच्युताः शराः
भ्रमराणामिव व्रातास्तापयन्तः स्म तावकान् १०३
एते चरन्ति पाञ्चाला दिक्षु सर्वासु भारत
कर्णास्त्रं समरे प्राप्य दुर्निवारमनात्मभिः १०४
एष भीमो दृढक्रोधो वृतः पार्थ समन्ततः
सृञ्जयैर्योधयन्कर्णं पीडयते स्म शितैः शरैः १०५
पाण्डवान्सृञ्जयांश्चैव पाञ्चालांश्चैव भारत
हन्यादुपेक्षितः कर्णो रोगो देहमिवाततः १०६
नान्यं त्वत्तोऽभिपश्यामि योधं यौधिष्ठिरे बले
यः समासाद्य राधेयं स्वस्तिमानाव्रजेद्गृहम् १०७
तमद्य निशितैर्बाणैर्निहत्य भरतर्षभ
यथाप्रतिज्ञं पार्थ त्वं कृत्वा कीर्तिमवाप्नुहि १०८
त्वं हि शक्तो रणे जेतुं सकर्णानपि कौरवान्
नान्यो युधि युधां श्रेष्ठ सत्यमेतद्ब्रवीमि ते १०९
एतत्कृत्वा महत्कर्म हत्वा कर्णं महारथम्
कृतार्थः सफलः पार्थ सुखी भव नरोत्तम ११०

इति श्रीमहाभारते कर्णपर्वणि एकपञ्चाशोऽध्यायः ५१

द्विपञ्चाशोऽध्यायः

सञ्जय उवाच
स केशवस्य बीभत्सुः श्रुत्वा भारत भाषितम्
विशोकः संप्रहृष्टश्च क्षणेन समपद्यत १
ततो ज्यामनुमृज्याशु व्याक्षिपद्गाण्डिवं धनुः
दध्रे कर्णविनाशाय केशवं चाभ्यभाषत २
त्वया नाथेन गोविन्द ध्रुव एष जयो मम

प्रसन्नो यस्य मेऽद्य त्वं भूतभव्यभवत्प्रभुः ३
त्वत्सहायो ह्यहं कृष्ण त्रीँल्लोकान्वै समागतान्
प्रापयेयं परं लोकं किमु कर्णं महारणे ४
पश्यामि द्रवतीं सेनां पाञ्चालानां जनार्दन
पश्यामि कर्णं समरे विचरन्तमभीतवत् ५
भार्गवास्त्रं च पश्यामि विचरन्तं समन्ततः
सृष्टं कर्णेन वार्ष्णेय शक्रेणेव महाशनिम् ६
अयं खलु स संग्रामो यत्र कृष्ण मया कृतम्
कथयिष्यन्ति भूतानि यावद्भूमिर्धरिष्यति ७
अद्य कृष्ण विकर्णा मे कर्णं नेष्यन्ति मृत्यवे
गाण्डीवमुक्ताः क्षिण्वन्तो मम हस्तप्रचोदिताः ८
अद्य राजा धृतराष्ट्रः स्वां बुद्धिमवमंस्यते
दुर्योधनमराज्यार्हं यया राज्येऽभ्यषेचयत् ९
अद्य राज्यात्सुखाच्चैव श्रियो राष्ट्रात्तथा पुरात्
पुत्रेभ्यश्च महाबाहो धृतराष्ट्रो वियोक्ष्यते १०
अद्य दुर्योधनो राजा जीविताच्च निराशकः
भविष्यति हते कर्णे कृष्ण सत्यं ब्रवीमि ते ११
अद्य दृष्ट्वा मया कर्णं शरैर्विशकलीकृतम्
स्मरतां तव वाक्यानि शमं प्रति जनेश्वरः १२
अद्यासौ सौबलः कृष्ण ग्लहं जानातु वै शरान्
दुरोदरं च गाण्डीवं मण्डलं च रथं मम १३
योऽसौ रणे नरं नान्यं पृथिव्यामभिमन्यते
तस्याद्य सूतपुत्रस्य भूमिः पास्यति शोणितम्
गाण्डीवसृष्टा दास्यन्ति कर्णस्य परमां गतिम् १४
अद्य तप्स्यति राधेयः पाञ्चालद्यं यत्तदाब्रवीत्
सभामध्ये वचः क्रूरं कुत्सयन्पाण्डवान्प्रति १५
ये वै षण्ढतिलास्तत्र भवितारोऽद्य ते तिलाः
हते वैकर्तने कर्णे सूतपुत्रे दुरात्मनि १६
अहं वः पाण्डुपुत्रेभ्यस्त्रास्यामीति यदब्रवीत्
अनृतं तत्करिष्यन्ति मामका निशिताः शराः १७

हन्ताहं पाण्डवान्सर्वान्सपुत्रानिति योऽब्रवीत्
तमद्य कर्णं हन्तास्मि मिषतां सर्वधन्विनाम् १८
यस्य वीर्ये समाश्वस्य धार्तराष्ट्रो बृहन्मनाः
अवामन्यत दुर्बुद्धिर्नित्यमस्मान्दुरात्मवान्
तमद्य कर्णं राधेयं हन्तास्मि मधुसूदन १९
अद्य कर्णे हते कृष्ण धार्तराष्ट्राः सराजकाः
विद्रवन्तु दिशो भीताः सिंहत्रस्ता मृगा इव २०
अद्य दुर्योधनो राजा पृथिवीमन्ववेक्षताम्
हते कर्णे मया संख्ये सपुत्रे ससुहृज्जने २१
अद्य कर्णं हतं दृष्ट्वा धार्तराष्ट्रोऽत्यमर्षणः
जानातु मां रणे कृष्ण प्रवरं सर्वधन्विनाम् २२
अद्याहमनृणः कृष्ण भविष्यामि धनुर्भृताम्
क्रोधस्य च कुरूणां च शराणां गाण्डिवस्य च २३
अद्य दुःखमहं मोक्ष्ये त्रयोदशसमार्जितम्
हत्वा कर्णं रणे कृष्ण शम्बरं मघवानिव २४
अद्य कर्णे हते युद्धे सोमकानां महारथाः
कृतं कार्यं च मन्यन्तां मित्रकार्येप्सवो युधि २५
न जाने च कथं प्रीतिः शैनेयस्याद्य माधव
भविष्यति हते कर्णे मयि चापि जयाधिके २६
अहं हत्वा रणे कर्णं पुत्रं चास्य महारथम्
प्रीतिं दास्यामि भीमस्य यमयोः सात्यकेरपि २७
धृष्टद्युम्नशिखण्डिभ्यां पाञ्चालानां च माधव
अद्यानृण्यं गमिष्यामि हत्वा कर्णं महारणे २८
अद्य पश्यन्तु संग्रामे धनंजयममर्षणम्
युध्यन्तं कौरवान्संख्ये पातयन्तं च सूतजम्
भवत्सकाशे वक्ष्ये च पुनरेवात्मसंस्तवम् २९
धनुर्वेदे मत्समो नास्ति लोके पराक्रमे वा मम कोऽस्ति तुल्यः
को वाप्यन्यो मत्समोऽस्ति क्षमायां तथा क्रोधे सदृशोऽन्यो न मेऽस्ति ३०
अहं धनुष्मानसुरान्सुरांश्च सर्वाणि भूतानि च सङ्गतानि
स्वबाहुवीर्याद्गमये पराभवं मत्पौरुषं विद्धि परः परेभ्यः ३१

शरार्चिषा गाण्डिवेनाहमेकः सर्वान्कुरून्बाह्लिकांश्चाभिपत्य
हिमात्यये कक्षगतो यथाग्निस्तथा दहेयं सगणान्प्रसह्य ३२
पाणौ पृषत्का लिखिता ममैते धनुश्च सव्ये निहितं सबाणम्
पादौ च मे सरथौ सध्वजौ च न मादृशं युद्धगतं जयन्ति ३३
इति श्रीमहाभारते कर्णपर्वणि द्विपञ्चाशोऽध्यायः ५२

त्रिपञ्चाशोऽध्यायः

सञ्जय उवाच
तेषामनीकानि बृहद्ध्वजानि रणे समृद्धानि समागतानि
गर्जन्ति भेरीनिनदोन्मुखानि मेघैर्यथा मेघगणास्तपान्ते १
महागजाभ्राकुलमस्त्रतोयं वादित्रनेमीतलशब्दवच्च
हिरण्यचित्रायुधवैद्युतं च महारथैरावृतशब्दवच्च २
तद्भीमवेगं रुधिरौघवाहि खड्गाकुलं क्षत्रियजीववाहि
अनार्तवं क्रूरमनिष्टवर्षं बभूव तत्संहरणं प्रजानाम् ३
रथान्ससूतान्सहयान्गजांश्च सर्वानरीन्मृत्युवशं शरौघैः
निन्ये हयांश्चैव तथा ससादीन्पदातिसंघांश्च तथैव पार्थः ४
कृपः शिखण्डी च रणे समेतौ दुर्योधनं सात्यकिरभ्यगच्छत्
श्रुतश्रवा द्रोणसुतेन सार्धं युधामन्युश्चित्रसेनेन चापि ५
कर्णस्य पुत्रस्तु रथी सुषेणं समागतः सृञ्जयांश्चोत्तमौजाः
गान्धारराजं सहदेवः क्षुधार्तो महर्षभं सिंह इवाभ्यधावत् ६
शतानीको नाकुलि कर्णपुत्रं युवा युवानं वृषसेनं शरौघैः
समार्दयत्कर्णसुतश्च वीरः पाञ्चालेयं शरवर्षैरनेकैः ७
रथर्षभः कृतवर्माणमार्च्छन्माद्रीपुत्रो नकुलश्चित्रयोधी
पाञ्चालानामधिपो याज्ञसेनिः सेनापतिं कर्णमार्च्छत्ससैन्यम् ८
दुःशासनो भारत भारती च संशप्तकानां पृतना समृद्धा
भीमं रणे शस्त्रभृतां वरिष्ठं तदा समार्च्छत्तमसह्य वेगम् ९
कर्णात्मजं तत्र जघान शूरस्तथाच्छिनच्चोत्तमौजाः प्रसह्य
तस्योत्तमाङ्गं निपपात भूमौ निनादयद्गां निनदेन खं च १०
सुषेणशीर्षं पतितं पृथिव्यां विलोक्य कर्णोऽथ तदार्तरूपः
क्रोधाद्धयांस्तस्य रथं ध्वजं च बाणैः सुधारैर्निशितैर्न्यकृन्तत् ११

स तूत्तमौजा निशितैः पृषत्कैर्विव्याध खड्गेन च भास्वरेण
पार्ष्णिं हयांश्चैव कृपस्य हत्वा शिखण्डिवाहं स ततोऽभ्यरोहत् १२
कृपं तु दृष्ट्वा विरथं रथस्थो नैच्छच्छरैस्ताडयितुं शिखण्डी
तं द्रौणिरावार्य रथं कृपं स्म समुज्जह्रे पङ्कगतां यथा गाम् १३
हिरण्यवर्मा निशितैः पृषत्कैस्तवात्मजानामनिलात्मजो वै
अतापयत्सैन्यमतीव भीमः काले शुचौ मध्यगतो यथार्कः १४
इति श्रीमहाभारते कर्णपर्वणि त्रिपञ्चाशोऽध्यायः ५३

चतुःपञ्चाशोऽध्यायः

सञ्जय उवाच
अथ त्विदानीं तुमुले विमर्दे द्विषद्भिरेको बहुभिः समावृतः
महाभये सारथिमित्युवाच भीमश्चमूं वारयन्धार्तराष्ट्रीम्
त्वं सारथे याहि जवेन वाहैर्नयाम्येतान्धार्तराष्ट्रान्यमाय १
संचोदितो भीमसेनेन चैवं स सारथिः पुत्रबलं त्वदीयम्
प्रायात्ततः सारथिरुग्रवेगो यतो भीमस्तद्बलं गन्तुमैच्छत् २
ततोऽपरे नागरथाश्वपत्तिभिः प्रत्युद्ययुः कुरवस्तं समन्तात्
भीमस्य वाहाग्र्यमुदारवेगं समन्ततो बाणगणैर्निजघ्नुः ३
ततः शरानापततो महात्मा चिच्छेद बाणैस्तपनीयपुङ्खैः
ते वै निपेतुस्तपनीयपुङ्खा द्विधा त्रिधा भीमशरैर्निकृत्ताः ४
ततो राजन्नागरथाश्वयूनां भीमाहतानां तव राजमध्ये
घोरो निनादः प्रबभौ नरेन्द्र वज्राहतानामिव पर्वतानाम् ५
ते वध्यमानाश्च नरेन्द्रमुख्या निर्भिन्ना वै भीमसेनप्रवेकैः
भीमं समन्तात्समरेऽध्यरोहन्वृक्षं शकुन्ता इव पुष्पहेतोः ६
ततोऽभिपातं तव सैन्यमध्ये प्रादुश्चक्रे वेगमिवात्तवेगः
यथान्तकाले क्षपयन्दिधक्षुर्भूतान्तकृत्काल इवात्त दण्डः ७
तस्यातिवेगस्य रणेऽतिवेगं नाशक्नुवन्धारयितुं त्वदीयाः
व्यात्ताननस्यापततो यथैव कालस्य काले हरतः प्रजा वै ८
ततो बलं भारत भारतानां प्रदह्यमानं समरे महात्मन्
भीतं दिशोऽकीर्यत भीमनुन्नं महानिलेनाभ्रगणो यथैव ९
ततो धीमान्सारथिमब्रवीद्बली स भीमसेनः पुनरेव हृष्टः

सूताभिजानीहि परान्स्वकान्वा रथान्ध्वजांश्चापततः समेतान्
युध्यन्नहं नाभिजानामि किंचिन्मा सैन्यं स्वं छादयिष्ये पृषत्कैः १०
अरीन्विशोकाभिनिरीक्ष्य सर्वतो मनस्तु चिन्ता प्रदुनोति मे भृशम्
राजातुरो नागमद्यत्किरीटी बहूनि दुःखान्यभिजातोऽस्मि सूत ११
एतद्दुःखं सारथे धर्मराजो यन्मां हित्वा यातवाञ्शत्रुमध्ये
नैनं जीवन्नापि जानाम्यजीवन्बीभत्सुं वा तन्ममाद्यातिदुःखम् १२
सोऽह द्विषत्सैन्यमुदग्रकल्पं विनाशयिष्ये परमप्रतीतः
एतान्निहत्याजिमध्ये समेतान्प्रीतो भविष्यामि सह त्वयाद्य १३
सर्वांस्तूणीरान्मार्गणान्वान्ववेक्ष्य किं शिष्टं स्यात्सायकानां रथे मे
का वा जातिः किः प्रमाणं च तेषां ज्ञात्वा व्यक्तं तन्ममाचक्ष्व सूत १४
विशोक उवाच
षण्मार्गणानामयुतानि वीर क्षुराश्च भल्लाश्च तथायुताख्याः
नाराचानां द्वे सहस्त्रे तु वीर त्रीण्येव च प्रदराणां च पार्थ १५
अस्त्यायुधं पाण्डवेयावशिष्टं न यद्वहेच्छकटं षड्गवीयम्
एतद्विद्वन्मुञ्च सहस्त्रशोऽपि गदासिबाहुद्रविणं च तेऽस्ति १६
भीम उवाच
सूताद्येमं पश्य भीमप्रमुक्तैः संभिन्दद्भिः पार्थिवानाशुवेगैः
उग्रैर्बाणैराहवं घोररूपं नष्टादित्यं मृत्युलोकेन तुल्यम् १७
अद्यैव तद्विदितं पार्थिवानां भविष्यति आकुमारं च सूत
निमग्नो वा समरे भीमसेन एकः कुरून्वा समरे विजेता १८
सर्वे संख्ये कुरवो निष्पतन्तु मां वा लोकाः कीर्तयन्त्वाकुमारम्
सर्वानेकस्तानहं पातयिष्ये ते वा सर्वे भीमसेनं तुदन्तु १९
आशास्तारः कर्म चात्युत्तमं वा तन्मे देवाः केवलं साधयन्तु
आयात्विहाद्यार्जुनः शत्रुघाती शक्रस्तूर्णं यज्ञ इवोपहूतः २०
ईक्षस्वैतां भारतीं दीर्यमाणामेते कस्माद्विद्रवन्ते नरेन्द्राः
व्यक्तं धीमान्सव्यसाची नराग्र्यः सैन्यं ह्येतच्छादयत्याशु बाणैः २१
पश्य ध्वजांश्च द्रवतो विशोक नागान्हयान्पत्तिसङ्घांश्च संख्ये
रथान्विशीर्णाञ्शरशक्तिताडितान्पश्यस्वैतान्रथिनश्चैव सूत २२
आपूर्यते कौरवी चाप्यभीक्ष्णं सेना ह्यसौ सुभृशं हन्यमाना
धनंजयस्याशनितुल्यवेगैर्ग्रस्ता शरैर्बर्हिसुवर्णवाजैः २३

एते द्रवन्ति स्म रथाश्वनागाः पदातिसङ्घानवमर्दयन्तः
संमुह्यमानाः कौरवाः सर्व एव द्रवन्ति नागा इव दावभीताः
हाहाकृताश्चैव रणे विशोक मुञ्चन्ति नादान्विपुलान्गजेन्द्राः २४
विशोक उवाच
सर्वे कामाः पाण्डव ते समृद्धाः कपिध्वजो दृश्यते हस्तिसैन्ये
नीलाद्घनाद्विद्युतमुच्चरन्तीं तथापश्यं विस्फुरद्वै धनुस्तत् २५
कपिर्ह्यसौ वीक्ष्यते सर्वतो वै ध्वजाग्रमारुह्य धनंजयस्य
दिवाकराभो मणिरेष दिव्यो विभ्राजते चैव किरीटसंस्थः २६
पार्श्वे भीमं पाण्डुराभ्रप्रकाशं पश्येमं देवदत्तं सुघोषम्
अभीशुहस्तस्य जनार्दनस्य विगाहमानस्य चमूं परेषाम् २७
रविप्रभं वज्रनाभं क्षुरान्तं पार्श्वे स्थितं पश्य जनार्दनस्य
चक्रं यशो वर्धयत्केशवस्य सदार्चितं यदुभिः पश्य वीर २८
भीम उवाच
ददामि ते ग्रामवरांश्चतुर्दश प्रियाख्याने सारथे सुप्रसन्नः
दासीशतं चापि रथांश्च विंशतिं यदर्जुनं वेदयसे विशोक २९
इति श्रीमहाभारते कर्णपर्वणि चतुःपञ्चाशोऽध्यायः ५४

पञ्चपञ्चाशोऽध्यायः

सञ्जय उवाच
श्रुत्वा च रथनिर्घोषं सिंहनादं च संयुगे
अर्जुनः प्राह गोविन्दं शीघ्रं चोदय वाजिनः १
अर्जुनस्य वचः श्रुत्वा गोविन्दोऽर्जुनमब्रवीत्
एष गच्छामि सुक्षिप्रं यत्र भीमो व्यवस्थितः २
आयान्तमश्वैर्हिमशङ्खवर्णैः सुवर्णमुक्तामणिजालनद्धैः
जम्भं जिघांसुं प्रगृहीतवज्रं जयाय देवेन्द्रमिवोग्रमन्युम् ३
रथाश्वमातङ्गपदातिसंघा बाणस्वनैर्नेमिखुरस्वनैश्च
संनादयन्तो वसुधां दिशश्च क्रुद्धा नृसिंहा जयमभ्युदीयुः ४
तेषां च पार्थस्य महत्तदासीद्देहासुपाप्मक्षपणं सुयुद्धम्
त्रैलोक्यहेतोरसुरैर्यथासीद्देवस्य विष्णोर्जयतां वरस्य ५
तैरस्तमुच्चावचमायुधौघमेकः प्रचिच्छेद किरीटमाली

क्षुरार्धचन्द्रैर्निशितैश्च बाणैः शिरांसि तेषां बहुधा च बाहून् ६
छत्राणि वालव्यजनानि केतूनश्वान्रथान्पत्तिगणान्द्विपांश्च
ते पेतुरुर्व्यां बहुधा विरूपा वातप्रभग्नानि यथा वनानि ७
सुवर्णजालावतता महागजाः सवैजयन्तीध्वजयोधकल्पिताः
सुवर्णपुङ्खैरिषुभिः समाचिताश्चकाशिरे प्रज्वलिता यथाचलाः ८
विदार्य नागांश्च रथांश्च वाजिनः शरोत्तमैर्वासववज्रसंनिभैः
द्रुतं ययौ कर्णजिघांसया तथा यथा मरुत्वान्बलभेदने पुरा ९
ततः स पुरुषव्याघ्रः सूतसैन्यमरिंदम
प्रविवेश महाबाहुर्मकरः सागरं यथा १०
तं दृष्ट्वा तावका राजन्रथपत्तिसमन्विताः
गजाश्वसादिबहुलाः पाण्डवं समुपाद्रवन् ११
तत्राभिद्रवतां पार्थमारावः सुमहानभूत्
सागरस्येव मत्तस्य यथा स्यात्सलिलस्वनः १२
ते तु तं पुरुषव्याघ्रं व्याघ्रा इव महारथाः
अभ्यद्रवन्त संग्रामे त्यक्त्वा प्राणकृतं भयम् १३
तेषामापततां तत्र शरवर्षाणि मुञ्चताम्
अर्जुनो व्यधमत्सैन्यं महावातो घनानिव १४
तेऽजुनं सहिता भूत्वा रथवंशैः प्रहारिणः
अभियाय महेष्वासा विव्यधुर्निशितैः शरैः १५
ततोऽजुनः सहस्राणि रथवारणवाजिनाम्
प्रेषयामास विशिखैर्यमस्य सदनं प्रति १६
ते वध्यमानाः समरे पार्थचापच्युतैः शरैः
तत्र तत्र स्म लीयन्ते भये जाते महारथाः १७
तेषां चतुःशतान्वीरान्यतमानान्महारथान्
अर्जुनो निशितैर्बाणैरनयद्यमसादनम् १८
ते वध्यमानाः समरे नानालिङ्गैः शितैः शरैः
अर्जुनं समभित्यज्य दुद्रुवुर्वै दिशो भयात् १९
तेषां शब्दो महानासीद्द्रवतां वाहिनीमुखे
महौघस्येव भद्रं ते गिरिमासाद्य दीर्यतः २०
तां तु सेनां भृशं विद्ध्वा द्रावयित्वार्जुनः शरैः

प्रायादभिमुखः पार्थः सूतानीकानि मारिष २१
तस्य शब्दो महानासीत्परानभिमुखस्य वै
गरुडस्येव पततः पन्नगार्थे यथा पुरा २२
तं तु शब्दमभिश्रुत्य भीमसेनो महाबलः
बभूव परमप्रीतः पार्थदर्शनलालसः २३
श्रुत्वैव पार्थमायान्तं भीमसेनः प्रतापवान्
त्यक्त्वा प्राणान्महाराज सेनां तव ममर्द ह २४
स वायुवेगप्रतिमो वायुवेगसमो जवे
वायुवद्व्यचरद्भीमो वायुपुत्रः प्रतापवान् २५
तेनार्द्यमाना राजेन्द्र सेना तव विशां पते
व्यभ्राम्यत महाराज भिन्ना नौरिव सागरे २६
तां तु सेनां तदा भीमो दर्शयन्पाणिलाघवम्
शरैरवचकर्तोग्रैः प्रेषयिष्यन्यमक्षयम् २७
तत्र भारत भीमस्य बलं दृष्ट्वातिमानुषम्
व्यत्रस्यन्त रणे योधाः कालस्येव युगक्षये २८
तथार्दितान्भीमबलान्भीमसेनेन भारत
दृष्ट्वा दुर्योधनो राजा इदं वचनमब्रवीत् २९
सैनिकान्स महेष्वासो योधांश्च भरतर्षभ
समादिशद्रणे सर्वान्हत भीममिति स्म ह
तस्मिन्हते हतं मन्ये सर्वसैन्यमशेषतः ३०
प्रतिगृह्य च तामाज्ञां तव पुत्रस्य पार्थिवाः
भीमं प्रच्छादयामासुः सरवर्षैः समन्ततः ३१
गजाश्च बहुला राजन्नराश्च जयगृद्धिनः
रथा हयाश्च राजेन्द्र परिवव्रुर्वृकोदरम् ३२
स तैः परिवृतः शूरैः शूरो राजन्समन्ततः
शुशुभे भरतश्रेष्ठो नक्षत्रैरिव चन्द्रमाः ३३
स रराज तथा सङ्ख्ये दर्शनीयो नरोत्तमः
निर्विशेषं महाराज यथा हि विजयस्तथा ३४
तत्र ते पार्थिवाः सर्वे शरवृष्टीः समासृजन्
क्रोधरक्तेक्षणाः क्रूरा हन्तुकामा वृकोदरम् ३५

स विदार्य महासेनां शरैः संनतपर्वभिः
निश्चक्राम रणाद्भीमो मत्स्यो जालादिवाम्भसि ३६
हत्वा दश सहस्राणि गजानामनिवर्तिनाम्
नृणां शतसहस्रे द्वे द्वे शते चैव भारत ३७
पञ्चचाश्वसहस्राणि रथानां शतमेव च
हत्वा प्रास्यन्दयद्भीमो नदीं शोणितकर्दमाम् ३८
शोणितोदां रथावर्तां हस्तिग्राहसमाकुलाम्
नरमीनामश्वनक्रां केशशैबलशाद्वलाम् ३९
संछिन्नभुजनागेन्द्रां बहुरत्नापहारिणीम्
ऊरुग्राहां मज्जपङ्कां शीर्षोपलसमाकुलाम् ४०
धनुष्काशां शरावापां गदापरिघकेतनाम्
योधव्रातवतीं सङ्ख्ये वहन्तीं यमसादनम् ४१
क्षणेन पुरुषव्याघ्रः पावर्तयत निम्नगाम्
यथा वैतरणीमुग्रां दुस्तरामकृतात्मभिः ४२
यतो यतः पाण्डवेयः प्रवृत्तो रथसत्तमः
ततस्ततोऽपातयत योधाञ्शतसहस्रशः ४३
एवं दृष्ट्वा कृतं कर्म भीमसेनेन संयुगे
दुर्योधनो महाराज शकुनिं वाक्यमब्रवीत् ४४
जय मातुल संग्रामे भीमसेनं महाबलम्
अस्मिञ्जिते जितं मन्ये पाण्डवेयं महाबलम् ४५
ततः प्रायान्महाराज सौबलेयः प्रतापवान्
रणाय महते युक्तो भ्रातृभिः परिवारितः ४६
स समासाद्य संग्रामे भीमं भीमपराक्रमम्
वारयामास तं वीरो वेलेव मकरालयम्
स न्यवर्तत तं भीमो वार्यमाणः शितैः शरैः ४७
शकुनिस्तस्य राजेन्द्र वामे पार्श्वे स्तनान्तरे
प्रेषयामास नाराचान्रुक्मपुङ्खाञ्शिलाशितान् ४८
वर्म भित्त्वा तु सौवर्णं बाणास्तस्य महात्मनः
न्यमज्जन्त महाराज कङ्कबर्हिणवाससः ४९
सोऽतिविद्धो रणे भीमः शरं हेमविभूषितम्

प्रेषयामास सहसा सौबलं प्रति भारत ५०
तमायान्तं शरं घोरं शकुनिः शत्रुतापनः
चिच्छेद शतधा राजन्कृतहस्तो महाबलः ५१
तस्मिन्निपतिते भूमौ भीमः क्रुद्धो विशां पते
धनुश्चिच्छेद भल्लेन सौबलस्य हसन्निव ५२
तदपास्य धनुश्छिन्नं सौबलेयः प्रतापवान्
अन्यदादत्त वेगेन धनुर्भल्लांश्च षोडश ५३
तैस्तस्य तु महाराज भल्लैः संनतपर्वभिः
चतुर्भिः सारथिं ह्यार्च्छद्भीमं पञ्चभिरेव च ५४
ध्वजमेकेन चिच्छेद छत्रं द्वाभ्यां विशां पते
चतुर्भिश्चतुरो वाहान्विव्याध सुबलात्मजः ५५
ततः क्रुद्धो महाराज भीमसेनः प्रतापवान्
शक्तिं चिक्षेप समरे रुक्मदण्डामयस्मयीम् ५६
सा भीमभुजनिर्मुक्ता नागजिह्वेव चञ्चला
निपपात रथे तूर्णं सौबलस्य महात्मनः ५७
ततस्तामेव संगृह्य शक्तिं कनकभूषणाम्
भीमसेनाय चिक्षेप क्रुद्धरूपो विशां पते ५८
सा निर्भिद्य भुजं सव्यं पाण्डवस्य महात्मनः
पपात च ततो भूमौ यथा विद्युन्नभश्च्युता ५९
अथोत्क्रुष्टं महाराज धार्तराष्ट्रैः समन्ततः
न तु तं ममृषे भीमः सिंहनादं तरस्विनाम् ६०
स संगृह्य धनुः सज्यं त्वरमाणो महारथः
मुहूर्तादिव राजेन्द्र छादयामास सायकैः
सौबलस्य बलं संख्ये त्यक्त्वात्मानं महाबलः ६१
तस्याश्वांश्चतुरो हत्वा सूतं चैव विशां पते
ध्वजं चिच्छेद भल्लेन त्वरमाणः पराक्रमी ६२
हताश्वं रथमुत्सृज्य त्वरमाणो नरोत्तमः
तस्थौ विस्फारयंश्चापं क्रोधरक्तेक्षणः श्वसन्
शरैश्च बहुधा राजन्भीममार्छत्समन्ततः ६३
प्रतिहत्य तु वेगेन भीमसेनः प्रतापवान्

धनुश्चिच्छ्द संक्रुद्धो विव्याध च शितैः शरैः ६४
सोऽतिविद्धो बलवता शत्रुणा शत्रुकर्शनः
निपपात ततो भूमौ किंचित्प्राणो नराधिप ६५
ततस्तं विह्वलं ज्ञात्वा पुत्रस्तव विशां पते
अपोवाह रथेनाजौ भीमसेनस्य पश्यतः ६६
रथस्थे तु नरव्याघ्रे धार्तराष्ट्राः पराङ्मुखाः
प्रदुद्रुवुर्दिशो भीता भीमाज्जाते महाभये ६७
सौबले निर्जिते राजन्भीमसेनेन धन्विना
भयेन महता मग्नः पुत्रो दुर्योधनस्तव
अपायाज्जवनैरश्वैः सापेक्षो मातुलं प्रति ६८
पराङ्मुखं तु राजानं दृष्ट्वा सैन्यानि भारत
विप्रजग्मुः समुत्सृज्य द्वैरथानि समन्ततः ६९
तान्दृष्ट्वातिरथान्सर्वान्धार्तराष्ट्रान्पराङ्मुखान्
जवेनाभ्यपतद्भीमः किरञ्शरशतान्बहून् ७०
ते वध्यमाना भीमेन धार्तराष्ट्राःपराङ्मुखाः
कर्णमासाद्य समरे स्थिता राजन्समन्ततः
स हि तेषां महावीर्यो द्वीपोऽभूत्सुमहाबलः ७१
भिन्ननौका यथा राजन्द्वीपमासाद्य निर्वृताः
भवन्ति पुरुषव्याघ्र नाविकाः कालपर्यये ७२
तथाकर्णं समासाद्य तावका भरतर्षभ
समाश्वस्ताः स्थिता राजन्संप्रहृष्टाः परस्परम्
समाजग्मुश्च युद्धाय मृत्युं कृत्वा निवर्तनम् ७३
इति श्रीमहाभारते कर्णपर्वणि पञ्चपञ्चाशोऽध्यायः ५५

षट्पञ्चाशोऽध्यायः

धृतराष्ट्र उवाच
ततो भग्नेषु सैन्येषु भीमसेनेन संयुगे
दुर्योधनोऽब्रवीत्किं नु सौबलो वापि सञ्जय १
कर्णो वा जयतां श्रेष्ठो योधा वा मामका युधि
कृपो वा कृतवर्मा च द्रौणिर्दुःशासनोऽपि वा २

अत्यद्भुतमिदं मन्ये पाण्डवेयस्य विक्रमम्
यथाप्रतिज्ञं योधानां राधेयः कृतवानपि ३
कुरूणामपि सर्वेषां कर्णः शत्रुनिषूदनः
शर्म वर्म प्रतिष्ठा च जीविताशा च सञ्जय ४
तत्प्रभग्नं बलं दृष्ट्वा कौन्तेयेनामितौजसा
राधेयानामधिरथः कर्णः किमकरोद्युधि ५
पुत्रा वा मम दुर्धर्षा राजानो वा महारथाः
एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि सञ्जय ६
सञ्जय उवाच
अपराह्णे महाराज सूतपुत्रः प्रतापवान्
जघान सोमकान्सर्वान्भीमसेनस्य पश्यतः
भीमोऽप्यतिबलः सैन्यं धार्तराष्ट्रं व्यपोथयत् ७
द्राव्यमाणं बलं दृष्ट्वा भीमसेनेन धीमता
यन्तारमब्रवीत्कर्णः पाञ्चालानेव मा वह ८
मद्रराजस्ततः शल्यः श्वेतानश्वान्महाजवान्
प्राहिणोच्चेदिपाञ्चालान्करूषांश्च महाबलः ९
प्रविश्य च स तां सेनां शल्यः परबलार्दनः
न्ययच्छत्तुरगान्हृष्टो यत्र यत्रैच्छदग्रणीः १०
तं रथं मेघसंकाशं वैयाघ्रपरिवारणम्
संदृश्य पाण्डुपाञ्चालास्त्रस्ता आसन्विशां पते ११
ततो रथस्य निनदः प्रादुरासीन्महारणे
पर्जन्यसमनिर्घोषः पर्वतस्येव दीर्यतः १२
ततः शरशतैस्तीक्ष्णैः कर्णोऽप्याकर्णनिःसृतैः
जघान पाण्डवबलं शतशोऽथ सहस्रशः १३
तं तथा समरे कर्म कुर्वाणमतिमानुषम्
परिवव्रुर्महेष्वासाः पाण्डवानां महारथाः १४
तं शिखण्डी च भीमश्च धृष्टद्युम्नश्च पार्षतः
नकुलः सहदेवश्च द्रौपदेयाः ससात्यकाः
परिवव्रुर्जिघांसन्तो राधेयं शरवृष्टिभिः १५
सात्यकिस्तु ततः कर्णं विंशत्या निशितैः शरैः

अताडयद्रणे शूरो जत्रुदेशे नरोत्तमः १६
शिखण्डी पञ्चविंशत्या धृष्टद्युम्नश्च पञ्चभिः
द्रौपदेयाश्चतुःषष्ट्या सहदेवश्च सप्तभिः
नकुलश्च शतेनाजौ कर्णं विव्याध सायकैः १७
भीमसेनस्तु राधेयं नवत्या नतपर्वणाम्
विव्याध समरे क्रुद्धो जत्रुदेशे महाबलः १८
ततः प्रहस्याधिरथिर्विक्षिपन्धनुरुत्तमम्
मुमोच निशितान्बाणान्पीडयन्सुमहाबलः
तान्प्रत्यविध्यद्राधेयः पञ्चभिः पञ्चभिः शरैः १९
सात्यकेस्तु धनुश्छित्त्वा ध्वजं च पुरुषर्षभः
अथैनं नवभिर्बाणैराजघान स्तनान्तरे २०
भीमसेनस्तु तं क्रुद्धो विव्याध त्रिंशता शरैः
सारथिं च त्रिभिर्बाणैराजघान परन्तपः २१
विरथान्द्रौपदेयांश्च चकार पुरुषर्षभः
अक्ष्णोर्निमेषमात्रेण तदद्भुतमिवाभवत् २२
विमुखीकृत्य तान्सर्वाञ्शरैः संनतपर्वभिः
पाञ्चालानहनच्छूरश्चेदीनां च महारथान् २३
ते वध्यमानाः समरे चेदिमत्स्या विशां पते
कर्णमेकमभिद्रुत्य शरसङ्घैः समार्दयन्
ताञ्जघान शितैर्बाणैः सूतपुत्रो महारथः २४
एतदत्यद्भुतं कर्णे दृष्टवानस्मि भारत
यदेकः समरे शूरान्सूतपुत्रः प्रतापवान् २५
यतमानान्परं शक्त्यायोधयत्तांश्च धन्विनः
पाण्डवेयान्महाराज शरैर्वारितवान्रणे २६
तत्र भारत कर्णस्य लाघवेन महात्मनः
तुतुषुर्देवताः सर्वाः सिद्धाश्च परमर्षयः २७
अपूजयन्महेष्वासा धार्तराष्ट्रा नरोत्तमम्
कर्णं रथवरश्रेष्ठं श्रेष्ठं सर्वधनुष्मताम् २८
ततः कर्णो महाराज ददाह रिपुवाहिनीम्
कक्षमिद्धो यथा वह्निर्निदाघे ज्वलितो महान् २९

ते वध्यमानाः कर्णेन पाण्डवेयास्ततस्ततः
प्राद्रवन्त रणे भीताः कर्णं दृष्ट्वा महाबलम् ३०
तत्राक्रन्दो महानासीत्पाञ्चालानां महारणे
वध्यतां सायकैस्तीक्ष्णैः कर्णचापवरच्युतैः ३१
तेन शब्देन वित्रस्ता पाण्डवानां महाचमूः
कर्णमेकं रणे योधं मेनिरे तत्र शात्रवाः ३२
तत्राद्भुतं परं चक्रे राधेयः शत्रुकर्शनः
यदेकं पाण्डवाः सर्वे न शेकुरभिवीक्षितुम् ३३
यथौघः पर्वतश्रेष्ठमासाद्याभिप्रदीर्यते
तथा तत्पाण्डवं सैन्यं कर्णमासाद्य दीर्यते ३४
कर्णोऽपि समरे राजन्विधूमोऽग्निरिव ज्वलन्
दहंस्तस्थौ महाबाहुः पाण्डवानां महाचमूम् ३५
शिरांसि च महाराज कर्णांश्चञ्चलकुण्डलान्
बाहूंश्च वीरो वीराणां चिच्छेद लघु चेषुभिः ३६
हस्तिदन्तान्त्सरूनखड्गान्ध्वजाञ्शक्तीर्हयान्गजान्
रथांश्च विविधान्राजन्पताका व्यजनानि च ३७
अक्षेषायुगयोक्त्राणि चक्राणि विविधानि च
चिच्छेद शतधा कर्णो योधव्रतमनुष्ठितः ३८
तत्र भारत कर्णेन निहतैर्गजवाजिभिः
अगम्यरूपा पृथिवी मांसशोणितकर्दमा ३९
विषमं च समं चैव हतैरश्वपदातिभिः
रथैश्च कुञ्जरैश्चैव न प्राज्ञायत किञ्चन ४०
नापि स्वे न परे योधाः प्राज्ञायन्त परस्परम्
घोरे शरान्धकारे तु कर्णास्त्रे च विजृम्भिते ४१
राधेयचापनिर्मुक्तैः शरैः काञ्चनभूषितैः
संछादिता महाराज यतमाना महारथाः ४२
ते पाण्डवेयाः समरे कर्णेन स्म पुनः पुनः
अभज्यन्त महाराज यतमाना महारथाः ४३
मृगसंघान्यथा क्रुद्धः सिंहो द्रावयते वने
कर्णस्तु समरे योधांस्तत्र तत्र महायशाः

कालयामास तत्सैन्यं यथा पशुगणान्वृकः ४४
दृष्ट्वा तु पाण्डवीं सेनां धार्तराष्ट्राः पराङ्मुखीम्
अभिजग्मुर्महेष्वासा रुवन्तो भैरवान्रवान् ४५
दुर्योधनो हि राजेन्द्र मुदा परमया युतः
वादयामास संहृष्टो नानावाद्यानि सर्वशः ४६
पाञ्चालापि महेष्वासा भग्ना भग्ना नरोत्तमाः
न्यवर्तन्त यथा शूरा मृत्युं कृत्वा निवर्तनम् ४७
तान्निवृत्तान्रणे शूरान्राधेयः शत्रुतापनः
अनेकशो महाराज बभञ्ज पुरुषर्षभः ४८
तत्र भारत कर्णेन पाञ्चाला विंशती रथाः
निहताः सादयः क्रोधाच्चेदयश्च परःशताः ४९
कृत्वा शून्यान्रथोपस्थान्वाजिपृष्ठांश्च भारत
निर्मनुष्यान्गजस्कन्धान्पादातांश्चैव विद्रुतान् ५०
आदित्य इव मध्याह्ने दुर्निरीक्ष्यः परन्तपः
कालान्तकवपुः क्रूरः सूतपुत्रश्चचार ह ५१
एवमेतान्महाराज नरवाजिरथद्विपान्
हत्वा तस्थौ महेष्वासः कर्णोऽरिगणसूदनः ५२
यथा भूतगणान्हत्वा कालस्तिष्ठेन्महाबलः
तथा स सोमकान्हत्वा तस्थावेको महारथः ५३
तत्राद्भुतमपश्याम पाञ्चालानां पराक्रमम्
वध्यमानापि कर्णेन नाजहू रणमूर्धनि ५४
राजा दुःशासनश्चैव कृपः शारद्वतस्तथा
अश्वत्थामा कृतवर्मा शकुनिश्चापि सौबलः
न्यहनन्पाण्डवीं सेनां शतशोऽथ सहस्रशः ५५
कर्णपुत्रौ च राजेन्द्र भ्रातरौ सत्यविक्रमौ
अनाशयेतां बलिनः पाञ्चालान्वै ततस्ततः
तत्र युद्धं तदा ह्यासीत्क्रूरं विशसनं महत् ५६
तथैव पाण्डवाः शूरा धृष्टद्युम्नशिखण्डिनौ
द्रौपदेयाश्च संक्रुद्धा अभ्यघ्नंस्तावकं बलम् ५७
एवमेष क्षयो वृत्तः पाण्डवानां ततस्ततः

तावकानामपि रणे भीमं प्राप्य महाबलम् ५८
इति श्रीमहाभारते कर्णपर्वणि षट्पञ्चाशोऽध्यायः ५६

सप्तपञ्चाशोऽध्यायः

सञ्जय उवाच
अर्जुनस्तु महाराज कृत्वा सैन्यं पृथग्विधम्
सूतपुत्रं सुसंरब्धं दृष्ट्वा चैव महारणे १
शोणितोदां महीं कृत्वा मांसमज्जास्थिवाहिनीम्
वासुदेवमिदं वाक्यमब्रवीत्पुरुषर्षभ २
एष केतू रणे कृष्ण सूतपुत्रस्य दृश्यते
भीमसेनादयश्चैते योधयन्ति महारथान्
एते द्रवन्ति पाञ्चालाः कर्णात्त्रस्ता जनार्दन ३
एष दुर्योधनो राजा श्वेतच्छत्रेण भास्वता
कर्णेन भग्नान्पाञ्चालान्द्रावयन्बहु शोभते ४
कृपश्च कृतवर्मा च द्रौणिश्चैव महाबलः
एते रक्षन्ति राजानं सूतपुत्रेण रक्षिताः
अवध्यमानास्तेऽस्माभिर्घातयिष्यन्ति सोमकान् ५
एष शल्यो रथोपस्थे रश्मिसंचारकोविदः
सूतपुत्ररथं कृष्ण वाहयन्बहु श्भते ६
तत्र मे बुद्धिरुत्पन्ना वाहयात्र महारथम्
नाहत्वा समरे कर्णं निवर्तिष्ये कथञ्चन ७
राधेयोऽप्यन्यथा पार्थान्सृञ्जयांश्च महारथान्
निःशेषान्समरे कुर्यात्पश्यतोर्नौ जनार्दन ८
ततः प्रायाद्रथेनाशु केशवस्तव वाहिनीम्
कर्णं प्रति महेष्वासं द्वैरथे सव्यसाचिना ९
प्रयातश्च महाबाहुः पाण्डवानुज्ञया हरिः
आश्वासयन्रथेनैव पाण्डुसैन्यानि सर्वशः १०
रथघोषः स स्त्रंगामे पाण्डवेयस्य संबभौ
वासवाशनितुल्यस्य महौघस्येव मारिष ११
महता रथघोषेण पाण्डवः सत्यविक्रमः

अभ्ययादप्रमेयात्मा निजयस्तव वाहिनीम् १२
तमायान्तं समीक्ष्यैव श्वेताश्वं कृष्णसारथिम्
मद्रराजोऽब्रवीत्कर्णं केतुं दृष्ट्वा महात्मनः १३
अयं स रथ आयाति श्वेताश्वः कृष्णसारथिः
निघ्नन्नमित्रान्समरे यं कर्ण परिपृच्छसि १४
एष तिष्ठति कौन्तेयः संस्पृशन्गाण्डिवं धनुः
तं हनिष्यसि चेदद्य तन्नः श्रेयो भविष्यति १५
एषा विदीर्यते सेना धार्तराष्ट्री समन्ततः
अर्जुनस्य भयात्तूर्णं निघ्नतः शात्रवान्बहून् १६
वर्जयन्सर्वसैन्यानि त्वरते हि धनञ्जयः
त्वदर्थमिति मन्येऽह यथास्योदीर्यते वपुः १७
न ह्यवस्थाप्यते पार्थो युयुत्सुः केनचित्सह
त्वामृते क्रोधदीप्तो हि पीड्यमाने वृकोदरे १८
विरथं धर्मराजं च दृष्ट्वा सुदृढविक्षतम्
शिखण्डिनं सात्यकिं च धृष्टद्युम्नं च पार्षतम् १९
द्रौपदेयान्युधामन्युमुत्तमौजसमेव च
नकुलं सहदेवं च भ्रातरौ द्वौ समीक्ष्य च २०
सहसैकरथः पार्थस्त्वामभ्येति परन्तप
क्रोधरक्तेक्षणः क्रुद्धो जिघांसुः सर्वधन्विनाम् २१
त्वरितोऽभिपतत्यस्मांस्त्यक्त्वा सैन्यान्यसंशयम्
त्वं कर्ण प्रतियाह्येनं नास्त्यन्यो हि धनुर्धरः २२
न तं पश्यामि लोकेऽस्मिंस्त्वत्तोऽप्यन्यं धनुर्धरम्
अर्जुनं समरे क्रुद्धं यो वेलामिव धारयेत् २३
न चास्य रक्षां पश्यामि पृष्ठतो न च पार्श्वतः
एक एवाभियाति त्वां पश्य साफल्यमात्मनः २४
त्वं हि कृष्णौ रणे शक्तः संसाधयितुमाहवे
तवैष भारो राधेय प्रत्युद्याहि धनञ्जयम् २५
त्वं कृतो ह्येव भीष्मेण द्रोणद्रौणिकृपैरपि
सव्यसाचिप्रतिरथस्तं निवर्तय पाण्डवम् २६
लेलिहानं यथा सर्पं गर्जन्तमृषभं यथा

लयस्थितं यथा व्याघ्रं जहि कर्ण धनञ्जयम् २७
एते द्रवन्ति समरे धार्तराष्ट्रा महारथाः
अर्जुनस्यभयात्तूर्णं निरपेक्षा जनाधिपाः २८
द्रवतामथ तेषां तु युधि नान्योऽस्ति मानवः
भयहा यो भवेद्वीर त्वामृते सूतनन्दन २९
एते त्वां कुरवः सर्वे द्वीपमासाद्य संयुगे
विष्ठिताः पुरुषव्याघ्र त्वत्तः शरणकाङ्क्षिणः ३०
वैदेहाम्बष्ठकाम्बोजास्तथा नग्नजितस्त्वया
गान्धाराश्च यया धृत्या जिताः संख्ये सुदुर्जयाः ३१
तां धृतिं कुरु राधेय ततः प्रत्येहि पाण्डवम्
वासुदेवं च वार्ष्णेयं प्रीयमाणं किरीटिना ३२
कर्ण उवाच
प्रकृतिस्थो हि मे शल्य इदानीं संमतस्तथा
प्रतिभासि महाबाहो विभीश्चैव धनञ्जयात् ३३
पश्य बाह्वोर्बलं मेऽद्य शिक्षितस्य च पश्य मे
एकोऽद्य निहनिष्यामि पाण्डवानां महाचमूम् ३४
कृष्णौ च पुरुषव्याघ्रौ तच्च सत्यं ब्रवीमि ते
नाहत्वा युधि तौ वीरावपयास्ये कथंचन ३५
स्वप्स्ये वा निहतस्ताभ्यामसत्यो हि रणे जयः
कृतार्थो वा भविष्यामि हत्वा तावथ वा हतः ३६
नैतादृशो जातु बभूव लोके रथोत्तमो यावदनुश्रुतं नः
तमीदृशं प्रतियोत्स्यामि पार्थं महाहवे पश्य च पौरुषं मे ३७
रथे चरत्येष रथप्रवीरः शीघ्रैर्हयैः कौरवराजपुत्रः
स वाद्य मां नेष्यति कृच्छ्रमेतत्कर्णस्यान्तादेतदन्ताः स्थ सर्वे ३८
अस्वेदिनौ राजपुत्रस्य हस्ताववेपिनौ जातकिणौ बृहन्तौ
दृढायुधः कृतिमान्क्षिप्रहस्तो न पाण्डवेयेन समोऽस्ति योधः ३९
गृह्णात्यनेकानपि कङ्कपत्रानेकं यथा तान्क्षितिपान्प्रमथ्य
ते क्रोशमात्रं निपतन्त्यमोघाः कस्तेन योधोऽस्ति समः पृथिव्याम् ४०
अतोषयत्पाण्डवेयो हुताशं कृष्णद्वितीयोऽतिरथस्तरस्वी
लेभे चक्रं यत्र कृष्णो महात्मा धनुर्गाण्डीवं पाण्डवः सव्यसाची ४१

श्वेताश्वयुक्तं च सुघोषमग्र्यं रथं महाबाहुरदीनसत्त्वः
महेषुधी चाक्षयौ दिव्यरूपौ शस्त्राणि दिव्यानि च हव्यवाहात् ४२
तथेन्द्र लोके निजघान दैत्यानसंख्येयान्कालकेयांश्च सर्वान्
लेभे शङ्खं देवदत्तं स्म तत्र को नाम तेनाभ्यधिकः पृथिव्याम् ४३
महादेवं तोषयामास चैव साक्षात्सुयुद्धेन महानुभावः
लेभे ततः पाशुपतं सुघोरं त्रैलोक्यसंहारकरं महास्त्रम् ४४
पृथक्पृथग्लोकपालाः समेता ददुर्ह्यस्त्राण्यप्रमेयाणि यस्य
यैस्ताञ्जघानाशु रणे नृसिंहान्स कालखञ्जानसुरान्समेतान् ४५
तथा विराटस्य पुरे समेतान्सर्वानस्मानेकरथेन जित्वा
जहार तद्गोधनमाजिमध्ये वस्त्राणि चादत्त महारथेभ्यः ४६
तमीदृशं वीर्यगुणोपपन्नं कृष्णद्वितीयं वरये रणाय
अनन्तवीर्येण च केशवेन नारायणेनाप्रतिमेन गुप्तम् ४७
वर्षायुतैर्यस्य गुणा न शक्या वक्तुं समेतैरपि सर्वलोकैः
महात्मनः शङ्खचक्रासिपाणेर्विष्णोर्जिष्णोर्वसुदेवात्मजस्य
भयं मे वै जायते साध्वसं च दृष्ट्वा कृष्णावेकरथे समेतौ ४८
उभौ हि शूरौ कृतिनौ दृढास्त्रौ महारथौ संहननोपपन्नौ
एतादृशौ फल्गुनवासुदेवौ कोऽन्य प्रतीयान्मदृते नु शल्य ४९
एतावाहं युधि वा पातयिष्ये मां वा कृष्णौ निहनिष्यतोऽद्य
इति ब्रुवञ्शल्यममित्रहन्ता कर्णो रणे मेघ इवोन्ननाद ५०
अभ्येत्य पुत्रेण तवाभिनन्दितः समेत्य चोवाच कुरुप्रवीरान्
कृपं च भोजं च महाभुजावुभौ तथैव गान्धारनृपं सहानुजम्
गुरोः सुतं चावरजं तथात्मनः पदातिनोऽथ द्विपसादिनोऽन्यान् ५१
निरुन्धताभिद्रवताच्युतार्जुनौ श्रमेण संयोजयताशु सर्वतः
यथा भवद्भिर्भृशविक्षतावुभौ सुखेन हन्यामहमद्य भूमिपाः ५२
तथेति चोक्त्वा त्वरिताः स्म तेऽजुनं जिघांसवो वीरतमाः समभ्ययुः
नदीनदान्भूरिजलो महार्णवो यथा तथा तान्समरेऽजुनोऽग्रसत् ५३
न सन्दधानो न तथा शरोत्तमान्प्रमुञ्चमानो रिपुभिः प्रदृश्यते
धनञ्जयस्तस्य शरैश्च दारिता हताश्च पेतुर्नरवाजिकुञ्जराः ५४
शरार्चिषं गाण्डिवचारुमण्डलं युगान्तसूर्यप्रतिमानतेजसम्
न कौरवाः शेकुरुदीक्षितुं जयं यथा रविं व्याधितचक्षुषो जनाः ५५

तमभ्यधावद्विसृजञ्शरान्कृपस्तथैव भोजस्तव चात्मजः स्वयम्
जिघांसुभिस्तान्कुशलैः शरोत्तमान्महाहवे संजवितान्प्रयत्नतः
शरैः प्रचिच्छेद स पाण्डवस्त्वरन्पराभिनद्वक्षसि च त्रिभिस्त्रिभिः ५६
स गाण्डिवाभ्यायतपूर्णमण्डलस्तपन्रिपूनर्जुन भास्करो बभौ
शरोग्ररश्मिः शुचिचक्रमध्यगो यथैव सूर्यः परिवेषगस्तथा ५७
अथाग्र्यबाणैर्दशभिर्धनञ्जयं पराभिनद्द्रोणसुतोऽच्युतं त्रिभिः
चतुर्भिरश्वांश्चतुरः कपिं तथा शरैः स नाराचवरैरवाकिरत् ५८
तथा तु तत्तत्स्फुरदात्तकार्मुकं त्रिभिः शरैर्यन्तृशिरः क्षुरेण
हयांश्चतुर्भिश्चतुरस्त्रिभिर्ध्वजं धनञ्जयो द्रौणिरथान्यपातयत् ५९
स रोषपूर्णोऽशनिवज्रहाटकैरलंकृतं तक्षकभोगवर्चसम्
सुबन्धनं कार्मुकमन्यदाददे यथा महाहिप्रवरं गिरेस्तथा ६०
स्वमायुधं चोपविकीर्य भूतले धनुश्च कृत्वा सगुणं गुणाधिकः
समानयानावजितौ नरोत्तमौ शरोत्तमैर्द्रौणिरविध्यदन्तिकात् ६१
कृपश्च भोजश्च तथात्मजश्च ते तमोनुदं वारिधरा इवापतन्
कृपस्य पार्थः सशरं शरासनं हयान्ध्वजं सारथिमेव पत्रिभिः ६२
शरैः प्रचिच्छेद तवात्मजस्य ध्वजं धनुश्च प्रचकर्त नर्दतः
जघान चाश्वान्कृतवर्मणः शुभान्ध्वजं च चिच्छेद ततः प्रतापवान् ६३
सवाजिसूतेष्वसनान्सकेतनाञ्जघान नागाश्वरथांस्त्वरंश्च सः
ततः प्रकीर्णं सुमहद्बलं तव प्रदारितं सेतुरिवाम्भसा यथा
ततोऽजुनस्याशु रथेन केशवश्चकार शत्रूनपसव्यमातुरान् ६४
ततः प्रयान्तं त्वरितं धनञ्जयं शतक्रतुं वृत्रनिजघ्नुषं यथा
समन्वधावन्पुनरुच्छ्रितैर्ध्वजै रथैः सुयुक्तैरपरे युयुत्सवः ६५
अथाभिसृत्य प्रतिवार्य तानरीन्धनञ्जयस्याभि रथं महारथाः
शिखण्डिशैनेययमाः शितैः शरैर्विदारयन्तो व्यनदन्सुभैरवम् ६६
ततोऽभिजघ्नुः कुपिताः परस्परं शरैस्तदाञ्जोगतिभिः सुतेजनैः
कुरुप्रवीराः सह सृञ्जयैर्यथासुराः पुरा देववरैरयोधयन् ६७
जयेप्सवः स्वर्गमनाय चोत्सुकाः पतन्ति नागाश्वरथाः परन्तप
जगर्जरुच्चैर्बलवच्च विव्यधुः शरैः सुमुक्तैरितरेतरं पृथक् ६८
शरान्धकारे तु महात्मभिः कृते महामृधे योधवरैः परस्परम्
बभुर्दशाशा न दिवं च पार्थिव प्रभा च सूर्यस्य तमोवृताभवत् ६९

इति श्रीमहाभारते कर्णपर्वणि सप्तपञ्चाशोऽध्यायः ५७

अष्टपञ्चाशोऽध्यायः

सञ्जय उवाच
राजन्कुरूणां प्रवरैर्बलैर्भीममभिद्रुतम्
मज्जन्तमिव कौन्तेयमुज्जिहीर्षुर्धनञ्जयः १
विमृद्य सूतपुत्रस्य सेनां भारत सायकैः
प्राहिणोन्मृत्युलोकाय परवीरान्धनञ्जयः २
ततोऽस्याम्बरमावृत्य शरजालानि भागशः
अदृश्यन्त तथान्ये च निघ्नन्तस्तव वाहिनीम् ३
स पक्षिसङ्घाचरितमाकाशं पूरयञ्शरैः
धनञ्जयो महाराज कुरूणामन्तकोऽभवत् ४
ततो भल्लैः क्षुरप्रैश्च नाराचैर्निर्मलैरपि
गात्राणि प्राक्षिणोत्पार्थः शिरांसि च चकर्त ह ५
छिन्नगात्रैर्विकवचैर्विशिरस्कैः समन्ततः
पतितैश्च पतद्भिश्च योधैरासीत्समावृतम् ६
धनञ्जयशराभ्यस्तैः स्यन्दनाश्वनरद्विपैः
रणभूमिरभूद्राजन्महावैतरणी यथा ७
ईषाचक्राक्षभङ्गैश्च व्यश्वैः साश्वैश्च युध्यताम्
ससूतैर्हतसूतैश्च रथैः स्तीर्णाभवन्मही ८
सुवर्णवर्मसंनाहैर्योधैः कनकभूषणैः
आस्थिताः कृतवर्माणो भद्रा नित्यमदा द्विपाः
क्रुद्धाः क्रुद्धैर्महामात्रैः प्रेषितार्जुनमभ्ययुः ९
चतुःशताः शरवर्षैर्हताः पेतुः किरीटिना
पर्यस्तानीव शृङ्गाणि ससत्त्वानि महागिरेः १०
धनञ्जयशराभ्यस्तैः स्तीर्णा भूर्वरवारणैः
अभिपेदेऽजुनरथो घनान्भिन्दन्निवांशुमान् ११
हतैर्गजमनुष्याश्वैर्भग्नैश्च बहुधा रथैः
विशस्त्रपत्रकवचैर्युद्धशौण्डैर्गतासुभिः
अपविद्धायुधैर्मार्गः स्तीर्णोऽभूत्फल्गुनेन वै १२

व्यस्फूर्जयच्च गाण्डीवं सुमहद्भैरवस्वनम्
घोरो वज्रविनिष्पेषः स्तनयित्नोरिवाम्बरे १३
ततः प्रादीर्यत चमूर्धनञ्जयशराहता
महावात समाविद्धा महानौरिव सागरे १४
नानारूपाः प्राहरणाः शरा गाण्डीवचोदिताः
अलातोल्काशनिप्रख्यास्तव सैन्यं विनिर्दहन् १५
महागिरौ वेणुवनं निशि प्रज्वलितं यथा
तथा तव महत्सैन्यं प्रास्फुरच्छरपीडितम् १६
संपिष्टदग्धविध्वस्तं तव सैन्यं किरीटिना
हतं प्रविहतं बाणैः सर्वतः प्रद्रुतं दिशः १७
महावने मृगगणा दावाग्निग्रसिता यथा
कुरवः पर्यवर्तन्त निर्दग्धा सव्यसाचिना १८
उत्सृज्य हि महाबाहुं भीमसेनं तदा रणे
बलं कुरूणामुद्विग्नं सर्वमासीत्पराङ्मुखम् १९
ततः कुरुषु भग्नेषु बीभत्सुरपराजितः
भीमसेनं समाद्याय मुहूर्तं सोऽभ्यवर्तत २०
समागम्य च भीमेन मन्त्रयित्वा च फल्गुनः
विशल्यमरुजं चास्मै कथयित्वा युधिष्ठिरम् २१
भीमसेनाभ्यनुज्ञातस्ततः प्रायाद्धनञ्जयः
नादयन्रथघोषेण पृथिवीं द्यां च भारत २२
ततः परिवृतो भीमैर्दशभिः शत्रुपुङ्गवैः
दुःशासनादवरजैस्तव पुत्रैर्धनञ्जयः २३
ते तमभ्यर्दयन्बाणैरुल्काभिरिव कुञ्जरम्
आततेष्वसनाः क्रूरा नृत्यन्त इव भारत २४
अपसव्यांस्तु तांश्चक्रे रथेन मधुसूदनः
ततस्ते प्राद्रवञ्शूराः पराङ्मुखरथेऽजुने २५
तेषामापततां केतून्रथांश्चापानि सायकान्
नाराचैरर्धचन्द्रैश्च क्षिप्रं पार्थो न्यपातयत् २६
अथान्यैर्दशभिर्भल्लैः शिरांस्येषां न्यपातयत्
रोषसंरक्तनेत्राणि संदष्टौष्ठानि भूतले

तानि वक्त्राणि विबभुर्व्योम्नि तारागणा इव २७
तांस्तु भल्लैर्महावेगैर्दशभिर्दश कौरवान्
रुक्माङ्गदान्रुक्मपुङ्खैर्विद्ध्वा प्रायादमित्रहा २८
इति श्रीमहाभारते कर्णपर्वणि अष्टपञ्चाशोऽध्यायः ५८

एकोनषष्टितमोऽध्यायः

सञ्जय उवाच
तं तु यान्तं महावेगैरश्वैः कपिवरध्वजम्
युद्धायाभ्यद्रवन्वीराः कुरूणां नवती रथाः
परिवव्रुर्नरव्याघ्रा नरव्याघ्रं रणेऽर्जुनम् १
कृष्णः श्वेतान्महावेगानश्वान्कनकभूषणान्
मुक्ताजालप्रतिच्छन्नान्प्रैषीत्कर्णरथं प्रति २
ततः कर्णरथं यान्तमरीन्घ्नन्तं धनञ्जयम्
बाणवर्षैरभिघ्नन्तः संशप्तकरथा ययुः ३
त्वरमाणांस्तु तान्सर्वान्ससूतेष्वसनध्वजान्
जघान नवतिं वीरानर्जुनो निशितैः शरैः ४
तेऽपतन्त हता बाणैर्नानारूपैः किरीटिना
सविमाना यथा सिद्धाः स्वर्गात्पुण्यक्षये तथा ५
ततः सरथनागाश्वाः कुरवः कुरुसत्तम
निर्भया भरतश्रेष्ठमभ्यवर्तन्त फल्गुनम् ६
तदायस्तममुक्तास्त्रमुदीर्णवरवारणम्
पुत्राणां ते महत्सैन्यं समरौत्सीद्धनञ्जयः ७
शक्त्यृष्टितोमरप्रासैर्गदानिस्त्रिंशसायकैः
प्राच्छादयन्महेष्वासाः कुरवः कुरुनन्दनम् ८
तां कुरूणां प्रविततां शस्त्रवृष्टिं समुद्यताम्
व्यधमत्पाण्डवो बाणैस्तमः सूर्य इवांशुभिः ९
ततो म्लेच्छाः स्थितैर्मत्तैस्त्रयोदशशतैर्गजैः
पार्श्वतोऽभ्यहनन्पार्थं तव पुत्रस्य शासनात् १०
कर्णिनालीकनाराचैस्तोमरैः प्रासशक्तिभिः
कम्पनैर्भिण्डिपालैश्च रथस्थं पार्थमार्दयन् ११

तामस्त्रवृष्टिं प्रहितां द्विपस्थैर्यवनैः स्मयन्
चिच्छेद निशितैर्भल्लैरर्धचन्द्रैश्च फल्गुनः १२
अथ तान्द्विरदान्सर्वान्नानालिङ्गैर्महाशरैः
सपताकान्सहारोहान्गिरीन्वज्रैरिवाभिनत् १३
ते हेमपुङ्खैरिषुभिराचिता हेममालिनः
हताः पेतुर्महानागाः साग्निज्वाला इवाद्रयः १४
ततो गाण्डीवनिर्घोषो महानासीद्विशां पते
स्तनतां कूजतां चैव मनुष्यगजवाजिनाम् १५
कुञ्जराश्च हता राजन्प्राद्रवंस्ते समन्ततः
अश्वाश्च पर्यधावन्त हतारोहा दिशो दश १६
रथा हीना महाराज रथिभिर्वाजिभिस्तथा
गन्धर्वनगराकारा दृश्यन्ते स्म सहस्रशः १७
अश्वारोहा महाराज धावमानास्ततस्ततः
तत्र तत्रैव दृश्यन्ते पतिताः पार्थसायकैः १८
तस्मिन्क्षणे पाण्डवस्य बाह्वोर्बलमदृश्यत
यत्सादिनो वारणांश्च रथांश्चैकोऽजयद्युधि १९
ततस्त्र्यङ्गेण महता बलेन भरतर्षभ
दृष्ट्वा परिवृतं राजन्भीमसेनः किरीटिनम् २०
हतावशेषानुत्सृज्य त्वदीयान्कतिचिद्रथान्
जवेनाभ्यद्रवद्राजन्धनञ्जयरथं प्रति २१
ततस्तत्प्राद्रवत्सैन्यं हतभूयिष्ठमातुरम्
दृष्ट्वा यदर्जुनं भीमो जगाम भ्रातरं प्रति २२
हतावशिष्टांस्तुरगानर्जुनेन महाजवान्
भीमो व्यधमदभ्रान्तो गदापाणिर्महाहवे २३
कालरात्रिमिवात्युग्रां नरनागाश्वभोजनाम्
प्राकाराट्टपुरद्वारदारणीमतिदारुणाम् २४
ततो गदां नृनागाश्वेष्वाशु भीमो व्यवासृजत्
सा जघान बहूनश्वानश्वारोहांश्च मारिष २५
कांस्यायसतनुत्रांस्तान्नरानश्वांश्च पाण्डवः
पोथयामास गदया सशब्दं तेऽपतन्हताः २६

हत्वा तु तद्गजानीकं भीमसेनो महाबलः
पुनः स्वरथमास्थाय पृष्ठतोऽर्जुनमन्वगात् २७
हतं पराङ्मुखप्रायं निरुत्साहं परं बलम्
व्यालम्बत महाराज प्रायशः शस्त्रवेष्टितम् २८
विलम्बमानं तत्सैन्यमप्रगल्भमवस्थितम्
दृष्ट्वा प्राच्छादयद्बाणैरर्जुनः प्राणतापनैः २९
ततः कुरूणामभवदार्तनादो महामृधे
रथाश्वनागासुहरैर्वध्यतामर्जुनेषुभिः ३०
हाहाकृतं भृशं तस्थौ लीयमानं परस्परम्
अलातचक्रवत्सैन्यं तदाभ्रमत तावकम् ३१
आदीप्तं तव तत्सैन्यं शरैश्छिन्नतनुच्छदम्
आसीत्स्वशोणितक्लिन्नं फुल्लाशोकवनं यथा ३२
तद्दृष्ट्वा कुरवस्तत्र विक्रान्तं सव्यसाचिनः
निराशाः समपद्यन्त सर्वे कर्णस्य जीविते ३३
अविषह्यं तु पार्थस्य शरसंपातमाहवे
मत्वा न्यवर्तन्कुरवो जिता गाण्डीवधन्वना ३४
ते हित्वा समरे पार्थं वध्यमानाश्च सायकैः
प्रदुद्रुवुर्दिशो भीताश्चुक्रुशुश्चापि सूतजम् ३५
अभ्यद्रवत तान्पार्थः किरञ्शरशतान्बहून्
हर्षयन्पाण्डवान्योधान्भीमसेनपुरोगमान् ३६
पुत्रास्तु ते महाराज जग्मुः कर्णरथं प्रति
अगाधे मज्जतां तेषां द्वीपः कर्णोऽभवत्तदा ३७
कुरवो हि महाराज निर्विषाः पन्नगा इव
कर्णमेवोपलीयन्त भयाद्गाण्डीवधन्वनः ३८
यथा सर्वाणि भूतानि मृत्योर्भीतानि भारत
धर्ममेवोपलीयन्ते कर्मवन्ति हि यानि च ३९
तथा कर्णं महेष्वासं पुत्रास्तव नराधिप
उपालीयन्त सन्त्रासात्पाण्डवस्य महात्मनः ४०
ताञ्शोणितपरिक्लिन्नान्विषमस्थाञ्शरातुरान्
मा भैष्टेत्यब्रवीत्कर्णो ह्यभितो मामितेति च ४१

संभग्नं हि बलं दृष्ट्वा बलात्पार्थेन तावकम्
धनुर्विस्फारयन्कर्णस्तस्थौ शत्रुजिघांसया
पाञ्चालान्पुनराधावत्पश्यतः सव्यसाचिनः ४२
ततः क्षणेन क्षितिपाः क्षतजप्रतिमेक्षणाः
कर्णं ववर्षुर्बाणौघैर्यथा मेघा महीधरम् ४३
ततः शरसहस्राणि कर्णमुक्तानि मारिष
व्ययोजयन्त पाञ्चालान्प्राणैः प्राणभृतां वर ४४
ततो रणो महानासीत्पाञ्चालानां विशां पते
वध्यतां सूतपुत्रेण मित्रार्थेऽमित्रघातिनाम् ४५
इति श्रीमहाभारते कर्णपर्वणि एकोनषष्टितमोऽध्यायः ५९

षष्टितमोऽध्यायः

सञ्जय उवाच
ततः कर्णः कुरुषु प्रद्रुतेषु वरूथिना श्वेतहयेन राजन्
पाञ्चालपुत्रान्व्यधमत्सूतपुत्रो महेषुभिर्वात इवाभ्रसङ्घान् १
सूतं रथादञ्जलिकेन पात्य जघान चाश्वाञ्जनमेजयस्य
शतानीकं सुतसोमं च भल्लैरवाकिरद्धनुषी चाप्यकृन्तत् २
धृष्टद्युम्नं निर्बिभेदाथ षड्भिर्जघान चाश्वं दक्षिणं तस्य संख्ये
हत्वा चाश्वान्सात्यकेः सूतपुत्रः कैकेयपुत्रं न्यवधीद्विशोकम् ३
तमभ्यधावन्निहते कुमारे कैकेयसेनापतिरुग्रधन्वा
शरैर्विभिन्नं भृशमुग्रवेगैः कर्णात्मजं सोऽभ्यहनत्सुषेणम् ४
तस्यार्धचन्द्रैस्त्रिभिरुच्चकर्त प्रसह्य बाहू च शिरश्च कर्णः
स स्यन्दनाद्गामपतद्गतासुः परश्वधैः शाल इवावरुग्णः ५
हताश्वमञ्जोगतिभिः सुषेणः शिनिप्रवीरं निशितैः पृषत्कैः
प्रच्छाद्य नृत्यन्निव सौतिपुत्रः शैनेयबाणाभिहतः पपात ६
पुत्रे हते क्रोधपरीतचेताः कर्णः शिनीनामृषभं जिघांसुः
हतोऽसि शैनेय इति ब्रुवन्स व्यवासृजद्बाणममित्रसाहम् ७
स तस्य चिच्छेद शरं शिखण्डी त्रिभिस्त्रिभिश्च प्रतुतोद कर्णम्
शिखण्डिनः कार्मुकं स ध्वजं च च्छित्त्वा शराभ्यामहनत्सुजातम् ८
शिखण्डिनं षड्भिरविध्यदुग्रो दान्तो धार्ष्टद्युम्नोशिरश्चकर्त

अथाभिनत्सुतसोमं शरेण स संशितेनाधिरथिर्महात्मा ९
अथाक्रन्दे तुमुले वर्तमाने धार्ष्टद्युम्ने निहते तत्र कृष्णः
अपाञ्चाल्यं क्रियते याहि पार्थ कर्णं जहीत्यब्रवीद्राजसिंह १०
ततः प्रहस्याशु नरप्रवीरो रथं रथेनाधिरथेर्जगाम
भये तेषां त्राणमिच्छन्सुबाहुरभ्याहतानां रथयूथपेन ११
विस्फार्य गाण्डीवमथोग्रघोषं ज्यया समाहत्य तले भृशं च
बाणान्धकारं सहसैव कृत्वा जघान नागाश्वरथान्नरांश्च १२
तं भीमसेनोऽनु ययौ रथेन पृष्ठे रक्षन्पाण्डवमेकवीरम्
तौ राजपुत्रौ त्वरितौ रथाभ्यां कर्णाय यातावरिभिर्विमुक्तौ १३
अत्रान्तरे सुमहत्सूतपुत्रश्चक्रे युद्धं सोमकान्संप्रमृद्नन्
रथाश्वमातङ्गगणाञ्जघान प्रच्छादयामास दिशः शरैश्च १४
तमुत्तमौजा जनमेजयश्च क्रुद्धौ युधामन्युशिखण्डिनौ च
कर्णं विनेदुः सहिताः पृषत्कैः संमर्दमानाः सह पार्षतेन १५
ते पञ्च पाञ्चालरथाः सुरूपैर्वैकर्तनं कर्णमभिद्रवन्तः
तस्माद्रथाच्च्यावयितुं न शेकुर्धैर्यात्कृतात्मानमिवेन्द्रियाणि १६
तेषां धनूंषि ध्वजवाजिसूतांतूणं पताकाश्च निकृत्य बाणैः
तान्पञ्चभिः स त्वहनत्पृषत्कैः कर्णस्ततः सिंह इवोन्ननाद १७
तस्यास्यतस्तानभिनिघ्नतश्च ज्याबाणहस्तस्य धनुःस्वनेन
साद्रिद्रुमा स्यात्पृथिवी विशीर्णा इत्येव मत्वा जनता व्यषीदत् १८
स शक्रचापप्रतिमेन धन्वना भृशाततेनाधिरथिः शरान्सृजन्
बभौ रणे दीप्तमरीचिमण्डलो यथांशुमाली परिवेषवांस्तथा १९
शिखण्डिनं द्वादशभिः पराभिनच्छितैः शरैः षड्भिरथोत्तमौजसम्
त्रिभिर्युधामन्युमविध्यदाशुगैस्त्रिभिस्त्रिभिः सोमकपार्षतात्मजौ २०
पराजिताः पञ्च महारथास्तु ते महाहवे सूतसुतेन मारिष
निरुद्यमास्तस्थुरमित्रमर्दना यथेन्द्रियार्थात्मवता पराजिताः २१
निमज्जतस्तानथ कर्ण सागरे विपन्ननावो वणिजो यथार्णवे
उद्दध्रिरे नौभिरिवार्णवाद्रथैः सु कल्पितैर्द्रौपदिजाः स्वमातुलान् २२
ततः शिनीनामृषभः शितैः शरैर्निकृत्य कर्णप्रहितानिषून्बहून्
विदार्य कर्णं निशितैरयस्मयैस्तवात्मजं ज्येष्ठमविध्यदष्टभिः २३
कृपोऽथ भोजश्च तवात्मजस्तथा स्वयं च कर्णो निशितैरताडयत्

स तैश्चतुर्भिर्युयुधे यदूत्तमो दिगीश्वरैर्दैत्यपतिर्यथा तथा २४
समानतेनेष्वसनेन कूजता भृशाततेनामितबाणवर्षिणा
बभूव दुर्धर्षतरः स सात्यकिः शरन्नभोमध्यगतो यथा रविः २५
पुनः समासाद्य रथान्सुदंशिताः शिनिप्रवीरं जुगुपुः परंतपाः
समेत्यपाञ्चालरथा महारणे मरुद्गणाः शक्रमिवारिनिग्रहे २६
ततोऽभवद्युद्धमतीव दारुणं तवाहितानां तव सैनिकैः सह
रथाश्वमातङ्गविनाशनं तथा यथा सुराणामसुरैः पुराभवत् २७
रथद्विपा वाजिपदातयोऽपि वा भ्रमन्ति नानाविधशस्त्रवेष्टिताः
परस्परेणाभिहताश्च चस्खलुर्विनेदुरार्ता व्यसवोऽपतन्त च २८
तथा गते भीममभीस्तवात्मजः ससार राजावरजः किरञ्शरैः
तमभ्यधावत्त्वरितो वृकोदरो महारुरुं सिंह इवाभिपेतिवान् २९
ततस्तयोर्युद्धमतीतमानुषं प्रदीव्यतोः प्राण दुरोदरेऽभवत्
परस्परेणाभिनिविष्ट रोषयो रुदग्रयोः शम्बरशक्रयोर्यथा ३०
शरैः शरीरान्तकरैः सुतेजनैर्निजघ्नतुस्तावितरेतरं भृशम्
सकृत्प्रभिन्नाविव वाशितान्तरे महागजौ मन्मथसक्तचेतसौ ३१
तवात्मजस्याथ वृकोदरस्त्वरन्धनुः क्षुराभ्यां ध्वजमेव चाच्छिनत्
ललाटमप्यस्य बिभेद पत्रिणा शिरश्च कायात्प्रजहार सारथेः ३२
स राजपुत्रोऽन्यदवाप्य कार्मुकं वृकोदरं द्वादशभिः पराभिनत्
स्वयं नियच्छंस्तुरगानजिह्मगैः शरैश्च भीमं पुनरभ्यवीवृषत् ३३
इति श्रीमहाभारते कर्णपर्वणि षष्टितमोऽध्यायः ६०

एक षष्टितमोऽध्यायः

सञ्जय उवाच
तत्राकरोद्दुष्करं राजपुत्रो दुःशासनस्तुमुले युध्यमानः
चिच्छेद भीमस्य धनुः क्षुरेण षड्भिः शरैः सारथिमप्यविध्यत् १
ततोऽभिनद्बहुभिः क्षिप्रमेव वरेषुभिर्भीमसेनं महात्मा
स विक्षरन्नाग इव प्रभिन्नो गदामस्मै तुमुले प्राहिणोद्वै २
तयाहरद्दश धन्वन्तराणि दुःशासनं भीमसेनः प्रसह्य
तया हतः पतितो वेपमानो दुःशासनो गदया वेगवत्या ३
हयाः ससूताश्च हता नरेन्द्र चूर्णीकृतश्चास्य रथः पतन्त्या

विध्वस्तवर्माभरणाम्बरस्रग्विचेष्टमानो भृशवेदनार्तः ४
ततः स्मृत्वा भीमसेनस्तरस्वी सापत्नकं यत्प्रयुक्तं सुतैस्ते
रथादवप्लुत्य गतः स भूमौ यत्नेन तस्मिन्प्रणिधाय चक्षुः ५
असिं समुद्धृत्य शितं सुधारं कण्ठे समाक्रम्य च वेपमानम्
उत्कृत्य वक्षः पतितस्य भूमावथापिबच्छोणितमस्य कोष्णम्
आस्वाद्य चास्वाद्य च वीक्षमाणः क्रुद्धोऽतिवेलं प्रजगाद वाक्यम् ६
स्तन्यस्य मातुर्मधुसर्पिषो वा माध्वीकपानस्य च सत्कृतस्य
दिव्यस्य वा तोयरसस्य पानात्पयोदधिभ्यां मथिताच्च मुख्यात्
सर्वेभ्य एवाभ्यधिको रसोऽय मतो ममाद्याहितलोहितस्य ७
एवं ब्रुवाणं पुनराद्रवन्तमास्वाद्य वल्गन्तमतिप्रहृष्टम्
ये भीमसेनं ददृशुस्तदानीं भयेन तेऽपि व्यथिता निपेतुः ८
ये चापि तत्रापतिता मनुष्यास्तेषां करेभ्यः पतितं च शस्त्रम्
भयाच्च संचुक्रुशुरुच्चकैस्ते निमीलिताक्षा ददृशुश्च तन्न ९
ये तत्र भीमं ददृशुः समन्ताद्दौःशासनं तद्रुधिरं पिबन्तम्
सर्वे पलायन्त भयाभिपन्ना नायं मनुष्य इति भाषमाणाः १०
शृणवतां लोकवीराणामिदं वचनमब्रवीत्
एष ते रुधिरं कण्ठात्पिबामि पुरुषाधम
ब्रूहीदानीं सुसंरब्धः पुनर्गौरिति गौरिति ११
प्रमाणकोटयां शयनं कालकूटस्य भोजनम्
दशनं चाहिभिः कष्टं दाहं च जतुवेश्मनि १२
द्यूतेन राज्यहरणमरण्ये वसतिश्च या
इष्वस्त्राणि च स्त्रंगामेष्वसुखानि च वेश्मनि १३
दुःखान्येतानि जानीमो न सुखानि कदाचन
धृतराष्ट्रस्य दौरात्म्यात्सपुत्रस्य सदा वयम् १४
इत्युक्त्वा वचनं राजञ्जयं प्राप्य वृकोदरः
पुनराह महाराज स्मयंस्तौ केशवार्जुनौ १५
दुःशासने यद्रणे संश्रुतं मे तद्वै सर्वं कृतमद्येह वीरौ
अद्यैव दास्याम्यपरं द्वितीयं दुर्योधनं यज्ञपशुं विशस्य
शिरो मृदित्वा च पदा दुरात्मनः शान्तिं लप्स्ये कौरवाणां समक्षम् १६
एतावदुक्त्वा वचनं प्रहृष्टो ननाद चोच्चै रुधिरार्द्रगात्रः

ननर्त चैवातिबलो महात्मा वृत्रं निहत्येव सहस्रनेत्रः १७
इति श्रीमहाभारते कर्णपर्वणि एकषष्टितमोऽध्यायः ६१

द्विषष्टितमोऽध्यायः

सञ्जय उवाच
दुःशासने तु निहते पुत्रास्तव महारथाः
महाक्रोधविषा वीराः समरेष्वपलायिनः
दश राजन्महावीर्या भीमं प्राच्छादयञ्शरैः १
कवची निषङ्गी पाशी दण्डधारो धनुर्धरः
अलोलुपः शलः संधो वातवेगसुवर्चसौ २
एते समेत्य सहिता भ्रातृव्यसनकर्शिताः
भीमसेनं महाबाहुं मार्गणैः समवारयन् ३
स वार्यमाणो विशिखैः समन्तात्तैर्महारथैः
भीमः क्रोधाभिरक्ताक्षः क्रुद्धः काल इवाबभौ ४
तांस्तु भल्लैर्महावेगैर्दशभिर्दशभिः शितैः
रुक्माङ्गदो रुक्मपुङ्खैः पार्थो निन्ये यमक्षयम् ५
हतेषु तेषु वीरेषु प्रदुद्राव बलं तव
पश्यतः सूतपुत्रस्य पाण्डवस्य भयार्दितम् ६
ततः कर्णो महाराज प्रविवेश महारणम्
दृष्ट्वा भीमस्य विक्रान्तमन्तकस्य प्रजास्विव ७
तस्य त्वाकारभावज्ञः शल्यः समितिशोभनः
उवाच वचनं कर्णं प्राप्तकालमरिंदम
मा व्यथां कुरु राधेय नैतत्त्वय्युपपद्यते ८
एते द्रवन्ति राजानो भीमसेनभयार्दिताः
दुर्योधनश्च संमूढो भ्रातृव्यसनदुःखितः ९
दुःशासनस्य रुधिरे पीयमाने महात्मना
व्यापन्नचेतसश्चैव शोकोपहतमन्यवः १०
दुर्योधनमुपासन्ते परिवार्य समन्ततः
कृपप्रभृतयः कर्ण हतशेषाश्च सोदराः ११
पाण्डवा लब्धलक्षाश्च धनंजयपुरोगमाः

त्वामेवाभिमुखाः शूरा युद्धाय समुपास्थिताः १२
स त्वं पुरुषशार्दूल पौरुषे महति स्थितः
क्षत्रधर्मं पुरस्कृत्य प्रत्युद्याहि धनंजयम् १३
भारो हि धार्तराष्ट्रेण त्वयि सर्वः समर्पितः
तमुद्वह महाबाहो यथाशक्ति यथाबलम्
जये स्याद्विपुला कीर्तिर्ध्रुवः स्वर्गः पराजये १४
वृषसेनश्च राधेय संक्रुद्धस्तनयस्तव
त्वयि मोहसमापन्ने पाण्डवानभिधावति १५
एतच्छ्रुत्वा तु वचनं शल्यस्यामिततेजसः
हृदि मानुष्यकं भावं चक्रे युद्धाय सुस्थिरम् १६
ततः क्रुद्धो वृषसेनोऽभ्यधावदातस्थिवांसं स्वरथं हतारिम्
वृकोदरं कालमिवात्तदण्डं गदाहस्तं पोथमानं त्वदीयान् १७
तमभ्यधावन्नकुलः प्रवीरो रोषादमित्रं प्रतुदन्पृषत्कैः
कर्णस्य पुत्रं समरे प्रहृष्टं जिष्णुर्जिघांसुर्मघवेव जम्भम् १८
ततो ध्वजं स्फाटिकचित्रकम्बुं चिच्छेद वीरो नकुलः क्षुरेण
कर्णात्मजस्येष्वसनं च चित्रं भल्लेन जाम्बूनदपट्टनद्धम् १९
अथान्यदादाय धनुः सुशीघ्रं कर्णात्मजः पाण्डवमभ्यविध्यत्
दिव्यैर्महास्त्रैर्नकुलं महास्त्रो दुःशासनस्यापचितिं यियासुः २०
ततःक्रुद्धो नकुलस्तं महात्मा शरैर्महोल्काप्रतिमैरविध्यत्
दिव्यैरस्त्रैरभ्यविध्यच्च सोऽपि कर्णस्य पुत्रो नकुलं कृतास्त्रः २१
कर्णस्य पुत्रो नकुलस्य राजन्सर्वानश्वानक्षिणोदुत्तमास्त्रैः
वनायुजान्सुकुमारस्य शुभ्रानलंकृताञ्जातरूपेण शीघ्रान् २२
ततो हताश्वादवरुह्य यानादादाय चर्म रुचिरं चाष्टचन्द्रम्
आकशसंकाशमसिं गृहीत्वा पोप्लूयमानः खगवच्चचार २३
ततोऽन्तरिक्षे नृवराश्वनागांश्चिच्छेद मार्गान्विचरन्विचित्रान्
ते प्रापतन्नसिना गां विशस्ता यथाश्वमेधे पशवः शमित्रा २४
द्विसाहस्रा विदिता युद्धशौण्डा नानादेश्याः सुभृताः सत्यसंधाः
एकेन शीघ्रं नकुलेन कृत्ताः सारेप्सुनेवोत्तमचन्दनास्ते २५
तमापतन्तं नकुलं सोऽभिपत्य समन्ततः सायकैरभ्यविध्यत्
स तुद्यमानो नकुलः पृषत्कैर्विव्याथ वीरं स चुकोप विद्धः २६

तं कर्णपुत्रो विधमन्तमेकं नराश्वमातङ्गरथप्रवेकान्
क्रीडन्तमष्टादशभिः पृषत्कैर्विव्याध वीरं स चुकोप विद्धः २७
ततोऽभ्यधावत्समरे जिघांसुः कर्णात्मजं पाण्डुसुतो नृवीरः
तस्येषुभिर्व्यधमत्कर्णपुत्रो महारणे चर्म सहस्रतारम् २८
तस्यायसं निशितं तीक्ष्णधारमसिं विकोशं गुरुभारसाहम्
द्विषच्छरीरापहरं सुघोरमाधुन्वतः सर्पमिवोग्ररूपम् २९
क्षिप्रं शरैः षड्भिरमित्रसाहश्चकर्त खड्गं निशितैः सुधारैः
पुनश्च पीतैर्निशितैः पृषत्कैः स्तनान्तरे गाढमथाभ्यविध्यत् ३०
स भीमसेनस्य रथं हताश्वो माद्रीसुतः कर्णसुताभितप्तः
आपुप्लुवे सिंह इवाचलाग्रं संप्रेक्षमाणस्य धनंजयस्य ३१
नकुलमथ विदित्वा छिन्नबाणासनासिं विरथमरिशरार्तं कर्णपुत्रास्त्र भग्नम्
पवनधुतपताका ह्लादिनो वल्गिताश्वा वरपुरुषनियत्तास्ते रथः शीघ्रमीयुः ३२
द्रुपदसुतवरिष्ठाः पञ्च शैनेयषष्ठा द्रुपददुहितृपुत्राः पञ्च चामित्रसाहाः
द्विरदरथनराश्वान्सूदयन्तस्त्वदीयान्भुजगपतिसकाशैर्मार्गणैरात्तशस्त्राः ३३
अथ तव रथमुख्यास्तान्प्रतीयुस्त्वरन्तो हृदिकसुतकृपौ च द्रौणिदुर्योधनौ च
शकुनिशुकवृकाश्च क्राथदेवावृधौ च द्विरदजलदघोषैः स्यन्दनैः कार्मुकैश्च
३४
तव नरवरवर्यास्तान्दशैकं च वीरान्प्रवरशरवराग्र्यैस्ताडयन्तोऽभ्यरुन्धन्
नवजलदसवर्णैर्हस्तिभिस्तानुदीयुर्गिरिशिखरनिकाशैर्भीमवेगैः कुणिन्दाः ३५
सुकल्पिता हैमवता मदोत्कटा रणाभिकामैः कृतिभिः समास्थिताः
सुवर्णजालावतता बभुर्गजास्तथा यथा वै जलदाः सविद्युतः ३६
कुणिन्दपुत्रो दशभिर्महायसैः कृपं ससूताश्वमपीडयद्भृशम्
ततः शरद्वत्सुतसायकैर्हतः सहैव नागेन पपात भूतले ३७
कुणिन्दपुत्रावरजस्तु तोमरैर्दिवाकारांशुप्रतिमैरयस्मयैः
रथं च विक्षोभ्य ननाद नर्दतस्ततोऽस्य गान्धारपतिः शिरोऽहरत् ३८
ततः कुणिन्देषु हतेषु तेष्वथ प्रहृष्टरूपास्तव ते महारथाः
भृशं प्रदध्मुर्लवणाम्बुसंभवान्परांश्च बाणासनपाणयोऽभ्ययुः ३९
अथाभवद्युद्धमतीव दारुणं पुनः कुरूणां सह पाण्डुसृञ्जयैः
शरासिशक्त्यृष्टिगदापरश्वधैर्नराश्वनागासुहरं भृशाकुलम् ४०
रथाश्वमातङ्गपदातिभिस्ततः परस्परं विप्रहतापतन्क्षितौ

यथा सविद्युत्स्तनिता बलाहकाः समास्थिता दिग्भ्य इवोग्रमारुतैः ४१
ततः शतानीकहतान्महागजांस्तथा रथान्पत्तिगणांश्च तावकान्
जघान भोजश्च हयानथापतन्विशस्त्रकृत्ताः कृतवर्मणा द्विपाः ४२
अथापरे द्रौणिशराहता द्विपास्त्रयः ससर्वायुधयोधकेतवः
निपेतुरुर्व्यां व्यसवः प्रपातितास्तथा यथा वज्रहता महाचलाः ४३
कुणिन्दराजावरजादनन्तरः स्तनान्तरे पत्रिवरैरताडयत्
तवात्मजं तस्य तवात्मजः शरैः शितैः शरीरं बिभिदे द्विपं च तम् ४४
स नागराजः सह राजसूनुना पपात रक्तं बहु सर्वतः क्षरन्
शचीशवज्रप्रहतोऽम्बुदागमे यथा जलं गैरिकपर्वतस्तथा ४५
कुणिन्दपुत्रप्रहितोऽपरद्विपः शुकं ससूताश्वरथं व्यपोथयत्
ततोऽपतत्क्राथशराभिदारितः सहेश्वरो वज्रहतो यथा गिरिः ४६
रथी द्विपस्थेन हतोऽपतच्छरैः क्राथाधिपः पर्वतजेन दुर्जयः
स वाजिसूतेष्वसनस्तथापतद्यथा महावातहतो महाद्रुमः ४७
वृको द्विपस्थं गिरिराजवासिनं भृशं शरैर्द्वादशभिः पराभिनत्
ततो वृकं साश्वरथं महाजवं त्वरंश्चतुर्भिश्चरणे व्यपोथयत् ४८
स नागराजः सनियन्तृकोऽपतत्पराहतो बभ्रुसुतेषुभिभृशम्
स चापि देवावृधसूनुरर्दितः पपात नुन्नः सहदेवसूनुना ४९
विषाणपोत्रापरगात्रघातिना गजेन हन्तुं शकुनः कुणिन्दजः
जगाम वेगेन भृशार्दयंश्च तं ततोऽस्य गान्धारपतिः शिरोऽहरत् ५०
ततः शतानीकहता महागजा हया रथाः पत्तिगणाश्च तावकाः
सुपर्णवातप्रहता यथा नगास्तथा गता गामवशा विचूर्णिताः ५१
ततोऽभ्यविध्यद्बहुभिःशितैः शरैः कुणिन्दपुत्रो नकुलात्मजं स्मयन्
ततोऽस्य कायान्निचकर्त नाकुलि शिरः क्षुरेणाम्बुजसंनिभाननम् ५२
ततः शतानीकमविध्यदाशुगैस्त्रिभिः शितैः कर्णसुतोऽजुनं त्रिभिः
त्रिभिश्च भीमं नकुलं च सप्तभिर्जनार्दनं द्वादशभिश्च सायकैः ५३
तदस्य कर्मातिमनुष्यकर्मणः समीक्ष्य हृष्टाः कुरवोऽभ्यपूजयन्
पराक्रमज्ञास्तु धनंजयस्य ते हुतोऽयमग्नाविति तं तु मेनिरे ५४
ततः किरीटी परवीरघाती हताश्वमालोक्य नरप्रवीरम्
तमभ्यधावद्वृषसेनमाहवे स सूतजस्य प्रमुखे स्थितं तदा ५५
तमापतन्तं नरवीरमुग्रं महाहवे बाणसहस्रधारिणम्

अभ्यापतत्कर्णसुतो महारथो यथैव चेन्द्रं नमुचिः पुरातने ५६
ततोऽद्भुतेनैकशतेन पार्थं शरैर्विद्ध्वा सूतपुत्रस्य पुत्रः
ननाद नादं सुमहानुभावो विद्ध्वेव शक्रं नमुचिः पुरा वै ५७
पुनः स पार्थं वृषसेन उग्रैर्बाणैरविध्यद्भुजमूलमध्ये
तथैव कृष्णं नवभिः समार्दयत्पुनश्च पार्थं दशभिः शिताग्रैः ५८
ततः किरीटी रणमूर्ध्नि कोपात्कृत्वा त्रिशाखां भ्रुकुटिं ललाटे
मुमोच बाणान्विशिखान्महात्मा वधाय राजन्सूतपुत्रस्य संख्ये ५९
विव्याध चैनं दशभिः पृषत्कैर्मर्मस्वसक्तं प्रसभं किरीटी
चिच्छेद चास्येष्वसनं भुजौ च क्षुरैश्चतुर्भिः शिर एव चोग्रैः ६०
स पार्थबाणाभिहतः पपात रथाद्विबाहुर्विशिरा धरायाम्
सुपुष्पितः पर्णधरोऽतिकायो वातेरितः शाल इवाद्रिशृङ्गात् ६१
तं प्रेक्ष्य बाणाभिहतं पतन्तं रथात्सुतं सूतजः क्षिप्रकारी
रथं रथेनाशु जगाम वेगात्किरीटिनं पुत्रवधाभितप्तः ६२
इति श्रीमहाभारते कर्णपर्वणिद्विषष्टितमोऽध्यायः ६२

त्रिषष्टितमोऽध्यायः

सञ्जय उवाच
वृषसेनं हतं दृष्ट्वा शोकामर्षसमन्वितः
मुक्त्वा शोकोद्भवं वारि नेत्राभ्यां सहसा वृषः १
रथेन कर्णस्तेजस्वी जगामाभिमुखो रिपून्
युद्धायामर्षताम्राक्षः समाहूय धनंजयम् २
तौ रथौ सूर्यसंकाशौ वैयाघ्रपरिवारणौ
समेतौ ददृशुस्तत्र द्वाविवार्कौ समागतौ ३
श्वेताश्वौ पुरुषादित्यावास्थितावरिमर्दनौ
शुशुभाते महात्मानौ चन्द्रादित्यौ यथा दिवि ४
तौ दृष्ट्वा विस्मयं जग्मुः सर्वभूतानि मारिष
त्रैलोक्यविजये यत्ताविन्द्रवैरोचनाविव ५
रथज्यातलनिर्ह्रादैर्बाणशङ्खरवैरपि
तौ रथावभिधावन्तौ समालोक्य महीक्षिताम् ६
ध्वजौ च दृष्ट्वा संसक्तौ विस्मयः समपद्यत

हस्तिकक्ष्यां च कर्णस्य वानरं च किरीटिनः ७
तौ रथौ संप्रसक्तौ च दृष्ट्वा भारत पार्थिवाः
सिंहनादरवांश्चक्रुः साधुवादांश्च पुष्कलान् ८
श्रुत्वा तु द्वैरथं ताभ्यां तत्र योधाः समन्ततः
चक्रुर्बाहु वलं चैव तथा चेलवलं महत् ९
आजग्मुः कुरवस्तत्र वादित्रानुगतास्तदा
कर्णं प्रहर्षयन्तश्च शङ्खान्दध्मुश्च पुष्कलान् १०
तथैव पाण्डवाः सर्वे हर्षयन्तो धनंजयम्
तूर्यशङ्खनिनादेन दिशः सर्वा व्यनादयन् ११
क्ष्वेडितास्फोटितोत्क्रुष्टैस्तुमुलं सर्वतोऽभवत्
बाहुघोषाश्च वीराणां कर्णार्जुनसमागमे १२
तौ दृष्ट्वा पुरुषव्याघ्रौ रथस्थौ रथिनां वरौ
प्रगृहीतमहाचापौ शरशक्तिगदायुधौ १३
वर्मिणौ बद्धनिस्त्रिंशौ श्वेताश्वौ शङ्खशोभिनौ
तूणीरवरसंपन्नौ द्वावपि स्म सुदर्शनौ १४
रक्तचन्दनदिग्धाङ्गौ समदौ वृषभाविव
आशीविषसमप्रख्यौ यमकालान्तकोपमौ १५
इन्द्रवृत्राविव क्रुद्धौ सूर्याचन्द्रमसप्रभौ
महाग्रहाविव क्रूरौ युगान्ते समुपस्थितौ १६
देवगर्भौ देवसमौ देवतुल्यौ च रूपतः
समेतौ पुरुषव्याघ्रौ प्रेक्ष्य कर्णधनंजयौ १७
उभौ वरायुधधरावुभौ रणकृतश्रमौ
उभौ च बाहुशब्देन नादयन्तौ नभस्तलम् १८
उभौ विश्रुतकर्माणौ पौरुषेण बलेन च
उभौ च सदृशौ युद्धे शम्बरामरराजयोः १९
कार्तवीर्यसमौ युद्धे तथा दाशरथेः समौ
विष्णुवीर्यसमौ वीर्ये तथा भवसमौ युधि २०
उभौ श्वेतहयौ राजन्रथप्रवरवाहिनौ
सारथी प्रवरौ चैव तयोरास्तां महाबलौ २१
तौ तु दृष्ट्वा महाराज राजमानौ महारथौ

सिद्धचारणसंघानां विस्मयः समपद्यत २२
धार्तराष्ट्रास्ततः कर्णं सबला भरतर्षभ
परिवव्रुर्महात्मानं क्षिप्रमाहवशोभिनम् २३
तथैव पाण्डवा हृष्टा धृष्टद्युम्नपुरोगमाः
परिवव्रुर्महात्मानं पार्थमप्रतिमं युधि २४
तावकानां रणे कर्णो ग्लह आसीद्विशां पते
तथैव पाण्डवेयानां ग्लहः पार्थोऽभवद्युधि २५
त एव सभ्यास्तत्रासन्प्रेक्षकाश्चाभवन्स्म ते
तत्रैषां ग्लहमानानां ध्रुवौ जयपराजयौ २६
ताभ्यां द्यूतं समायत्तं विजयायेतराय वा
अस्माकं पाण्डवानां च स्थितानां रणमूर्धनि २७
तौ तु स्थितौ महाराज समरे युद्धशालिनौ
अन्योन्यं प्रतिसंरब्धावन्योन्यस्य जयैषिणौ २८
तावुभौ प्रजिहीर्षेतामिन्द्रवृत्राविवाभितः
भीमरूपधरावास्तां महाधूमाविव ग्रहौ २९
ततोऽन्तरिक्षे साक्षेपा विवादा भरतर्षभ
मिथो भेदाश्च भूतानामासन्कर्णार्जुनान्तरे
व्याश्रयन्त दिशो भिन्नाः सर्वलोकाश्च मारिष ३०
देवदानवगन्धर्वाः पिशाचोरगराक्षसाः
प्रतिपक्षग्रहं चक्रुः कर्णार्जुनसमागमे ३१
द्यौरासीत्कर्णतो व्यग्रा सनक्षत्रा विशां पते
भूमिर्विशाला पार्थस्य माता पुत्रस्य भारत ३२
सरितः सागराश्चैव गिरयश्च नरोत्तम
वृक्षाश्चौषधयस्तत्र व्याश्रयन्त किरीटिनम् ३३
असुरा यातुधानाश्च गुह्यकाश्च परंतप
कर्णतः समपद्यन्त खेचराणि वयांसि च ३४
रत्नानि निधयः सर्वे वेदाश्चाख्यानपञ्चमाः
सोपवेदोपनिषदः सरहस्याः ससंग्रहाः ३५
वासुकिश्चित्रसेनश्च तक्षकश्चोपतक्षकः
पर्वताश्च तथा सर्वे काद्रवेयाश्च सान्वयाः

विषवन्तो महारोषा नागाश्चार्जुनतोऽभवन् ३६
एरावताः सौरभेया वैशालेयाश्च भोगिनः
एतेऽभवन्नर्जुनतः क्षुद्रसर्पास्तु कर्णतः ३७
ईहामृगा व्याडमृगा मङ्गल्याश्च मृगद्विजाः
पार्थस्य विजयं राजन्सर्व एवाभिसंश्रिताः ३८
वसवो मरुतः साध्या रुद्रा विश्वेऽश्विनौ तथा
अग्निरिन्द्रश्च सोमश्च पवनश्च दिशो दश
धनंजयमुपाजग्मुरादित्याः कर्णतोऽभवन् ३९
देवास्तु पितृभिः सार्धं सगणार्जुनतोऽभवन्
यमो वैश्रवणश्चैव वरुणश्च यतोऽजुनः ४०
देवब्रह्म नृपर्षीणां गणाः पाण्डवतोऽभवन्
तुम्बुरुप्रमुखा राजन्गन्धर्वाश्च यतोऽजुनः ४१
प्रावेयाः सह मौनेयैर्गन्धर्वाप्सरसां गणाः
ईहामृगव्याडमृगैर्द्विपाश्च रथपत्तिभिः ४२
उह्यमानास्तथा मेघैर्वायुना च मनीषिणः
दिदृक्षवः समाजग्मुः कर्णार्जुनसमागमम् ४३
देवदानवगन्धर्वा नागा यक्षाः पतत्रिणः
महर्षयो वेदविदः पितरश्च स्वधाभुजः ४४
तपो विद्यास्तथौषध्यो नानारूपाम्बरत्विषः
अन्तरिक्षे महाराज विनदन्तोऽवतस्थिरे ४५
ब्रह्मा ब्रह्मर्षिभिः सार्धं प्रजापतिभिरेव च
भवेनावस्थितो यानं दिव्यं तं देशमभ्ययात् ४६
दृष्ट्वा प्रजापतिं देवाः स्वयंभुवमुपागमन्
समोऽस्तु देव विजय एतयोर्नरसिंहयोः ४७
तदुपश्रुत्य मघवा प्रणिपत्य पितामहम्
कर्णार्जुनविनाशेन मा नश्यत्वखिलं जगत् ४८
स्वयंभो ब्रूहि तद्वाक्यं समोऽस्तु विजयोऽनयोः
तत्तथास्तु नमस्तेऽस्तु प्रसीद भगवन्मम ४९
ब्रह्मेशानावथो वाक्यमूचतुस्त्रिदशेश्वरम्
विजयो ध्रुव एवास्तु विजयस्य महात्मनः ५०

मनस्वी बलवाञ्शूरः कृतास्त्रश्च तपोधनः
बिभर्ति च महातेजा धनुर्वेदमशेषतः ५१
अतिक्रमेच्च माहात्म्याद्दिष्टमेतस्य पर्ययात्
अतिक्रान्ते च लोकानामभावो नियतो भवेत् ५२
न विद्यते व्यवस्थानं कृष्णयोः क्रुद्धयोः क्वचित्
स्रष्टारौ ह्यसतश्चोभौ सतश्च पुरुषर्षभौ ५३
नरनारायणावेतौ पुराणावृषिसत्तमौ
अनियत्तौ नियन्तारावभीतौ स्म परंतपौ ५४
कर्णो लोकानयं मुख्यान्प्राप्नोतु पुरुषर्षभः
वीरो वैकर्तनः शूरो विजयस्त्वस्तु कृष्णयोः ५५
वसूनां च सलोकत्वं मरुतां वा समाप्नुयात्
सहितो द्रोणभीष्माभ्यां नाकलोके महीयताम् ५६
इत्युक्तो देवदेवाभ्यां सहस्राक्षोऽब्रवीद्वचः
आमन्त्र्य सर्वभूतानि ब्रह्मेशानानुशासनात् ५७
श्रुतं भवद्भिर्यत्प्रोक्तं भगवद्भ्यां जगद्धितम्
तत्तथा नान्यथा तद्धि तिष्ठध्वं गतमन्यवः ५८
इति श्रुत्वेन्द्रवचनं सर्वभूतानि मारिष
विस्मितान्यभवन्राजन्पूजयांचक्रिरे च तत् ५९
व्यसृजंश्च सुगन्धीनि नानारूपाणि खात्तथा
पुष्पवर्षाणि विबुधा देवतूर्याण्यवादयन् ६०
दिदृक्षवश्चाप्रतिमं द्वैरथं नरसिंहयोः
देवदानवगन्धर्वाः सर्व एवावतस्थिरे
रथौ च तौ श्वेतहयौ युक्तकेतू महास्वनौ ६१
समागता लोकवीराः शङ्खान्दध्मुः पृथक्पृथक्
वासुदेवार्जुनौ वीरौ कर्णशल्यौ च भारत ६२
तद्भीरुसंत्रासकरं युद्धं समभवत्तदा
अन्योन्यस्पर्धिनोर्वीर्ये शक्रशम्बरयोरिव ६३
तयोर्ध्वजौ वीतमालौ शुशुभाते रथस्थितौ
पृथग्रूपौ समार्छन्तौ क्रोधं युद्धे परस्परम् ६४
कर्णस्याशीविषनिभा रत्नसारवती दृढा

पुरंदरधनुःप्रख्या हस्तिकक्ष्या व्यराजत ६५
कपिश्रेष्ठस्तु पार्थस्य व्यादितास्यो भयंकरः
भीषयन्नेव दंष्ट्राभिर्दुर्निरीक्ष्यो रविर्यथा ६६
युद्धाभिलाषुको भूत्वा ध्वजो गाण्डीवधन्वनः
कर्णध्वजमुपातिष्ठत्सोऽवधीदभिनर्दयन् ६७
उत्पत्य च महावेगः कक्ष्यामभ्यहनत्कपिः
नखैश्च दशनैश्चैव गरुडः पन्नगं यथा ६८
सुकिङ्किणीकाभरणा कालपाशोपमायसी
अभ्यद्रवत्सुसंक्रुद्धा नागकक्ष्या महाकपिम् ६९
उभयोरुत्तमे युद्धे द्वैरथे द्यूत आहृते
प्राकुर्वाते ध्वजौ युद्धं प्रत्यहेषन्हयान्हयाः ७०
अविध्यत्पुण्डरीकाक्षः शल्यं नयनसायकैः
स चापि पुण्डरीकाक्षं तथैवाभिसमैक्षत ७१
तत्राजयद्वासुदेवः शल्यं नयनसायकैः
कर्णं चाप्यजयद्दृष्ट्या कुन्तीपुत्रो धनंजयः ७२
अथाब्रवीत्सूतपुत्रः शल्यमाभाष्य सस्मितम्
यदि पार्थो रणे हन्यादद्य मामिह कर्हिचित्
किमुत्तरं तदा ते स्यात्सखे सत्यं ब्रवीहि मे ७३
शल्य उवाच
यदि कर्णं रणे हन्यादद्य त्वां श्वेतवाहनः
उभावेकरथेनाहं हन्यां माधवपाण्डवौ ७४
सञ्जय उवाच
एवमेव तु गोविंदमर्जुनः प्रत्यभाषत
तं प्रहस्याब्रवीत्कृष्णः पार्थं परमिदं वचः ७५
पतेद्दिवाकरः स्थानाच्छीर्येतानेकधा क्षितिः
शैत्यमग्निरियान्न त्वा कर्णो हन्याद्धनंजयम् ७६
यदि त्वेवं कथंचित्स्याल्लोकपर्यसनं यथा
हन्यां कर्णं तथा शल्यं बाहुभ्यामेव संयुगे ७७
इति कृष्णवचः श्रुत्वा प्रहसन्कपिकेतनः
अर्जुनः प्रत्युवाचेदं कृष्णमक्लिष्टकारिणम्

ममाप्येतावपर्याप्तौ कर्णशल्यौ जनार्दन ७८
सपताकाध्वजं कर्णं सशल्यरथवाजिनम्
सच्छत्रकवचं चैव सशक्तिशरकार्मुकम् ७९
द्रष्टास्यद्य शरैः कर्णं रणे कृत्तमनेकधा
अद्यैनं सरथं साश्वं सशक्तिकवचायुधम्
न हि मे शाम्यते वैरं कृष्णां यत्प्राहसत्पुरा ८०
अद्य द्रष्टासि गोविन्द कर्णमुन्मथितं मया
वारणेनेव मत्तेन पुष्पितं जरतीरुहम् ८१
अद्य ता मधुरा वाचः श्रोतासि मधुसूदन
अद्याभिमन्युजननीमनृणः सान्त्वयिष्यसि
कुन्तीं पितृष्वसारं च संप्रहृष्टो जनार्दन ८२
अद्य बाष्पमुखीं कृष्णां सान्त्वयिष्यसि माधव
वाग्भिश्चामृतकल्पाभिर्धर्मराजं युधिष्ठिरम् ८३
इति श्रीमहाभारते कर्णपर्वणि त्रिषष्टितमोऽध्यायः ६३

चतुःषष्टितमोऽध्यायः

सञ्जय उवाच
तद्देवनागासुरसिद्धसंघैर्गन्धर्वयक्षाप्सरसां च संघैः
ब्रह्मर्षिराजर्षिसुपर्णजुष्टं बभौ वियद्विस्मयनीयरूपम् १
नानद्यमानं निनदैर्मनोज्ञैर्वादित्रगीतस्तुतिभिश्च नृत्यैः
सर्वेऽन्तरिक्षे ददृशुर्मनुष्याः खस्थांश्च तान्विस्मयनीयरूपान् २
ततः प्रहृष्टाः कुरुपाण्डयोधा वादित्रपत्रायुधसिंहनादैः
निनादयन्तो वसुधां दिशश्च स्वनेन सर्वे द्विषतो निजघ्नुः ३
नानाश्वमातङ्गरथायुताकुलं वरासिशक्त्यृष्टिनिपातदुःसहम्
अभीरुजुष्टं हतदेहसंकुलं रणाजिरं लोहितरक्तमाबभौ ४
तथा प्रवृत्तेऽस्त्रभृतां पराभवे धनंजयश्चाधिरथिश्च सायकैः
दिशश्च सैन्यं च शितैरजिह्मगैः परस्परं प्रोर्णुवतुः स्म दंशितौ ५
ततस्त्वदीयाश्च परे च सायकैः कृतेऽन्धकारे विविदुर्न किंचन
भयात्तु तावेव रथौ समाश्रयंस्तमोनुदौ खे प्रसृता इवांशवः ६
ततोऽस्त्रमस्त्रेण परस्परस्य तौ विधूय वाताविव पूर्वपश्चिमौ

घनान्धकारे वितते तमोनुदौ यथोदितौ तद्वदतीव रेजतुः ७
न चाभिमन्तव्यमिति प्रचोदिताः परे त्वदीयाश्च तदावतस्थिरे
महारथौ तौ परिवार्य सर्वतः सुरासुरा वासवशम्बराविव ८
मृदङ्गभेरीपणवानकस्वनैर्निनादिते भारत शङ्खनिस्वनैः
ससिंहनादौ बभतुर्नरोत्तमौ शशाङ्कसूर्याविव मेघसंप्लवे ९
महाधनुर्मण्डलमध्यगावुभौ सुवर्चसौ बाणसहस्ररश्मिनौ
दिधक्षमाणौ सचराचरं जगद्युगास्तसूर्याविव दुःसहौ रणे १०
उभावजेयावहितान्तकावुभौ जिघांसतुस्तौ कृतिनौ परस्परम्
महाहवे वीरवरौ समीयतुर्यथेन्द्रजम्भाविव कर्णपाण्डवौ ११
ततो महास्त्राणि महाधनुर्धरौ विमुञ्चमानाविषुभिर्भयानकैः
नराश्वनागानमितौ निजघ्नतुः परस्परं जघ्नतुरुत्तमेषुभिः १२
ततो विसस्रुः पुनरर्दिताः शरैर्नरोत्तमाभ्यां कुरुपाण्डवाश्रयाः
सनागपत्त्यश्वरथा दिशो गतास्तथा यथा सिंहभयाद्वनौकसः १३
ततस्तु दुर्योधनभोजसौबलाः कृपश्च शारद्वतसूनुना सह
महारथाः पञ्च धनंजयाच्युतौ शरैः शरीरान्तकरैरताडयन् १४
धनूषिं तेषामिषुधीन्हयान्ध्वजान्रथांश्च सूतांश्च धनंजयः शरैः
समं च चिच्छेद पराभिनच्च ताञ्शरोत्तमैर्द्वादशभिश्च सूतजम् १५
अथाभ्यधावंस्त्वरिताः शतं रथाः शतं च नागार्जुनमाततायिनः
शकास्तुखारा यवनाश्च सादिनः सहैव काम्बोजवरैर्जिघांसवः १६
वरायुधान्पाणिगतान्करैः सह क्षुरैर्न्यकृन्तंस्त्वरिताः शिरांसि च
हयांश्च नागांश्च रथांश्च युध्यतां धनंजयः शत्रुगणं तमक्षिणोत् १७
ततोऽन्तरिक्षे सुरतूर्यनिस्वनाः ससाधुवादा हृषितैः समीरिताः
निपेतुरप्युत्तमपुष्पवृष्टयः सुरूपगन्धाः पवनेरिताः शिवाः १८
तदद्भुतं देवमनुष्यसाक्षिकं समीक्ष्य भूतानि विसिष्मियुर्नृप
तवात्मजः सूतसुतश्च न व्यथां न विस्मयं जग्मतुरेकनिश्चयौ १९
अथाब्रवीद्द्रोणसुतस्तवात्मजं करं करेण प्रतिपीड्य सान्त्वयन्
प्रसीद दुर्योधन शाम्य पाण्डवैरलं विरोधेन धिगस्तु विग्रहम् २०
हतो गुरुर्ब्रह्मसमो महास्त्रवित्तथैव भीष्मप्रमुखा नरर्षभाः
अहं त्ववध्यो मम चापि मातुलः प्रशाधि राज्यं सह पाण्डवैश्चिरम् २१
धनंजयः स्थास्यति वारितो मया जनार्दनो नैव विरोधमिच्छति

युधिष्ठिरो भूतहिते सदा रतो वृकोदरस्तद्वशगस्तथा यमौ २२
त्वया च पार्थैश्च परस्परेण प्रजाः शिवं प्राप्नुयुरिच्छति त्वयि
व्रजन्तु शेषाः स्वपुराणि पार्थिवा निवृत्तवैराश्च भवन्तु सैनिकाः २३
न चेद्वचः श्रोष्यसि मे नराधिप ध्रुवं प्रतप्तासि हतोऽरिभिर्युधि
इदं च दृष्टं जगता सह त्वया कृतं यदेकेन किरीटमालिना
यथा न कुर्याद्बलभिन्न चान्तको न च प्रचेता भगवान्न यक्षराट् २४
अतोऽपि भूयांश्च गुणैर्धनंजयः स चाभिपत्स्यत्यखिलं वचो मम
तवानुयात्रां च तथा करिष्यति प्रसीद राजञ्जगतः शमाय वै २५
ममापि मानः परमः सदा त्वयि ब्रवीम्यतस्त्वां परमाच्च सौहृदात्
निवारयिष्यामि हि कर्णमप्यहं यदा भवान्सप्रणयो भविष्यति २६
वदन्ति मित्रं सहजं विचक्षणास्तथैव साम्ना च धनेन चार्जितम्
प्रतापतश्चोपनतं चतुर्विधं तदस्ति सर्वं त्वयि पाण्डवेषु च २७
निसर्गतस्ते तव वीर बान्धवाः पुनश्च साम्ना च समाप्नुहि स्थिरम्
त्वयि प्रसन्ने यदि मित्रतामियुर्ध्रुवं नरेन्द्रेन्द्र तथा त्वमाचर २८
स एवमुक्तः सुहृदा वचो हितं विचिन्त्य निःश्वस्य च दुर्मनाब्रवीत्
यथा भवानाह सखे तथैव तन्ममापि च ज्ञापयतो वचः शृणु २९
निहत्य दुःशासनमुक्तवान्बहु प्रसह्य शार्दूलवदेष दुर्मतिः
वृकोदरस्तद्धृदये मम स्थितं न तत्परोक्षं भवतः कुतः शमः ३०
न चापि कर्णं गुरुपुत्र संस्तवादुपारमेत्यर्हसि वक्तुमच्युत
श्रमेण युक्तो महताद्य फल्गुनस्तमेष कर्णः प्रसभं हनिष्यति ३१
तमेवमुक्त्वाभ्यनुनीय चासकृत्तवात्मजः स्वाननुशास्ति सैनिकान्
समाघ्नताभिद्रवताहितानिमान्सबाणशब्दान्किमु जोषमास्यते ३२
इति श्रीमहाभारते कर्णपर्वणि चतुःषष्टितमोऽध्यायः ६४

पञ्चषष्टितमोऽध्यायः

सञ्जय उवाच
तौ शङ्खभेरीनिनदे समृद्धे समीयतुः श्वेतहयौ नराग्र्यौ
वैकर्तनः सूतपुत्रोऽर्जुनश्च दुर्मन्त्रिते तव पुत्रस्य राजन् १
यथा गजौ हैमवतौ प्रभिन्नौ प्रगृह्य दन्ताविव वाशितार्थे
तथा समाजग्मतुरुग्रवेगौ धनंजयश्चाधिरथिश्च वीरौ २

बलाहकेनेव यथा बलाहको यदृच्छया वा गिरिणा गिरिर्यथा
तथा धनुर्ज्यातलनेमिनिस्वनौ समीयतुस्ताविषुवर्षवर्षिणौ ३
प्रवृद्धशृङ्गद्रुमवीरुदोषधी प्रवृद्धनानाविधपर्वतौकसौ
यथाचलौ वा गलितौ महाबलौ तथा महास्त्रैरितरेतरं घ्नतः ४
स संनिपातस्तु तयोर्महानभूत्सुरेशवैरोचनयोर्यथा पुरा
शरैर्विभुग्नाङ्गनियन्तृवाहनः सुदुःसहोऽन्यै पटुशोणितोदकः ५
प्रभूतपद्मोत्पलमत्स्यकच्छपौ महाह्रदौ पक्षिगणानुनादितौ
सुसंनिकृष्टावनिलोद्धतौ यथा तथा रथौ तौ ध्वजिनौ समीयतुः ६
उभौ महेन्द्रस्य समानविक्रमावुभौ महेन्द्रप्रतिमौ महारथौ
महेन्द्रवज्रप्रतिमैश्च सायकैर्महेन्द्रवृत्राविव संप्रजह्रतुः ७
सनागपत्त्यश्वरथे उभे बले विचित्रवर्णाभरणाम्बरस्त्रजे
चकम्पतुश्चोन्नमतः स्म विस्मयाद्वियद्गताश्चार्जुनकर्णसंयुगे ८
भुजाःसवज्राङ्गुलयः समुच्छ्रिताः ससिंहनादा हृषितैर्दिदृक्षुभिः
यदार्जुनं मत्तमिव द्विपो द्विपं समभ्ययादाधिरथिर्जिघांसया ९
अभ्यक्रोशन्सोमकास्तत्र पार्थं त्वरस्व याह्यर्जुन विध्य कर्णम्
छिन्ध्यस्य मूर्धानमलं चिरेण श्रद्धां च राज्याद्धृतराष्ट्रसूनोः १०
तथास्माकं बहवस्तत्र योधाः कर्णं तदा याहि याहीत्यवोचन्
जह्यर्जुनं कर्ण ततःसचीराः पुनर्वनं यान्तु चिराय पार्थाः ११
ततः कर्णः प्रथमं तत्र पार्थं महेषुभिर्दशभिः पर्यविध्यत्
तमर्जुनः प्रत्यविध्यच्छिताग्रैः कक्षान्तरे दशभिरतीव क्रुद्धः १२
परस्परं तौ विशिखैः सुतीक्ष्णैस्ततक्षतुः सूतपुत्रोऽजुनश्च
परस्परस्यान्तरेप्सू विमर्दे सुभीममभ्याययतुः प्रहृष्टौ १३
अमृष्यमाणश्च महाविमर्दे तत्राकुध्यद्भीमसेनो महात्मा
अथाब्रवीत्पाणिना पाणिमाघ्नन्संदष्टौष्ठो नृत्यति वादयन्निव
कथं तु त्वां सूतपुत्रः किरीटिन्महेषुभिर्दशभिरविध्यदग्रे १४
यया धृत्या सर्वभूतान्यजैषीर्ग्रासं ददद्वह्नये खाण्डवे त्वम्
तया धृत्या सूतपुत्रं जहि त्वमहं वैनं गदया पोथयिष्ये १५
अथाब्रवीद्वासुदेवोऽपि पार्थं दृष्ट्वा रथेषून्प्रतिहन्यमानान्
अमीमृदत्सर्वथा तेऽद्य कर्णो ह्यस्त्रैरस्त्राणि किमिदं किरीटिन् १६
स वीर किं मुह्यसि नावधीयसे नदन्त्येते कुरवः संप्रहृष्टाः

कर्णं पुरस्कृत्य विदुर्हि सर्वे त्वदस्त्रमस्त्रैर्विनिपात्यमानम् १७
यया धृत्या निहतं तामसास्त्रं युगे युगे राक्षसाश्चापि घोराः
दम्भोद्भवाश्चासुराश्चाहवेषु तया धृत्या त्वं जहि सूतपुत्रम् १८
अनेन वास्य क्षुरनेमिनाद्य संछिन्द्धि मूर्धानमरेः प्रसह्य
मया निसृष्टेन सुदर्शनेन वज्रेण शक्रो नमुचेरिवारेः १९
किरातरूपी भगवान्यया च त्वया महत्या परितोषितोऽभूत्
तां त्वं धृतिं वीर पुनर्गृहीत्वा सहानुबन्धं जहि सूतपुत्रम् २०
ततो महीं सागरमेखलां त्वं सपत्तनां ग्रामवतीं समृद्धाम्
प्रयच्छ राज्ञे निहतारिसंघां यशश्च पार्थातुलमाप्नुहि त्वम् २१
संचोदितो भीमजनार्दनाभ्यां स्मृत्वा तदात्मानमवेक्ष्य सत्त्वम्
महात्मनश्चागमने विदित्वा प्रयोजनं केशवमित्युवाच २२
प्रादुष्करोम्येष महास्त्रमुग्रं शिवाय लोकस्य वधाय सौतेः
तन्मेऽनुजानातु भवान्सुराश्च ब्रह्मा भवो ब्रह्मविदश्च सर्वे २३
इत्यूचिवान्ब्राह्ममसह्यमस्त्रं प्रादुश्चक्रे मनसा संविधेयम्
ततो दिशश्च प्रदिशश्च सर्वाः समावृणोत्सायकैर्भूरितेजाः
ससर्ज बाणान्भरतर्षभोऽपि शतंशतानेकवदाशुवेगान् २४
वैकर्तनेनापि तथाजिमध्ये सहस्रशो बाणगणा विसृष्टाः
ते घोषिणः पाण्डवमभ्युपेयुः पर्जन्यमुक्ता इव वारिधाराः २५
स भीमसेनं च जनार्दनं च किरीटिनं चाप्यमनुष्यकर्मा
त्रिभिस्त्रिभिर्भीमबलो निहत्य ननाद घोरं महता स्वरेण २६
स कर्णबाणाभिहतः किरीटी भीमं तथा प्रेक्ष्य जनार्दनं च
अमृष्यमाणं पुनरेव पार्थः शरान्दशाष्टौ च समुद्बबर्ह २७
सुषेणमेकेन शरेण विद्ध्वा शल्यं चतुर्भिस्त्रिभिरेव कर्णम्
ततः सुमुक्तैर्दशभिर्जघान सभापतिं काञ्चनवर्मनद्धम् २८
स राजपुत्रो विशिरा विबाहुर्विवाजिसूतो विधनुर्विकेतुः
ततो रथाग्रादपतत्प्रभग्नः परश्वधैः शाल इवाभिकृत्तः २९
पुनश्च कर्णं त्रिभिरष्टभिश्च द्वाभ्यां चतुर्भिर्दशभिश्च विद्ध्वा
चतुः शतान्द्विरदान्सायुधीयान्हत्वा रथानष्टशतं जघान
सहस्रमश्वांश्च पुनश्च सादीनष्टौ सहस्राणि च पत्तिवीरान् ३०
दृष्ट्वाजिमुख्यावथ युध्यमानौ दिदृक्षवः शूरवरावरिघ्नौ

कर्णं च पार्थं च नियम्य वाहान्खस्था महीस्थाश्च जनावतस्थुः ३१
ततो धनुर्ज्या सहसातिकृष्टा सुघोषमाच्छिद्यत पाण्डवस्य
तस्मिन्क्षणे सूतपुत्रस्तु पार्थं समाचिनोत्क्षुद्रकाणां शतेन ३२
निर्मुक्तसर्पप्रतिमैश्च तीक्ष्णैस्तैलप्रधौतैः खगपत्रवाजैः
षष्ट्या नाराचैर्वासुदेवं बिभेद तदन्तरं सोमकाः प्राद्रवन्त ३३
ततो धनुर्ज्यामवधम्य शीघ्रं शरानस्तानाधिरथेर्विधम्य
सुसंरब्धः कर्णशरक्षताङ्गो रणे पार्थः सौमकान्प्रत्यगृह्णात्
न पक्षिणः संपतन्त्यन्तरिक्षे क्षेपीयसास्त्रेण कृतेऽन्धकारे ३४
शल्यं च पार्थो दशभिः पृषत्कैर्भृशं तनुत्रे प्रहसन्नविध्यत्
ततः कर्णं द्वादशभिः सुमुक्तैर्विद्ध्वा पुनः सप्तभिरभ्यविध्यत् ३५
स पार्थबाणासन वेग नुन्नैर्दृढाहतः पत्रिभिरुग्रवेगैः
विभिन्नगात्रः क्षतजोक्षिताङ्गः कर्णो बभौ रुद्र इवातत्तेषुः ३६
ततस्त्रिभिश्च त्रिदशाधिपोपमं शरैर्बिभेदाधिरथिर्धनंजयम्
शरांस्तु पञ्च ज्वलितानिवोरगान्प्रवीरयामास जिघांसुरच्युते ३७
ते वर्म भित्त्वा पुरुषोत्तमस्य सुवर्णचित्रं न्यपतन्सुमुक्ताः
वेगेन गामाविविशुः सुवेगाः स्नात्वा च कर्णाभिमुखाः प्रतीयुः ३८
तान्पञ्चभल्लैस्त्वरितैः सुमुक्तैस्त्रिधा त्रिधैकैकमथोच्चकर्त
धनंजयस्ते न्यपतन्पृथिव्यां महाहयस्तक्षकपुत्रपक्षाः ३९
ततः प्रजज्वाल किरीटमाली क्रोधेन कक्षं प्रदहन्निवाग्निः
स कर्णमाकर्णविकृष्टसृष्टैः शरैः शरीरान्तकरैर्ज्वलद्भिः
मर्मस्वविध्यत्स चचाल दुःखाद्धैर्यात्तु तस्थावतिमात्रधैर्यः ४०
ततः शरौघैः प्रदिशो दिशश्च रविप्रभा कर्णरथश्च राजन्
अदृश्य आसीत्कुपिते धनंजये तुषारनीहारवृतं यथा नभः ४१
स चक्ररक्षानथ पादरक्षान्पुरः सरान्पृष्ठगोपांश्च सर्वान्
दुर्योधनेनानुमतानरिघ्नान्समुच्चितान्सुरथान्सारभूतान् ४२
द्विसाहस्रान्समरे सव्यसाची कुरुप्रवीरानृषभः कुरूणाम्
क्षणेन सर्वान्सरथाश्वसूतान्निनाय राजन्क्षयमेकवीरः ४३
अथापलायन्त विहाय कर्णं तवात्मजाः कुरवश्चावशिष्टाः
हतानवाकीर्य शरक्षतांश्च लालप्यमानांस्तनयान्पितॄंश्च ४४
स सर्वतः प्रेक्ष्य दिशो विशून्या भयावदीर्णैः कुरुभिर्विहीनः

न विव्यथे भारत तत्र कर्णः प्रतीपमेवार्जुनमभ्यधावत् ४५
इति श्रीमहाभारते कर्णपर्वणि पञ्चषष्टितमोऽध्यायः ६५

षट्षष्टितमोऽध्यायः

सञ्जय उवाच
ततोऽपयाताः शरपातमात्रमवस्थिताः कुरवो भिन्नसेनाः
विद्युत्प्रकाशं ददृशुः समन्ताद्धनंजयास्त्रं समुदीर्यमाणम् १
तदर्जुनास्त्रं ग्रसते स्म वीरान्वियत्तथाकाशमनन्तघोषम्
क्रुद्धेन पार्थेन तदाशु सृष्टं वधाय कर्णस्य महाविमर्दे २
रामादुपात्तेन महामहिम्ना आथर्वणेनारिविनाशनेन
तदर्जुनास्त्रं व्यधमद्दहन्तं पार्थं च बाणैर्निशितैर्निजघ्ने ३
ततो विमर्दः सुमहान्बभूव तस्यार्जुनस्याधिरथेश्च राजन्
अन्योन्यमासादयतोः पृषत्कैर्विषाणघातैर्द्विपयोरिवोग्रैः ४
ततो रिपुघ्नं समधत्त कर्णः सुसंशितं सर्पमुखं ज्वलन्तम्
रौद्रं शरं संयति सुप्रधौतं पार्थार्थमत्यर्थचिराय गुप्तम् ५
सदार्चितं चन्दनचूर्णशायिनं सुवर्णनालीशयनं महाविषम्
प्रदीप्तमैरावतवंशसंभवं शिरो जिहीर्षुर्युधि फल्गुनस्य ६
तमब्रवीन्मद्रराजो महात्मा वैकर्तनं प्रेक्ष्य हि संहितेषुम्
न कर्ण ग्रीवामिषुरेष प्राप्स्यते संलक्ष्य संधस्व शरं शिरोघ्नम् ७
अथाब्रवीत्क्रोधसंरक्तनेत्रः कर्णः शल्यं संधितेषुः प्रसह्य
न संधत्ते द्विः शरं शल्य कर्णो न मादृशाः शाठ्ययुक्ता भवन्ति ८
तथैवमुक्त्वा विससर्ज तं शरं बलाहकं वर्षघनाभिपूजितम्
हतोऽसि वै फल्गुन इत्यवोचत्ततस्त्वरन्नूर्जितमुत्ससर्ज ९
संधीयमानं भुजगं दृष्ट्वा कर्णेन माधवः
आक्रम्य स्यन्दनं पद्भ्यां बलेन बलिनां वरः १०
अवगाढे रथे भूमौ जानुभ्यामगमन्हयाः
ततः शरः सोऽभ्यहनत्किरीटं तस्य धीमतः ११
अथार्जुनस्योत्तमगात्रभूषणं धरावियद्द्यौसलिलेषु विश्रुतम्
बलास्त्रसर्गोत्तमयत्नमन्युभिः शरेण मूर्ध्नः स जहार सूतजः १२
दिवाकरेन्दुज्वलनग्रहत्विषं सुवर्णमुक्तामणिजालभूषितम्

पुरंदरार्थं तपसा प्रयत्नतः स्वयं कृतं यद्भुवनस्य सूनुना १३
महार्हरूपं द्विषतां भयंकरं विभाति चात्यर्थसुखं सुगन्धि तत्
निजघ्नुषे देवरिपून्सुरेश्वरः स्वयं ददौ यत्सुमनाः किरीटिने १४
हराम्बुपाखण्डलवित्तगोप्तृभिः पिनाकपाशाशनिसायकोत्तमैः
सुरोत्तमैरप्यविषह्यमर्दितुं प्रसह्य नागेन जहार यद्वृषः १५
तदुत्तमेषून्मथितं विषाग्निना प्रदीप्तमर्चिष्मदभिज्ञिति प्रियम्
पपात पार्थस्य किरीटमुत्तमं दिवाकरोऽस्तादिव पर्वताज्ज्वलन् १६
ततः किरीटं बहुरत्नमण्डितं जहार नागोऽजुनमूर्धतो बलात्
गिरेः सुजाताङ्कुरपुष्पितद्रुमं महेन्द्रवज्रः शिखरं यथोत्तमम् १७
मही वियद्द्यौः सलिलानि वायुना यथा विभिन्नानि विभान्ति भारत
तथैव शब्दो भुवनेष्वभूत्तदा जना व्यवस्यन्व्यथिताश्च चस्खलुः १८
ततः समुद्ग्रथ्य सितेन वाससा स्वमूर्धजानव्यथितः स्थितोऽजुनः
विभाति संपूर्णमरीचिभास्वता शिरोगतेनोदयपर्वतो यथा १९
बलाहकः कर्णभुजेरितस्ततो हुताशनार्कप्रतिमद्युतिर्महान्
महोरगः कृतवैरोऽजुनेन किरीटमासाद्य समुत्पपात २०
तमब्रवीद्विद्धि कृतागसं मे कृष्णाद्य मातुर्वधजातवैरम्
ततः कृष्णः पार्थमुवाच संख्ये महोरगं कृतवैरं जहि त्वम् २१
स एवमुक्तो मधुसूदनेन गाण्डीवधन्वा रिपुषूग्रधन्वा
उवाच को न्वेष ममाद्य नागः स्वयं य आगाद्गरुडस्य वक्त्रम् २२
कृष्ण उवाच
योऽसौ त्वया खाण्डवे चित्रभानुं संतर्पयानेन धनुर्धरेण
वियद्गतो बाणनिकृत्तदेहो ह्यनेकरूपो निहतास्य माता २३
ततस्तु जिष्णुः परिहृत्य शेषांश्चिच्छेद षड्भिर्निशितैः सुधारैः
नागं वियत्तिर्यगिवोत्पतन्तं स छिन्नगात्रो निपपात भूमौ २४
तस्मिन्मुहूर्ते दशभिः पृषत्कैः शिलाशितैर्बर्हिणवाजितैश्च
विव्याध कर्णः पुरुष प्रवीरं धनंजयं तिर्यगवेक्षमाणम् २५
ततोऽजुनो द्वादशभिर्विमुक्तैराकर्णमुक्तैर्निशितैः समर्प्य
नाराचमाशीविषतुल्यवेगमाकर्णपूर्णायतमुत्ससर्ज २६
स चित्रवर्मेषुवरो विदार्य प्राणान्निरस्यन्निव साधु मुक्तः
कर्णस्य पीत्वा रुधिरं विवेश वसुंधरां शोणितवाजदिग्धः २७

ततो वृषो बाणनिपातकोपितो महोरगो दण्डविघट्टितो यथा
तथाशुकारी व्यसृजच्छरोत्तमान्महाविषः सर्प इवोत्तमं विषम् २८
जनार्दनं द्वादशभिः पराभिनन्नवैर्नवत्या च शरैस्तथार्जुनम्
शरेण घोरेण पुनश्च पाण्डवं विभिद्य कर्णोऽभ्यनदज्जहास च २९
तमस्य हर्षं ममृषे न पाण्डवो बिभेद मर्माणि ततोऽस्य मर्मवित्
परं शरैः पत्रिभिरिन्द्रविक्रमस्तथा यथेन्द्रो बलमोजसाहनत् ३०
ततः शराणां नवतिर्नवार्जुनः ससर्ज कर्णेऽन्तकदण्डसंनिभाः
शरैर्भृशायस्ततनुः प्रविव्यथे तथा यथा वज्रविदारितोऽचलः ३१
मणिप्रवेकोत्तमवज्रहाटकैरलंकृतं चास्य वराङ्गभूषणम्
प्रविद्धमुर्व्यां निपपात पत्रिभिर्धनंजयेनोत्तमकुण्डलेऽपि च ३२
महाधनं शिल्पिवरैः प्रयत्नतः कृतं यदस्योत्तमवर्म भास्वरम्
सुदीर्घकालेन तदस्य पाण्डवः क्षणेन बाणैर्बहुधा व्यशातयत् ३३
स तं विवर्माणमथोत्तमेषुभिः शरैश्चतुर्भिः कुपितः पराभिनत्
स विव्यथेऽत्यर्थमरिप्रहारितो यथातुरः पित्तकफानिलव्रणैः ३४
महाधनुर्मण्डलनिःसृतैः शितैः क्रियाप्रयत्नप्रहितैर्बलेन च
ततक्ष कर्णं बहुभिः शरोत्तमैर्बिभेद मर्मस्वपि चार्जुनस्त्वरन् ३५
दृढाहतः पत्रिभिरुग्रवेगैः पार्थेन कर्णो विविधैः शिताग्रैः
बभौ गिरिर्गैरिकधातुरक्तः क्षरन्प्रपातैरिव रक्तमम्भः ३६
साश्वं तु कर्णं सरथं किरीटी समाचिनोद्धारत वत्सदन्तैः
प्रच्छादयामास दिशश्च बाणैः सर्वप्रयत्नात्तपनीयपुङ्खैः ३७
स वत्सदन्तैः पृथुपीनवक्षाः समाचितः स्माधिरथिर्विभाति
सुपुष्पिताशोकपलाशशाल्मलिर्यथाचलः स्पन्दनचन्दनायुतः ३८
शरैः शरीरे बहुधा समर्पितैर्विभाति कर्णः समरे विशां पते
महीरुहैराचितसानुकन्दरो यथा महेन्द्रः शुभकर्णिकारवान् ३९
स बाणसंघान्धनुषा व्यवासृजन्विभाति कर्णः शरजालरश्मिवान्
सलोहितो रक्तगभस्तिमण्डलो दिवाकरोऽस्ताभिमुखो यथा तथा ४०
बाह्वन्तरादाधिरथेर्विमुक्तान्बाणान्महाहीनिव दीप्यमानान्
व्यध्वंसयन्नर्जुनबाहुमुक्ताः शराः समासाद्य दिशः शिताग्राः ४१
ततश्चक्रमपतत्तस्य भूमौ स विह्वलः समरे सूतपुत्रः
घूर्णे रथे ब्राह्मणस्याभिशापाद्रामादुपात्तेऽप्रतिभातिचास्त्रे ४२

अमृष्यमाणो व्यसनानि तानि हस्तौ विधुन्वन्स विगर्हमाणः
धर्मप्रधानानभिपाति धर्म इत्यब्रुवन्धर्मविदः सदैव
ममापि निम्नोऽद्य न पाति भक्तान्मन्ये न नित्यं परिपाति धर्मः ४३
एवं ब्रुवन्प्रस्खलिताश्वसूतो विचाल्यमानोऽर्जुनशस्त्रपातैः
मर्माभिघाताच्छलितः क्रियासु पुनः पुनर्धर्ममगर्हदाजौ ४४
ततः शरैर्भीमतरैरविध्यत्त्रिभिराहवे
हस्ते कर्णस्तदा पार्थमभ्यविध्यच्च सप्तभिः ४५
ततोऽर्जुनः सप्तदश तिग्मतेजानजिह्मगान्
इन्द्राशनिसमान्घोरानमृजत्पावकोपमान् ४६
निर्भिद्य ते भीमवेगा न्यपतन्पृथिवीतले
कम्पितात्मा तथा कर्णः शक्त्या चेष्टामदर्शयत् ४७
बलेनाथ स संस्तभ्य ब्रह्मास्त्रं समुदैरयत्
एन्द्रास्त्रमर्जुनश्चापि तद्दृष्ट्वाभिन्यमन्त्रयत् ४८
गाण्डीवं ज्यां च बाणांश्च अनुमन्त्र्य धनंजयः
असृजच्छरवर्षाणि वर्षाणीव पुरंदरः ४९
ततस्तेजोमया बाणा रथात्पार्थस्य निःसृताः
प्रादुरासन्महावीर्याः कर्णस्य रथमन्तिकात् ५०
तान्कर्णस्त्वग्रतोऽभ्यस्तान्मोघांश्चक्रे महारथः
ततोऽब्रवीद्वृष्णिवीरस्तस्मिन्नस्त्रे विनाशिते ५१
विसृजास्त्रं परं पार्थ राधेयो ग्रसते शरान्
ब्रह्मास्त्रमर्जुनश्चापि संमन्त्र्याथ प्रयोजयत् ५२
छादयित्वा ततो बाणैः कर्णं प्रभ्राम्य चार्जुनः
तस्य कर्णः शरैः क्रुद्धश्चिच्छेद ज्यां सुतेजनैः ५३
ततो ज्यामवधायान्यामनुमृज्य च पाण्डवः
शरैरवाकिरत्कर्णं दीप्यमानैः सहस्रशः ५४
तस्य ज्याच्छेदनं कर्णो ज्यावधानं च संयुगे
नान्वबुध्यत शीघ्रत्वात्तदद्भुतमिवाभवत् ५५
अस्त्रैरस्त्राणि राधेयः प्रत्यहन्सव्यसाचिनः
चक्रे चाभ्यधिकं पार्थात्स्ववीर्यं प्रतिदर्शयन् ५६
ततः कृष्णोऽर्जुनं दृष्ट्वा कर्णास्त्रेणाभिपीडितम्

अभ्यस्येत्यब्रवीत्पार्थमातिष्ठास्त्रमनुत्तमम् ५७
ततोऽन्यमग्निसदृशं शरं सर्पविषोपमम्
अश्मसारमयं दिव्यमभिमन्त्र्य धनंजयः ५८
रौद्रमस्त्रं समादाय क्षेप्तुकामः किरीटवान्
ततोऽग्रसन्मही चक्रं राधेयस्य महामृधे ५९
ग्रस्तचक्रस्तु राधेयः कोपादश्रूण्यवर्तयत्
सोऽब्रवीदर्जुनं चापि मुहूर्तं क्षम पाण्डव ६०
मध्ये चक्रमवग्रस्तं दृष्ट्वा दैवादिदं मम
पार्थकापुरुषाचीर्णमभिसंधिं विवर्जय ६१
प्रकीर्णकेशे विमुखे ब्राह्मणे च कृताञ्जलौ
शरणागते न्यस्तशस्त्रे तथा व्यसनगेऽजुन ६२
अबाणे भ्रष्टकवचे भ्रष्टभग्नायुधे तथा
न शूराः प्रहरन्त्याजौ न राज्ञे पार्थिवास्तथा
त्वं च शूरोऽसि कौन्तेय तस्मात्क्षम मुहूर्तकम् ६३
यावच्चक्रमिदं भूमेरुद्धरामि धनंजय
न मां रथस्थो भूमिष्ठमसज्जं हन्तुमर्हसि
न वासुदेवात्त्वत्तो वा पाण्डवेय बिभेम्यहम् ६४
त्वं हि क्षत्रियदायादो महाकुलविवर्धनः
स्मृत्वा धर्मोपदेशं त्वं मुहूर्तं क्षम पाण्डव ६५
इति श्रीमहाभारते कर्णपर्वणि षट्षष्टितमोऽध्यायः ६६

सप्तषष्टितमोऽध्यायः

सञ्जय उवाच
अथाब्रवीद्वासुदेवो रथस्थो राधेय दिष्ट्या स्मरसीह धर्मम्
प्रायेण नीचा व्यसनेषु मग्ना निन्दन्ति दैवं कुकृतं न तत्तत् १
यद्द्रौपदीमेकवस्त्रां सभायामानाय्य त्वं चैव सुयोधनश्च
दुःशासनः शकुनिः सौबलश्च न ते कर्ण प्रत्यभात्तत्र धर्मः २
यदा सभायां कौन्तेयमनक्षज्ञं युधिष्ठिरम्
अक्षज्ञः शकुनिर्जेता तदा धर्मः क्व ते गतः ३
यदा रजस्वलां कृष्णां दुःशासनवशे स्थिताम्

सभायां प्राहसः कर्ण क्व ते धर्मस्तदा गतः ४
राज्यलुब्धः पुनः कर्ण समाह्वयसि पाण्डवम्
गन्धारराजमाश्रित्य क्व ते धर्मस्तदा गतः ५
एवमुक्ते तु राधेयो वासुदेवेन पाण्डवम्
मन्युरभ्याविशत्तीव्रः स्मृत्वा तत्तद्धनंजयम् ६
तस्य क्रोधेन सर्वेभ्यः स्रोतोभ्यस्तेजसोऽर्चिषः
प्रादुरासन्महाराज तदद्भुतमिवाभवत् ७
तं समीक्ष्य ततः कर्णो ब्रह्मास्त्रेण धनंजयम्
अभ्यवर्षत्पुनर्यत्नमकरोद्रथसर्जने
तदस्त्रमस्त्रेणावार्य प्रजहारास्य पाण्डवः ८
ततोऽन्यदस्त्रं कौन्तेयो दयितं जातवेदसः
मुमोच कर्णमुद्दिश्य तत्प्रजज्वाल वै भृशम् ९
वारुणेन ततः कर्णः शमयामास पावकम्
जीमूतैश्च दिशः सर्वाश्चक्रे तिमिरदुर्दिनाः १०
पाडवेयस्त्वसंभ्रान्तो वायव्यास्त्रेण वीर्यवान्
अपोवाह तदाभ्राणि राधेयस्य प्रपश्यतः ११
तं हस्तिकक्ष्याप्रवरं च बाणैः सुवर्णमुक्तामणिवज्रमृष्टम्
कालप्रयत्नोत्तमशिल्पियत्नैः कृतं सुरूपं वितमस्कमुच्चैः १२
ऊर्जस्करं तव सैन्यस्य नित्यममित्रवित्रासनमीड्यरूपम्
विख्यातमादित्यसमस्य लोके त्विषा समं पावकभानुचन्द्रैः १३
ततः क्षुरेणाधिरथेः किरीटी सुवर्णपुङ्खेन शितेन यत्तः
श्रिया ज्वलन्तं ध्वजमुन्ममाथ महारथस्याधिरथेर्महात्मा १४
यशश्च धर्मश्च जयश्च मारिष प्रियाणि सर्वाणि च तेन केतुना
तदा कुरूणां हृदयानि चापतन्बभूव हाहेति च निस्वनो महान् १५
अथ त्वरन्कर्णवधाय पाण्डवो महेन्द्रवज्रानलदण्डसंनिभम्
आदत्त पार्थोऽञ्जलिकं निषङ्गात्सहस्ररश्मेरिव रश्मिमुत्तमम् १६
मर्मच्छिदं शोणितमांसदिग्धं वैश्वानरार्कप्रतिमं महार्हम्
नराश्वनागासुहरं त्र्यरत्निं षड्वाजमञ्जोगतिमुग्रवेगम् १७
सहस्रनेत्राशनितुल्यतेजसं समानक्रव्यादमिवातिदुःसहम्
पिनाकनारायणचक्रसंनिभं भयंकरं प्राणभृतां विनाशनम् १८

युक्त्वा महास्त्रेण परेण मन्त्रविद्विकृष्य गाण्डीवमुवाच सस्वनम्
अयं महास्त्रोऽप्रतिमो धृतः शरः शरीरभिच्चासुहरश्च दुर्हृदः १९
तपोऽस्ति तप्तं गुरवश्च तोषिता मया यदिष्टं सुहृदां तथा श्रुतम्
अनेन सत्येन निहन्त्वयं शरः सुदंशितः कर्णमरिं ममाजितः २०
इत्यूचिवांस्तं स मुमोच बाणं धनंजयः कर्णवधाय घोरम्
कृत्यामथर्वाङ्गिरसीमिवोग्रां दीप्तामसह्यां युधि मृत्युनापि २१
ब्रुवन्किरीटी तमतिप्रहृष्टो अयं शरो मे विजयावहोऽस्तु
जिघांसुरर्केन्दुसमप्रभावः कर्णं समाप्तिं नयतां यमाय २२
तेनेषुवर्येण किरीटमाली प्रहृष्टरूपो विजयावहेन
जिघांसुरर्केन्दुसमप्रभेण चक्रे विषक्तं रिपुमाततायी २३
तदुद्यतादित्यसमानवर्चसं शरन्नभोमध्यगभास्करोपमम्
वराङ्गमुर्व्यामपतच्चमूपतेर्दिवाकरोऽस्तादिव रक्तमण्डलः २४
तदस्य देही सततः सुखोदितं स्वरूपमत्यर्थमुदारकर्मणः
परेण कृच्छ्रेण शरीरमत्यजद्गृहं महर्द्धीव ससङ्गमीश्वरः २५
शरैर्विभुग्नं व्यसु तद्विवर्मणः पपात कर्णस्य शरीरमुच्छ्रितम्
स्रवद्व्रणं गैरिकतोयविस्रवं गिरेर्यथा वज्रहतं शिरस्तथा २६
देहात्तु कर्णस्य निपातितस्य तेजो दीप्तं खं विगाह्याचिरेण
तदद्भुतं सर्वमनुष्ययोधाः पश्यन्ति राजन्निहते स्म कर्णे २७
तं सोमकाः प्रेक्ष्य हतं शयानं प्रीता नादं सह सैन्यैरकुर्वन्
तूर्याणि चाजघ्नुरतीव हृष्टा वासांसि चैवादुधुवुर्भुजांश्च
बलान्विताश्चाप्यपरे ह्यनृत्यन्नन्योन्यमाश्लिष्य नदन्त ऊचुः २८
दृष्ट्वा तु कर्णं भुवि निष्टनन्तं हतं रथात्सायकेनावभिन्नम्
महानिलेनाग्निमिवापविद्धं यज्ञावसाने शयने निशान्ते २९
शरैराचितसर्वाङ्गः शोणितौघपरिप्लुतः
विभाति देहः कर्णस्य स्वरश्मिभिरिवांशुमान् ३०
प्रताप्य सेनामामित्रीं दीप्तैः शरगभस्तिभिः
बलिनार्जुनकालेन नीतोऽस्त कर्णभास्करः ३१
अस्तं गच्छन्यथादित्यः प्रभामादाय गच्छति
एवं जीवितमादाय कर्णस्येषुर्जगाम ह ३२
अपराह्णे पराह्णस्य सूतपुत्रस्य मारिष

छिन्नमञ्जलिकेनाजौ सोत्सेधमपतच्छिरः ३३
उपर्युपरि सैन्यानां तस्य शत्रोस्तदञ्जसा
शिरः कर्णस्य सोत्सेधमिषुः सोऽपाहरद्द्रुतम् ३४
सञ्जय उवाच
कर्णं तु शूरं पतितं पृथिव्यां शराचितं शोणितदिग्धगात्रम्
दृष्ट्वा शयानं भुवि मद्रराजश्छिन्नध्वजेनापययौ रथेन ३५
कर्णे हते कुरवः प्राद्रवन्त भयार्दिता गाढविद्धाश्च संख्ये
अवेक्ष्यमाणा मुहुरर्जुनस्य ध्वजं महान्तं वपुषा ज्वलन्तम् ३६
सहस्रनेत्रप्रतिमानकर्मणः सहस्रपत्रप्रतिमाननं शुभम्
सहस्ररश्मिर्दिनसंक्षये यथा तथापतत्तस्य शिरो वसुंधराम् ३७
इति श्रीमहाभारते कर्णपर्वणि सप्तषष्टितमोऽध्यायः ६७

अष्टषष्ठितमोऽध्यायः

सञ्जय उवाच
शल्यस्तु कर्णार्जुनयोर्विमर्दे बलानि दृष्ट्वा मृदितानि बाणैः
दुर्योधनं यान्तमवेक्षमाणो संदर्शयद्भारत युद्धभूमिम् १
निपातितस्यन्दनवाजिनागं दृष्ट्वा बलं तद्धतसूतपुत्रम्
दुर्योधनोऽश्रुप्रतिपूर्णनेत्रो मुहुर्मुहुर्न्यश्वसदार्तरूपः २
कर्णं तु शूरं पतितं पृथिव्यां शराचितं शोणितदिग्धगात्रम्
यदृच्छया सूर्यमिवावनिस्थं दिदृक्षवः संपरिवार्य तस्थुः ३
प्रहृष्टवित्रस्तविषण्णविस्मृतास्तथापरे शोकगता इवाभवन्
परे त्वदीयाश्च परस्परेण यथा यथैषां प्रकृतिस्तथाभवन् ४
प्रविद्धवर्माभरणाम्बरायुधं धनंजयेनाभिहतं हतौजसम्
निशम्य कर्णं कुरवः प्रदुद्रुवुर्हतर्षभा गाव इवाकुलाकुलाः ५
कृत्वा विमर्दं भृशमर्जुनेन कर्णं हतं केसरिणेव नागम्
दृष्ट्वा शयानं भुवि मद्रराजो भीतोऽपसर्पत्सरथः सुशीघ्रम् ६
मद्राधिपश्चापि विमूढचेतास्तूर्णं रथेनापहृतध्वजेन
दुर्योधनस्यान्तिकमेत्य शीघ्रं संभाष्य दुःखार्तमुवाच वाक्यम् ७
विशीर्णनागाश्वरथप्रवीरं बलं त्वदीयं यमराष्ट्रकल्पम्
अन्योन्यमासाद्य हतं महद्भिर्नराश्वनागैर्गिरिकूटकल्पैः ८

नैतादृशं भारत युद्धमासीद्यथाद्य कर्णार्जुनयोर्बभूव
ग्रस्तौ हि कर्णेन समेत्य कृष्णावन्ये च सर्वे तव शत्रवो ये ९
दैवं तु यत्तत्स्ववशं प्रवृत्तं तत्पाण्डवान्पाति हिनस्ति चास्मान्
तवार्थसिद्ध्यर्थकरा हि सर्वे प्रसह्य वीरा निहता द्विषद्भिः १०
कुबेरवैवस्वतवासवानां तुल्यप्रभावाम्बुपतेश्च वीराः
वीर्येण शौर्येण बलेन चैव तैस्तैश्च युक्ता विपुलैर्गुणौघैः ११
अवध्यकल्पा निहता नरेन्द्रास्तवार्थकामा युधि पाण्डवेयैः
तन्मा शुचो भारत दिष्टमेतत्पर्यायसिद्धिर्न सदास्ति सिद्धिः १२
एतद्वचो मद्रपतेर्निशम्य स्वं चापनीतं मनसा निरीक्ष्य
दुर्योधनो दीनमना विसंज्ञः पुनः पुनर्न्यश्वसदार्तरूपः १३
तं ध्यानमूकं कृपणं भृशार्तमार्तायनिर्दीनमुवाच वाक्यम्
पश्येदमुग्रं नरवाजिनागैरायोधनं वीरहतैः प्रपन्नम् १४
महीधराभैः पतितैर्महागजैः सकृत्प्रविद्धैः शरविद्धमर्मभिः
तैर्विह्वलद्भिश्च गतासुभिश्च प्रध्वस्तयन्त्रायुधवर्मयोधैः १५
वज्रापविद्धैरिव चाचलेन्द्रैर्विभिन्नपाषाणमृगद्रुमौषधैः
प्रविद्धघण्टाङ्कुशतोमरध्वजैः सहेममालै रुधिरौघसंप्लुतैः १६
शरावभिन्नैः पतितैश्च वाजिभिः श्वसद्भिरन्यैः क्षतजं वमद्भिः
दीनैः स्तनद्भिः परिवृत्तनेत्रैर्महीं दशद्भिःकृपणं नदद्भिः १७
तथापविद्धैर्गजवाजियोधैर्मन्दासुभिश्चैव गतासुभिश्च
नराश्वनागैश्च रथैश्च मर्दितैर्मही महावैतरणीव दुर्दृशा १८
गजैर्निकृत्तापरहस्तगात्रैरुद्वेपमानैः पतितैः पृथिव्याम्
यशस्विभिर्नागरथाश्व योधिभिः पदातिभिश्चाभिमुखैर्हतैः परैः
विशीर्णवर्माभरणाम्बरायुधैर्वृता निशान्तैरिव पावकैर्मही १९
शरप्रहाराभिहतैर्महाबलैरवेक्ष्यमाणैः पतितैः सहस्रशः
प्रनष्टसंज्ञैः पुनरुच्छ्वसद्भिर्मही बभूवानुगतैरिवाग्निभिः
दिवश्च्युतैर्भूरतिदीप्तिमद्भिर्नक्तं ग्रहैर्द्यौरमलेव दीप्तैः २०
शरास्तु कर्णार्जुनबाहुमुक्ता विदार्य नागाश्वमनुष्यदेहान्
प्राणान्निरस्याशु महीमतीयुर्महोरगा वासमिवाभितोऽस्त्रैः २१
हतैर्मनुष्याश्वगजैश्च संख्ये शरावभिन्नैश्च रथैर्बभूव
धनञ्जयस्याधिरथेश्च मार्गे गजैरगम्या वसुधातिदुर्गा २२

रथैर्व रेषून्मथितैश्च योधैः संस्यूतसूताश्ववरायुधध्वजैः
विशीर्णशस्त्रैर्विनिकृत्तबन्धुरैर्निकृत्तचक्राक्षयुगत्रिवेणुभिः २३
विमुक्तयन्त्रैर्निहतैरयस्मयैर्हतानुषङ्गैर्विनिषङ्गबन्धुरैः
प्रभग्ननीडैर्मणिहेममण्डितैः स्तृता मही द्यौरिव शारदैर्घनैः २४
विकृष्यमाणैर्जवनैरलंकृतैर्हतेश्वरैराजिरथैः सुकल्पितैः
मनुष्यमातङ्गरथाश्वराशिभिर्द्रुतं व्रजन्तो बहुधा विचूर्णिताः २५
सहेमपट्टाः परिघाः परश्वधाः कडङ्गरायोमुसलानि पट्टिशाः
पेतुश्च खड्गा विमला विकोशा गदाश्च जाम्बूनदपट्टबद्धाः २६
चापानि रुक्माङ्गदभूषणानि शराश्च कार्तस्वरचित्रपुङ्खाः
ऋष्टयश्च पीता विमला विकोशाः प्रासाः सखड्गाः कनकावभासाः २७
छत्त्राणि वालव्यजनानि शङ्खाः स्रजश्च पुष्पोत्तमहेमचित्राः
कुथाः पताकाम्बरवेष्टिताश्च किरीटमाला मुकुटाश्च शुभ्राः २८
प्रकीर्णका विप्रकीर्णाः कुथाश्च प्रधानमुक्तातरलाश्च हाराः
आपीडकेयूरवराङ्गदानि ग्रैवेयनिष्काः ससुवर्णसूत्राः २९
मण्युत्तमा वज्रसुवर्णमुक्ता रत्नानि चोच्चावचमङ्गलानि
गात्राणि चात्यन्तसुखोचितानि शिरांसि चेन्दुप्रतिमाननानि ३०
देहांश्च भोगांश्च परिच्छदांश्च त्यक्त्वा मनोज्ञानि सुखानि चापि
स्वधर्मनिष्ठां महतीमवाप्य व्याप्तांश्च लोकान्यशसा समीयुः ३१
इत्येवमुक्त्वा विरराम शल्यो दुर्योधनः शोकपरीतचेताः
हा कर्ण हा कर्ण इति ब्रुवाण आर्तो विसंज्ञो भृशमश्रुनेत्रः ३२
तं द्रोणपुत्रप्रमुखा नरेन्द्राः सर्वे समाश्वास्य सह प्रयान्ति
निरीक्षमाणा मुहुरर्जुनस्य ध्वजं महान्तं यशसा ज्वलन्तम् ३३
नराश्वमातङ्गशरीरजेन रक्तेन सिक्ता रुधिरेण भूमिः
रक्ताम्बरस्रक्तपनीययोगान्नारी प्रकाशा इव सर्वगम्या ३४
प्रच्छन्नरूपा रुधिरेण राजन्रौद्रे मुहूर्तेऽतिविराजमानाः
नैवावतस्थुः कुरवः समीक्ष्य प्रव्राजिता देवलोकाश्च सर्वे ३५
वधेन कर्णस्य सुदुःखितास्ते हा कर्ण हा कर्ण इति ब्रुवाणाः
द्रुतं प्रयाताः शिबिराणि राजन्दिवाकरं रक्तमवेक्षमाणाः ३६
गाण्डीवमुक्तैस्तु सुवर्णपुङ्खैः शितैः शरैः शोणितदिग्धवाजैः
शरैश्चिताङ्गो भुवि भाति कर्णो हतोऽपि सन्सूर्य इवांशुमाली ३७

कर्णस्य देहं रुधिरावसिक्तं भक्तानुकम्पी भगवान्विवस्वान्
स्पृष्ट्वा करैर्लोहितरक्तरूपः सिष्णासुरभ्येति परं समुद्रम् ३८
इतीव संचिन्त्य सुरर्षिसंघाः संप्रस्थिता यान्ति यथानिकेतम्
संचिन्तयित्वा च जना विसस्रुर्यथासुखं खं च महीतलं च ३९
तदद्भुतं प्राणभृतां भयङ्करं निशम्य युद्धं कुरुवीरमुख्ययोः
धनञ्जयस्याधिरथेश्च विस्मिताः प्रशंसमानाः प्रययुस्तदा जनाः ४०
शरैः संकृत्तवर्माणं वीरं विशसने हतम्
गतासुमपि राधेयं नैव लक्ष्मीर्व्यमुञ्चत ४१
नानाभरणवान्राजन्मृष्टजाम्बूनदाङ्गदः
हतो वैकर्तनः शेते पादपोऽङकुरवानिव ४२
कनकोत्तमसंकाशः प्रदीप्त इव पावकः
सपुत्रः पुरुषव्याघ्रः संशान्तः पार्थतेजसा
प्रताप्य पाण्डवान्राजन्पाञ्चालांश्चास्त्रतेजसा ४३
ददानीत्येव योऽवोचन्न नास्तीत्यर्थितोऽथिभिः
सद्भिः सदा सत्पुरुषः स हतो द्वैरथे वृषः ४४
यस्य ब्राह्मणसात्सर्वमात्मार्थं न महात्मनः
नादेयं ब्राह्मणेष्वासीद्यस्य स्वमपि जीवितम् ४५
सदा नृणां प्रियो दाता प्रियदानो दिवं गतः
आदाय तव पुत्राणां जयाशां शर्मवर्म च ४६
हते स्म कर्णे सरितो न स्रवन्ति जगाम चास्तं कलुषो दिवाकरः
ग्रहश्च तिर्यग्ज्वलितार्कवर्णो यमस्य पुत्रोऽभ्युदियाय राजन् ४७
नभः पफालाथ ननाद चोर्वी ववुश्च वाताः परुषातिवेलम्
दिशः सधूमाश्च भृशं प्रजज्वलुर्महार्णवाश्चुक्षुभिरे च सस्वनाः ४८
सकाननाः साद्रिचयाश्चकम्पुः प्रविव्यथुर्भूतगणाश्च मारिष
बृहस्पती रोहिणीं संप्रपीड्य बभूव चन्द्रार्कसमानवर्णः ४९
हते कर्णे न दिशो विप्रजज्ञुस्तमोवृता द्यौर्विचचाल भूमिः
पपात चोल्का ज्वलनप्रकाशा निशाचराश्चाप्यभवन्प्रहृष्टाः ५०
शशिप्रकाशाननमर्जुनो यदा क्षुरेण कर्णस्य शिरो न्यपातयत्
अथान्तरिक्षे दिवि चेह चासकृद्बभूव हाहेति जनस्य निस्वनः ५१
स देवगन्धर्वमनुष्यपूजितं निहत्य कर्णं रिपुमाहवेऽजुनः

रराज पार्थः परमेण तेजसा वृत्रं निहत्येव सहस्रलोचनः ५२
ततो रथेनाम्बुदवृन्दनादिना शरन्नभोमध्यगभास्करत्विषा
पताकिना भीमनिनादकेतुना हिमेन्दुशङ्खस्फटिकावभासिना
सुवर्णमुक्तामणिवज्रविद्रुमैरलंकृतेनाप्रतिमानरंहसा ५३
नरोत्तमौ पाण्डवकेशिमर्दनावुदाहितावग्निदिवाकरोपमौ
रणाजिरे वीतभयौ विरेजतुः समानयानाविव विष्णुवासवौ ५४
ततो धनुर्ज्यातलनेमिनिस्वनैः प्रसह्य कृत्वा च रिपून्हतप्रभान्
संसाधयित्वैव कुरूञ्शरौघैः कपिध्वजः पक्षिवरध्वजश्च
प्रसह्य शङ्खौ धमतुः सुघोषौ मनांस्यरीणामवसादयन्तौ ५५
सुवर्णजालावततौ महास्वनौ हिमावदातौ परिगृह्य पाणिभिः
चुचुम्बतुः शङ्खवरौ नृणां वरौ वराननाभ्यां युगपच्च दध्मतुः ५६
पाञ्चजन्यस्य निर्घोषो देवदत्तस्य चोभयोः
पृथिवीमन्तरिक्षं च द्यामपश्चाप्यपूरयत् ५७
तौ शङ्खशब्देन निनादयन्तौ वनानि शैलान्सरितो दिशश्च
वित्रासयन्तौ तव पुत्रसेनां युधिष्ठिरं नन्दयतः स्म वीरौ ५८
ततः प्रयाताः कुरवो जवेन श्रुत्वैव शङ्खस्वनमीर्यमाणम्
विहाय मद्राधिपतिं पतिं च दुर्योधनं भारत भारतानाम् ५९
महाहवे तं बहु शोभमानं धनञ्जयं भूतगणाः समेताः
तदान्वमोदन्त जनार्दनं च प्रभाकरावभ्युदितौ यथैव ६०
समाचितौ कर्णशरैः परंतपावुभौ व्यभातां समरेऽच्युतार्जुनौ
तमो निहत्याभ्युदितौ यथामलौ शशाङ्कसूर्याविव रश्मिमालिनौ ६१
विहाय तान्बाणगणानथागतौ सुहृद्वृतावप्रतिमानविक्रमौ
सुखं प्रविष्टौ शिबिरं स्वमीश्वरौ सदस्यहूताविव वासवाच्युतौ ६२
सदेवगन्धर्वमनुष्यचारणैर्महर्षिभिर्यक्षमहोरगैरपि
जयाभिवृद्ध्या परयाभिपूजितौ निहत्य कर्णं परमाहवे तदा ६३
इति श्रीमहाभारते कर्णपर्वणि अष्टषष्टितमोऽध्यायः ६८

एकोनसप्ततितमोऽध्यायः

सञ्जय उवाच
तथा निपातिते कर्णे तव सैन्ये च विद्रुते

आश्लिष्य पार्थं दाशार्हो हर्षाद्वचनमब्रवीत् १
हतो बलभिदा वृत्रस्त्वया कर्णो धनंजय
वधं वै कर्णवृत्राभ्यां कथयिष्यन्ति मानवाः २
वज्रिणा निहतो वृत्रः संयुगे भूरितेजसा
त्वया तु निहतः कर्णो धनुषा निशितैः शरैः ३
तमिमं विक्रमं लोके प्रथितं ते यशोवहम्
निवेदयावः कौन्तेय धर्मराजाय धीमते ४
वधं कर्णस्य संग्रामे दीर्घकालचिकीर्षितम्
निवेद्य धर्मराजस्य त्वमानृण्यं गमिष्यसि ५
तथेत्युक्ते केशवस्तु पार्थेन यदुपुंगवः
पर्यवर्तयदव्यग्रो रथं रथवरस्य तम् ६
धृष्टद्युम्नं युधामन्युं माद्रीपुत्रौ वृकोदरम्
युयुधानं च गोविन्द इदं वचनमब्रवीत् ७
परानभिमुखा यत्तास्तिष्ठध्वं भद्रमस्तु वः
यावदावेद्यते राज्ञे हतः कर्णोऽर्जुनेन वै ८
स तैः शूरैरनुज्ञातो ययौ राजनिवेशनम्
पार्थमादाय गोविन्दो ददर्श च युधिष्ठिरम् ९
शयानं राजशार्दूलं काञ्चने शयनोत्तमे
अगृह्णीतां च चरणौ मुदितौ पार्थिवस्य तौ १०
तयोः प्रहर्षमालक्ष्य प्रहारांश्चातिमानुषान्
राधेयं निहतं मत्वा समुत्तस्थौ युधिष्ठिरः ११
ततोऽस्मै तद्यथावृत्तं वासुदेवः प्रियंवदः
कथयामास कर्णस्य निधनं यदुनन्दनः १२
ईषदुत्स्मयमानस्तु कृष्णो राजानमब्रवीत्
युधिष्ठिरं हतामित्रं कृताञ्जलिरथाच्युतः १३
दिष्ट्या गाण्डीवधन्वा च पाण्डवश्च वृकोदरः
त्वं चापि कुशली राजन्माद्रीपुत्रौ च पाण्डवौ १४
मुक्ता वीरक्षयादस्मात्संग्रामाल्लोमहर्षणात्
क्षिप्रमुत्तरकालानि कुरु कार्याणि पार्थिव १५
हतो वैकर्तनः क्रूरः सूतपुत्रो महाबलः

दिष्ट्या जयसि राजेन्द्र दिष्ट्या वर्धसि पाराडव १६
यः स द्यूतजितां कृष्णां प्राह सत्पुरुषाधमः
तस्याद्य सूतपुत्रस्य भूमिः पिबति शोणितम् १७
शेतेऽसौ शरदीर्णाङ्गः शत्रुस्ते कुरुपुंगव
तं पश्य पुरुषव्याघ्र विभिन्नं बहुधा शरैः १८
युधिष्ठिरस्तु दाशार्हं प्रहृष्टः प्रत्यपूजयत्
दिष्ट्या दिष्ट्येति राजेन्द्र प्रीत्या चेदमुवाच ह १९
नैतच्चित्रं महाबाहो त्वयि देवकिनन्दन
त्वया सारथिना पार्थो यत्कुर्यादद्य पौरुषम् २०
प्रगृह्य च कुरुश्रेष्ठः साङ्गदं दक्षिणं भुजम्
उवाच धर्मभृत्पार्थ उभौ तौ केशवार्जुनौ २१
नरनारायणौ देवौ कथितौ नारदेन ह
धर्मसंस्थापने युक्तौ पुराणौ पुरुषोत्तमौ २२
असकृच्चापि मेधावी कृष्णद्वैपायनो मम
कथामेतां महाबाहो दिव्यामकथयत्प्रभुः २३
तव कृष्ण प्रभावेण गाराडीवेन धनञ्जयः
जयत्यभिमुखाञ्शत्रून्न चासीद्विमुखः क्वचित् २४
जयश्चैव ध्रुवोऽस्माकं न त्वस्माकं पराजयः
यदा त्वं युधि पार्थस्य सारथ्यमुपजग्मिवान् २५
एवमुक्त्वा महाराज तं रथं हेमभूषितम्
दन्तवर्णैर्हयैर्युक्तं कालवालैर्महारथः २६
आस्थाय पुरुषव्याघ्रः स्वबलेनाभिसंवृतः
कृष्णार्जुनाभ्यां वीराभ्यामनुमन्य ततः प्रियम् २७
आगतो बहुवृत्तान्तं द्रष्टुमायोधनं तदा
आभाषमाणस्तौ वीरावुभौ माधवफल्गुनौ २८
स ददर्श रणे कर्णं शयानं पुरुषर्षभम्
गाराडीवमुक्तैर्विशिखैः सर्वतः शकलीकृतम् २९
सपुत्रं निहतं दृष्ट्वा कर्णं राजा युधिष्ठिरः
प्रशशंस नरव्याघ्रावुभौ माधवपाराडवौ ३०
अद्य राजास्मि गोविन्द पृथिव्यां भ्रातृभिः सह

त्वया नाथेन वीरेण विदुषा परिपालितः ३१
हतं दृष्ट्वा नरव्याघ्रं राधेयमभिमानिनम्
निराशोऽद्य दुरात्मासौ धार्तराष्ट्रो भविष्यति
जीविताच्चापि राज्याच्च हते कर्णे महारथे ३२
त्वत्प्रसादाद्वयं चैव कृतार्थाः पुरुषर्षभ
त्वं च गाण्डीवधन्वा च विजयी यदुनन्दन
दिष्ट्या जयसि गोविन्द दिष्ट्या कर्णो निपातितः ३३
एवं स बहुशो हृष्टः प्रशशंस जनार्दनम्
अर्जुनं चापि राजेन्द्र धर्मराजो युधिष्ठिरः ३४
ततो भीमप्रभृतिभिः सर्वैश्च भ्रातृभिर्वृतम्
वर्धयन्ति स्म राजानं हर्षयुक्ता महारथाः ३५
नकुलः सहदेवश्च पाण्डवश्च वृकोदरः
सात्यकिश्च महाराज वृष्णीनां प्रवरो रथः ३६
धृष्टद्युम्नः शिखण्डी च पाण्डुपाञ्चालसृञ्जयाः
पूजयन्ति स्म कौन्तेयं निहते सूतनन्दने ३७
ते वर्धयित्वा नृपतिं पाण्डुपुत्रं युधिष्ठिरम्
जितकाशिनो लब्धलक्षा युद्धशौण्डाः प्रहारिणः ३८
स्तुवन्तः स्तवयुक्ताभिर्वाग्भिः कृष्णौ परंतपौ
जग्मुः स्वशिबिरायैव मुदा युक्ता महारथाः ३९
एवमेष क्षयो वृत्तः सुमहाँल्लोमहर्षणः
तव दुर्मन्त्रिते राजन्नतीतं किं नु शोचसि ४०
वैशम्पायन उवाच
श्रुत्वा तदप्रियं राजन्धृतराष्ट्रो महीपतिः
पपात भूमौ निश्चेष्टः कौरव्यः परमातिर्वान्
तथा सत्यव्रता देवी गान्धारी धर्मदर्शिनी ४१
तं प्रत्यगृह्णाद्विदुरो नृपतिं सञ्जयस्तथा
पर्याश्वासयतश्चैवं तावुभावेव भूमिपम् ४२
तथैवोत्थापयामासुर्गान्धारीं राजयोषितः
ताभ्यामाश्वासितो राजा तूष्णीमासीद्विचेतनः ४३
इति श्रीमहाभारते कर्णपर्वणि एकोनसप्ततितमोऽध्यायः ६९

समाप्तं कर्णपर्व